अनुगवमायामे ॥ ८३ ॥

'अनुगवम्' इत्यच्प्रत्ययान्तं निपात्यते आयामेऽभिधेये। अनुगवं यानम्। 'यस्य चायामः' इति समासः।

आयाम इति किम्? गवां पश्चादनुगु ॥

द्विस्तावा त्रिस्तावा वेदिः ॥ ८४ ॥

'द्विस्तावा', 'त्रिस्तावा' इति निपात्यते वेदिश्चेद् अभिधेया भवति। अच्प्रत्ययः, टिलोपः, समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्याञ्चिद्विकृतौ तत्रेदं निपातनम्। द्विस्तावा वेदिः। त्रिस्तावा वेदिः।

पदमञ्जरी

अनुगवमायामे ॥ आयामेऽभिधेय इति। प्रवृत्तिनिमित्तमायामः, तद्वति तु पर्यवसानम्। मत्वर्थीयाकारान्तो वा आयामशब्दः, आयामवत्यभिधेय इत्यर्थः; अन्यथाऽनुगवं यानमिति सामानाधिकरण्यं न स्यात्। *यस्य चायाम इति समास इति।* ननु तत्र लक्षणेनेति वर्त्तते? सत्यम्; इहापि बाह्यं यानं प्रति गवामस्त्येव लक्षणभावः। अनुगुशब्दात्प्रत्ययेऽभिधातव्ये निपातनाश्रयणं प्रसिद्ध्युपसंग्रहार्थम्, तेन यद्गवां बाह्यं तत्रैव भवति ॥

द्विस्तावा त्रिस्तावा वेदिः ॥ समासश्च निपात्यत इति। लक्षणाभावात्। *यावती प्रकृतावित्यादिना* निपातनस्य विषयं दर्शयति, यस्मिन्कर्मण्युपदिष्टा धर्माः कर्मान्तरेणोपजीव्यन्ते सा प्रकृतिर्ज्योतिष्टोमादिः, येनोपजीव्यते सा=विकृतिः। *कस्याञ्चिद्विकृताविति।* अश्वमेधादौ। *द्विस्तावेति।* तावतीशब्देन तत्सम्बन्धिन्या वृत्तिर्लक्ष्यते, सैव च द्विशब्देन संख्यायत इति सुच् प्रत्ययः, परस्पर-

न्यासः

अनुगवमायामे ॥ आयामेऽभिधेये इति। आयामः=दैर्घ्यम्। मत्वर्थीयाकारान्तश्चायम्। आयामे चेत्यभिधेय इत्यर्थः। अन्यथानुगवं यानमिति सामानाधिकरण्यं न स्यात्। यानम्=आयामः। **अनुगवं यानमिति।** गावो यथा तथा यानमायातमित्यर्थः।

गवां पश्चादिति। 'अव्ययं विभक्ति' इत्यादिनाव्ययीभावः पश्चादर्थे च पूर्ववद् गोशब्दस्य ह्रस्वः। अनुशब्दात् प्रत्यये विधातव्ये यदनुगवमिति निपातनं तत्प्रसिद्ध्युपसंग्रहार्थम्। तेन यद् गवा बाह्यं गोभिश्च तुल्यायामं तत्रैव भवति, नान्यत्र ॥

द्विस्तावा त्रिस्तावा वेदिः ॥ टिलोपस्तावतीशब्दस्य। यस्येतिलोपे कृते तावच्छब्दस्य टिलोपो निपात्यते। **समासश्चेति** द्वित्रिशब्दयोर्निपात्यते। सापेक्षं तु यावतीशब्दापेक्षत्वात्। **यावती प्रकृतावित्यादिना** निपातनस्य फलं दर्शयति।

Indira Gandhi National Centre for the Arts

वेदिरिति किम् ? द्विस्तावती, त्रिस्तावती रज्जुः ॥

उपसर्गादध्वनः ॥ ८५ ॥

उपसर्गात्परो योऽध्वन्-शब्दस्तदन्तात् समासाद् अच् प्रत्ययो भवति। प्रगतोऽध्वानं प्राध्वो रथः। प्राध्वं शकटम्। निरध्वम्। प्रत्यध्वम्।

उपसर्गादिति किम् ? परमाध्वा। उत्तमाध्वा ॥

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ ८६ ॥

अङ्गुलिशब्दान्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् प्रत्ययो भवति। द्वे अङ्गुली प्रमाणमस्य द्वयङ्गुलम्। त्र्यङ्गुलम्। 'तद्धितार्थ' इति समासः। 'प्रमाणे लो द्विगोर्नित्यम्' इति मात्रचो लोपः। अव्ययादेः—निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अत्यङ्गुलम्।

तत्पुरुषस्येति किम् ? पञ्चाङ्गुलिः। अत्यङ्गुलिः पुरुषः।

तत्पुरुषाधिकारश्च 'द्वन्द्वाच्चुदषहान्तात्' इति यावत् ॥

पदमञ्जरी

सामर्थ्यं च। द्विस्तावतीत्यसमासोऽयम्। सूत्रे लिङ्गमविवक्षितम्। द्विस्तावोऽग्निरित्यपि दृश्यते। न चात्राग्निरभिधीयते, न वेदिः ? अग्निरपि वेदिरेव; उत्तरवेदिविकारत्वात्, 'उत्तरवेद्यामग्निश्चीयते' इति वचनात् ॥

उपसर्गादध्वनः ॥ अध्वशब्दस्याक्रियावचनत्वात्तं प्रत्युपसर्गसंज्ञाभावादुपसर्गग्रहणं प्राद्युपलक्षणम् ॥

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ अङ्गुलिशब्दान्तस्येत्यादि। सर्वत्र समासान्तसम्बन्धे षष्ठी ॥

न्यासः

प्रकृतिविकृतिशब्दौ कार्यविशेषवचनौ। कर्मविशेषे हि कश्चित् यागाख्यः प्रकृतिशब्देनोच्यते, कश्चिद्विकृतिशब्देन ॥

उपसर्गादध्वनः ॥ प्राध्वमिति। प्रादिसमासः। तत्र प्राध्वमिति 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। निष्क्रान्तमध्वन इति 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति। **अत्यध्वमिति।** प्राध्वमित्यनेन तुल्यमेतत्। उपसर्गश्चात्र न गत्युपलक्षणम्। कुत एतत् ? क्रियायोगाभावात् ॥

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ मात्रचो लोप इति। 'प्रमाणे द्वयसज्' इत्यादिना विहितस्य। **निरङ्गुलमिति।** निरध्वमित्यनेन तुल्यमेतत्। **अत्यङ्गुलमिति।** एतदप्यत्यध्वमित्यनेन तुल्यम्। **पञ्चाङ्गुलिरिति** बहुव्रीहिः ॥

Indira Gandhi National Centre for the Arts

अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ ८७ ॥

अहरादिभ्यः परो यो रात्रिशब्दस्तदन्तस्य तत्पुरुषस्याच् प्रत्ययो भवति, चकारात्संख्यादेरव्ययादेश्च । अहर्ग्रहणं द्वन्द्वार्थम् । अहश्च रात्रिश्च अहोरात्रः । सर्वरात्रः । एकदेशे—पूर्वं रात्रे पूर्वरात्रः । अपररात्रः । 'पूर्वपरावर' इति समासः । संख्याता रात्रिः संख्यातरात्रः । 'विशेषणं विशेष्येण' इति समासः । एवं पुण्या रात्रिः पुण्यरात्रः । संख्याव्ययादेः खल्वपि—द्वे रात्री समाहृते द्विरात्रः । त्रिरात्रः । अतिक्रान्तो रात्रिमतिरात्रः । नीरात्रः ॥

अह्नोऽह्न एतेभ्यः ॥ ८८ ॥

पदमञ्जरी

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ अहर्ग्रहणं द्वन्द्वार्थमिति । न तु तत्पुरुषार्थम्; मुख्यार्थवृत्तयोस्तत्पुरुषासम्भवात् । न ह्यस्ति सम्भवः-अहश्चासौ रात्रिश्चेति, नाप्यहोरात्रिरित्यस्ति । यदि तु रात्रिशब्देन तद्गुणमहरुच्यते, अहःशब्देन तद्गुणा रात्रिः, ततः सम्भवेदपि विशेषणसमासः । गौणार्थता तु भवति । न च मुख्ये सम्भवति गौणस्य ग्रहणं युक्तम्, तस्मादहर्ग्रहणं द्वन्द्वार्थम् । तथा च–'हेमन्तशिशिरावहोरात्रे च छन्दसि' इति द्वन्द्वे समासान्तो निर्दिष्टः । *अहोरात्र इति ।* समाहारद्वन्द्वः, 'रात्राह्नाहाः पुंसि', अह्नो रुत्वे 'रूपरात्रिरथन्तरेषु' इति नकारस्य रुत्वम्, तस्य 'हशि च' इत्युत्वम् । *द्विरात्र इति ।* समाहारे द्विगुः । *नीरात्र इति ।* प्रादिसमासः, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' ॥

न्यासः

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ अहर्ग्रहणं द्वन्द्वार्थमिति । इष्टिरियम् । न तत्पुरुषार्थम् ; मुख्यार्थे तत्पुरुषस्यासम्भवात् । द्वन्द्वार्थं पदार्थं प्रत्याश्रयः । तथा हि–यद्यहर्गुणा रात्रिरहःशब्देनोच्यते, रात्रिगुणं वाहो रात्रिशब्देन गौण्या कल्पनया, तदाहश्च रात्रिश्चेति समानाधिकरणस्तत्पुरुषः सम्भवत्येव । तस्मादिष्टिरियम् । एतावदुक्तं स्याद्–द्वन्द्व इष्यत इति । अत्र च ज्ञापकम्–'हेमन्तशिशिरावहोरात्रे च च्छन्दसि' इति द्वन्द्वे समासान्तस्य रात्रिशब्दस्य निपातनम् । **अहोरात्र इति ।** 'रात्राह्नाहाः पुंसि' इति पुंल्लिङ्गता । 'अहन्' इति 'रूपरात्रिरथन्तरेषूपसंख्यानम्' इति नकारस्य रुत्वाद् गुणः । **सर्वरात्र इति ।** 'पूर्वकालैकसर्व' इत्यादिना समानाधिकरणस्तत्पुरुषः । **द्विरात्र इति ।** 'तद्धितार्थोत्तरपद' इत्यादिना समाहारे द्विगुः, 'द्विगुश्च' इति तत्पुरुषसंज्ञा । **अतिरात्र इति ।** अत्यध्वमित्यनेन तुल्यमेतत् । **नीरात्र इति ।** 'रो रि' इति रेफलोपः, 'ढ्रलोपे पूर्वस्य' इति दीर्घः ।

Indira Gandhi National Centre for the Arts

'राजाहःसखिभ्यष्टच्' इति वक्ष्यति, तस्मिन् परभूते अहन्नित्येतस्य 'अह्न' इत्ययमादेशो भवति एतेभ्य उत्तरस्य। संख्याव्ययादयः प्रक्रान्ताः सर्वनाम्ना प्रत्यवमृश्यन्ते। सामर्थ्याच्चाहःशब्दः पूर्वत्वेन नाश्रीयते। परिशिष्टानां ग्रहणम्। न ह्यहःशब्दात् परोऽहःशब्दः सम्भवति। संख्यायास्तावत्—द्वयोरह्नोर्भवः द्व्यह्नः। त्र्यह्नः। अव्ययात्—अहरतिक्रान्तः अत्यह्नः। निरह्नः। सर्वाह्णः। पूर्वाह्णः। अपराह्णः। संख्याताह्नः।

पुण्यशब्दात्प्रतिषेधं वक्ष्यति॥

पदमञ्जरी

अह्नोऽह्न एतेभ्यः॥ तस्मिन्परभूत इति। समासान्तप्रकरणात्तत्र परतोऽयमादेशो विज्ञायते, न तदपवादः। स च टजेव विहित इति सामर्थ्यादयमर्थो लभ्यते, व्याख्यानाच्चाह्नादेशः। स्वयं समासान्तो न विज्ञायते 'ऊधसोऽनङ्' इत्यादिवत्। *सामर्थ्याच्चेत्यादि।* सामर्थ्यमेव दर्शयति। *न हीति।* एकशेषविधानाद् द्वन्द्वस्तावन्न सम्भवति, तेनैव तस्यासम्बन्धान्न षष्ठीसमासः, नापि विशेषणसमासः, न हि तदेव तस्य विशेषणं सम्भवति। एतेन बहुव्रीहिर्व्याख्यातः। *द्व्यह्न इति।* तद्धितार्थे समासः, 'तत्र भवः' इत्यण्, तस्य 'द्विगोर्लुगनपत्ये' इति लुक्। *सर्वाह्ण इति।* 'अह्नोऽदन्तात्' इति णत्वम्।

अह्नोऽह्नवचनानर्थक्यम्, अह्नष्टखोर्नियमवचनात्, 'अह्न एतेभ्यः' इत्येतावदेव सूत्रं कर्त्तव्यम्, अजनुवर्त्तते, एतेभ्यः परो योऽहन्शब्दस्ततोऽज्भवति, टचोऽपवादः, तत्राचि कृतेऽह्नष्टखोरेवेति नियमाट्टिलोपाभावेऽल्लोपे सति द्व्यह्न इत्यादि सिध्यति, 'रात्राह्नाहाः पुंसि' इति वचनात् स्त्रियां प्रवृत्त्यभावाट्टजचोरविशेषः। 'एतेभ्यः' इति वचनं संख्याव्ययार्थम्; इतरथा चानुकृष्टत्वान्न सम्बध्येत॥

न्यासः

अह्नोऽह्न एतेभ्यः॥ 'राजाहः सखिभ्यष्टच' इति टच्प्रत्ययं वक्ष्यतीति। अथ प्रकृत एवाचि कस्मादादेशो न विज्ञायते? अशक्यस्तत्रायं विज्ञातुम्, न ह्यहःशब्दान्तात् तत्पुरुषात् केनचिदज्विहितः, तत् कथमादेशस्य निमित्तं स्यात्! अथ 'अच' इति योगविभागेनाज्विधीयते? एवमप्येतद् वचनमनर्थकं स्यात्; अचि कृते 'अल्लोपोऽनः' इत्यनेनाह्नादेशस्य सिद्धत्वात्। न च टिलोपः प्राप्नोतीति मन्तव्यम्; 'अह्नष्टखोरेव' इति नियमात्। तस्मादच्येव टिलोपापवादोऽयम्। आदेशोऽयमयुक्तः। किं पुनस्तत् सामर्थ्यम्, यतोऽहःशब्दः पूर्वत्वेन नाश्रीयते? इत्याह—**न ह्यहःशब्दादित्यादि। द्व्यह्न इति।** द्वयोरह्नोर्भव इति 'तद्धितार्थ' इत्यादिना समासः, 'तत्र भवः' इत्यण्, तस्य 'द्विगोर्लुगनपत्ये' इति लुक। **अत्यह्न इति।** अत्यध्ववत्समासः। **निरह्न इति।** अत्रापि निरध्ववत् समासः। **सर्वाह्ण इति।** विशेषणसमासः।

प्रतिषेधं वक्ष्यतीति। 'उत्तमैकाभ्याञ्च' इति॥

Indira Gandhi National Centre for the Arts

न संख्यादेः समाहारे ॥ ८९ ॥

संख्यादेस्तत्पुरुषस्य समाहारे वर्त्तमानस्याहःशब्दस्याह्नादेशो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । द्वे अहनी समाहृते द्व्यहः । त्र्यहः ।

समाहार इति किम् ? द्वयोरह्नोर्भवो द्व्यह्नः । त्र्यह्नः । 'तद्धितार्थ' इति समासे कृतेऽण आगतस्य 'द्विगोः' इति लुक् ॥

उत्तमैकाभ्यां च ॥ ९० ॥

उत्तमैकशब्दाभ्यां च परस्याह्न इत्ययमादेशो न भवति । उत्तमशब्दोऽन्त्यवचनः पुण्यशब्दमाचष्टे; पुण्यग्रहणमेव न कृतं वैचित्र्यार्थम् । पुण्याहः । एकाहः ।

केचित्तु उपोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति । तेन संख्यातशब्दादपि परस्य न भवति—संख्याताह इति ॥

पदमञ्जरी

न सङ्ख्यादेः समाहारे ॥ 'सङ्ख्यादेः' इति न वक्तव्यम्; अन्यस्य समाहारे वृत्त्यसम्भवात् ॥

उत्तमैकाभ्यां च ॥ केचित्त्वित्यादि । यथा 'प्रथमयोः' इति प्रथमाद्वितीययोर्ग्रहणं द्विवचननिर्देशात्, तथैवात्राप्युत्तमग्रहणसामर्थ्यादुपोत्तमोत्तमयोर्द्वयोरपि ग्रहणमिति तेषामभिप्रायः । अत्र पक्षे उत्तमौ द्वावेकश्चापर इति बहुवचनप्रसङ्गात् सौत्रो द्विवचननिर्देशः । एकशब्दस्यापूर्वनिपातः 'अल्पाच्तरम्' इत्यस्यानित्यत्वज्ञापनार्थः ॥

न्यासः

न संख्यादेः समाहारे ॥ द्व्यह इति । 'अह्नष्टखोरेव' इति टिलोपः ॥

उत्तमैकाभ्याञ्च ॥ पुण्याहमिति । 'विशेषणम्' इत्यादिना समासः । **एकाह इति ।** अत्रापि 'पूर्वकालैक' इत्यादिना । कथं पुनः 'उत्तमैकाभ्याम्' इत्युच्यमाने पुण्यशब्दात् प्रतिषेधो लभ्यते ? इत्यत आह—**उत्तमशब्दोऽन्त्यवचन इत्यादि ।** 'अहःसर्वैकदेश' इत्यादौ सूत्रे पुण्यशब्दस्यान्ते निर्दिष्टत्वात् । **अन्त्य इति ।** उत्तमशब्देऽपि प्रतिषेधार्थ इहान्त्यवचन उपात्तः । तस्मात् पुण्यशब्दमाचष्टे । अथ पुण्यग्रहणमेव कस्मान्न कृतम्, लघु ह्येवं सूत्रं भवति ? इत्याह—**पुण्यग्रहणमेवेत्यादि ।** वैचित्र्यं हि सूत्रकृतेरिष्यते, तच्चोत्तमग्रहणे सति सम्पद्यते । यस्माद् वैचित्र्यार्थमुत्तमग्रहणं कृतम्, न पुण्यग्रहणम् ।

केचिदित्यादि । पुण्यग्रहणे कर्त्तव्ये यदुत्तमग्रहणं कृतं तत् प्रयोजनम्—उत्तमशब्दस्यापि संख्यातस्य प्रतिषेधप्रतिपत्तिर्यथा स्यादित्येवं केचिद्वर्णयन्ति । भवति तत्सामीप्यात् ताच्छब्द्यम्—गङ्गायां घोष इत्यादि । तस्माच्छक्त उत्तमशब्दः सामीप्यादुपोत्तमशब्दमभिधातुमिति तेषामभिप्रायः । **तेनेत्यादिना** प्रतिषेधस्योपोत्तमशब्दप्रतिपत्तेः फलं दर्शयति ॥

Indira Gandhi National Centre for the Arts

राजाहस्सखिभ्यष्टच् ॥ ९१ ॥

राजन्, अहन्, सखि–इत्येवमन्तात्प्रातिपदिकात् टच् प्रत्ययो भवति। महाराजः। मद्रराजः। परमाहः। उत्तमाहः। राज्ञः सखा राजसखः। ब्राह्मणसखः।

इह कस्मान्न भवति–मद्राणां राज्ञी मद्रराज्ञी, लिङ्गविशिष्ट-परिभाषया प्राप्नोति ? लघ्वक्षरस्य पूर्वनिपाते प्राप्ते राजन्-शब्दस्य सवर्णदीर्घार्थं प्रथमं प्रयोगं कुर्वन्नेतद् ज्ञापयति–यस्याकारेण सवर्ण-दीर्घत्वं सम्भवति तस्येदं ग्रहणमिति ॥

गोरतद्धितलुकि ॥ ९२ ॥

गोशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति स चेत्तत्पुरुषस्तद्धित-लुग्विषयो न भवति। परमगवः। उत्तमगवः। पञ्चगवम्। दशगवम्।

अतद्धितलुकीति किम् ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः। दशगुः। 'तेन क्रीतम्' इत्यागतस्यार्हीयस्य ठकः 'अध्यर्द्धपूर्वद्विगोः' इति लुक्।

पदमञ्जरी

राजाहस्सखिभ्यष्टच् ॥ *इह कस्मादिति* । किं च स्याद्यत्र टच् स्यात् ? 'भस्याढे तद्धिते' इति पुंवद्भावेन ङीपि निवृत्ते टचि टिलोपे सति टित्त्वान्ङीपि मद्रराजीति स्यात्, मद्रराज्ञीति चेष्यते। तस्मादत्र टचोऽनुत्पत्तिर्वक्तव्येति भावः। टचश्चित्करणमन्तोदात्तार्थम्; अन्यथा प्रत्ययस्य समासैकदेशत्वाद्विधुरः, प्रधुर इत्यादाविव प्रत्ययस्वरोऽव्ययपूर्वपदप्रकृतिस्वरेण बाध्येत ॥

गोरतद्धितलुकि ॥ *पञ्चगवमिति* । समाहारे द्विगुः, पञ्चगुरित्यत्र तद्धितार्थे।

न्यासः

राजाहःसखिभ्यष्टच् ॥ **परमाहः**, उत्तमाह इति। 'सन्महत्' इत्यादिना कर्मधारयः। **मद्रराज इति** षष्ठीतत्पुरुषः। कथं पुना राजशब्दग्रहणे राज्ञीशब्दस्य प्राप्नोति ? इत्यत आह—**लिङ्गविशिष्टपरिभाषयेत्यादि**। 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति' इत्येषा लिङ्गविशिष्टपरिभाषा। **लघ्वक्षरस्येति**। सवर्णदीर्घोऽर्थः प्रयोजनं यस्य प्रथम-प्रयोगस्य स तथोक्तः। अत्र लघ्वक्षरं पूर्वं निपततीति सख्युरह्नो वा पूर्वनिपाते प्राप्ते योऽहःशब्दस्य परनिपातः स राजशब्दस्य सवर्णदीर्घार्थः। प्रयोगस्तु कचिन्नैतज् ज्ञापयति—अकारवत एव राजशब्दाट्टज् भवति, ईकारान्तान्न; ईकारस्याकारेण सवर्णदीर्घान्तस्यासम्भवात् ॥

गोरतद्धितलुकि ॥ **पञ्चगवमिति**। 'तद्धितार्थ' इति समाहारे द्विगुः। **पञ्चगुरित्य-**त्रापि तद्धितार्थे। **राजगवमिति**। षष्ठीसमासः। 'सुपो धातुप्रातिपदिकयोः' इति सुपो

तद्धितग्रहणं किम् ? सुब्लुकि प्रतिषेधो मा भूत्—राजगवमिच्छति राजगवीयति। लुग्ग्रहणं किम् ? तद्धित एव मा भूत्—पञ्चभ्यो गोभ्य आगतं पञ्चगवरूप्यम्, पञ्चगवमयम्। दशगवरूप्यम्, दशगवमयम् ॥

अग्राख्यायामुरसः ॥ ९३ ॥

उरःशब्दान्तात्तत्पुरुषाट्टच् प्रत्ययो भवति, स चेदुरःशब्दोऽग्राख्यायां भवति। अग्रम्=प्रधानमुच्यते। यथा शरीरावयवानामुच्यते उरः प्रधानम्, एवमन्योऽपि प्रधानभूत उरश्शब्देनोच्यते। अश्वानामुरः अश्वोरसम्। हस्त्युरसम्। रथोरसम्।

अग्राख्यायामिति किम् ? देवदत्तस्योरः देवदत्तोरः ॥

अनोऽश्मायस्सरसां जातिसंज्ञयोः ॥ ९४ ॥

अनस्, अश्मन्, अयस्, सरस्—इत्येवमन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति जातौ संज्ञायां च विषये। उपानसमिति जातिः। महानसमिति संज्ञा। अमृताश्म इति जातिः। पिण्डाश्म इति संज्ञा।

पदमञ्जरी

पञ्चगवरूप्यम्, पञ्चगवमयमिति। यथात्र 'द्विगोर्लुगनपत्ये' इति रूप्यमयटोर्लुग्न भवति तथा तत्रैवोक्तम् ॥

अग्राख्यायामुरसः ॥ 'अग्राख्यायाम्' इति पञ्चम्यर्थे सप्तमी, पञ्चम्यन्तेनोरःशब्देन सामानाधिकरण्यात्। सामानाधिकरण्यं तु 'स चेदुरःशब्दः' इत्यादिना दर्शितम् ॥

न्यासः

लुक्। राजगवीयतीति। 'सुप आत्मनः क्यच्', सुब्लुक्, 'क्यचि च' इतीत्त्वम्। अस्त्यत्र लुक्, स तु सुपः; न तद्धितस्य। परव्यत्ययेनात्र पञ्चम्यर्थे सप्तमी। कुत एतत्? पञ्चम्यन्तेन गोशब्देन सामानाधिकरण्यात् ॥

अग्राख्यायामुरसः ॥ स चेदुरःशब्दोऽग्रस्याख्या भवतीत्यनेन दर्शितम्। **अश्वोरसमिति** षष्ठी समासः। अश्वानां प्रधानमित्यर्थः। हस्त्युरसम्। रथोरसमिति ॥

अनोऽश्मायःसरसां जातिसंज्ञयोः ॥ **उपानसमिति**। उपगतमन इति प्रादिसमासः। **महानसमिति**। महदन इति 'सन्महत्' इत्यादिना कर्मधारयसमासः। **अमृताश्मः**,

Indira Gandhi National Centre for the Arts

कालायसमिति जातिः । लोहितायसमिति संज्ञा । मण्डूकसरसमिति जातिः । जलसरसमिति संज्ञा ।

'जातिसंज्ञयोः' इति किम् ? सदनः । सदश्मा । सत्सरः ॥

ग्रामकौटाभ्यां च तक्ष्णः ॥ ९५ ॥

'जातिसंज्ञयोः' इति नानुवर्त्तते । ग्रामकौटाभ्यां परो यस्तक्षन्-शब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । ग्रामस्य तक्षा ग्रामतक्षः । बहूनां साधारण इत्यर्थः । कुट्यां भवः कौटः, तस्य तक्षा कौटतक्षः । स्वतन्त्रः कर्मजीवी, न कस्यचित्प्रतिबद्ध इत्यर्थः ।

ग्रामकौटाभ्यामिति किम् ? राज्ञस्तक्षा राजतक्षा ॥

अतेः शुनः ॥ ९६ ॥

अतिशब्दात्परो यः श्वन्-शब्दः तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । अतिक्रान्तः श्वानमतिश्वो वराहः । जववानित्यर्थः । अतिश्वः सेवकः । सुष्ठु स्वामिभक्त इत्यर्थः । अतिश्वी सेवा । अतिनीचेत्यर्थः ॥

उपमानादप्राणिषु ॥ ९७ ॥

उपमानवाची यः श्वन्-शब्दोऽप्राणिषु वर्त्तते तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति । आकर्षः श्वेव आकर्षश्वः । फलकश्वः । 'उपमितं व्याघ्रादिभिः' इति समासः ।

पदमञ्जरी

अतेः शुनः ॥ जवन इत्यर्थ इत्यादि । विषयविशेषादियमर्थव्यवस्था श्वशब्दस्य ॥

न्यासः

पिण्डाश्म इति विशेषणसमासौ । एवं **कालायसम्, लोहितायसमिति । मण्डूकसरसम्, जलसरसमिति** । षष्ठीसमासौ ।

सदन इति । महानसवत् समासः ॥

ग्रामकौटाभ्याञ्च तक्ष्णः ॥ बहूनां साधारण इत्यर्थ इति । ग्रामशब्दस्य जनपद-समुदाये वृत्तेः । **कौटतक्षेति** । पूर्ववत् समासः ॥

अतेः शुनः ॥ अतिश्व इति । प्रादिसमासः ॥

उपमानादप्राणिषु ॥ आकर्षश्व इति । अत्र श्वा उपमानम् ।

Indira Gandhi National Centre for the Arts

उपमानादिति किम्? न श्वा अश्वा लोष्टः। अप्राणिष्विति किम्? वानरः श्वेव वानरश्वा ॥

उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ९८ ॥

उत्तर, मृग, पूर्व—इत्येतेभ्यः परो यः सक्थिशब्दश्चकारादुपमानं च, तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति समासान्तः। उत्तरसक्थम्। मृगसक्थम्। पूर्वसक्थम्। उपमानात्खल्वपि—फलकमिव सक्थि फलकसक्थम् ॥

नावो द्विगोः ॥ ९९ ॥

नौशब्दान्ताद् द्विगोष्टच्प्रत्ययो भवति समासान्तः। द्वे नावौ समाहृते द्विनावम्। त्रिनावम्। द्विनावधनः। पञ्चनावप्रियः। द्वाभ्यां नौभ्यामागतं द्विनावरूप्यम्। द्विनावमयम्।

द्विगोरिति किम्? राजनौः।

अतद्धितलुकीत्येव—पञ्चभिर्नौभिः क्रीतः पञ्चनौः। दशनौः ॥

अर्धाच्च ॥ १०० ॥

पदमञ्जरी

उपमानादप्राणिषु ॥ *अश्वा लोष्ट इति* । अत्र **'नञस्तत्पुरुषात्' इति प्रतिषेधेन भाव्यम्, तस्मान्निःश्वा लोष्ट इति प्रत्युदाहर्त्तव्यम्** ॥

न्यासः

अश्वा लोष्ट इति। अत्राश्वशब्दोऽप्राणिनि लोष्टे वर्त्तते, न तूपमानम्। **वानरश्वेति**। 'उपमितं व्याघ्रादिभिः' इति समासः। अत्र प्राणिनि वानरश्वेति शब्दो वर्त्तते ॥

उत्तरमृगपूर्वाच्च सक्थ्नः ॥ **उत्तरसक्थमिति**। उत्तरं सक्थ्न इति पूर्वापरादिसूत्रेण समासः। अथ वा—उत्तरं सक्थीति विशेषणसमासः। **मृगसक्थमिति** षष्ठीसमासः। **पूर्वसक्थमिति**। उत्तरसक्थमित्यनेन तुल्यमेतत्। **फलकसक्थमिति**। 'विशेषणम्' इत्यादिना समासः ॥

नावो द्विगुः ॥ **द्विनावम्। त्रिनावमिति**। 'तद्धितार्थोत्तरपद' इत्यादिना द्विगुः। **द्विनावधन इति**। द्वे नावौ धनं यस्येति बहुव्रीहौ कृते पूर्वयोः पदयोस्तेनैव सूत्रेणोत्तरपदे द्विगुः। **पञ्चनावप्रियमिति**। पूर्वेण तुल्यमेतत्। **द्विनावरूप्यम्, द्विनावमयमिति**। तेनैव सूत्रेण तद्धितार्थे द्विगुः। पूर्ववद्रूप्यमयटौ।

राजनौरिति। षष्ठीसमासः। **पञ्चनौरिति**। आर्हीयस्य ठकः 'अध्यर्धपूर्व' इत्यादिना लुक् ॥

Indira Gandhi National Centre for the Arts

अर्द्धशब्दात्परो यो नौशब्दस्तदन्तात्तत्पुरुषाट्टच्प्रत्ययो भवति। अर्द्धं नावः अर्द्धनावम्। 'अर्द्धं नपुंसकम्' इति समासः। परवल्लिङ्गं न भवति; लोकाश्रयत्वाल्लिङ्गस्य॥

खार्याः प्राचाम् ॥ १०१ ॥

'द्विगोः', 'अर्द्धाच्च' इति द्वयमप्यनुवर्त्तते। खारीशब्दान्ताद् द्विगोरर्द्धाच्च परो यः खारीशब्दस्तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवति प्राचामाचार्याणां मतेन। द्वे खार्यौ समाहृते द्विखारम्, द्विखारि। त्रिखारम्, त्रिखारि। अर्द्धं खार्या अर्द्धखारम्, अर्द्धखारी॥

द्वित्रिभ्यामञ्जलेः ॥ १०२ ॥

द्वित्रिभ्यां परो योऽञ्जलिशब्दः तदन्तात्पुरुषाट्टच्प्रत्ययो भवति। द्वावञ्जली समाहृतौ द्व्यञ्जलम्। त्र्यञ्जलम्।

द्विगोरित्येव—द्वयोरञ्जलिः द्व्यञ्जलिः।

अतद्धितलुकीत्येव—द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः। त्र्यञ्जलिः। प्राचामित्येव—द्व्यञ्जलिप्रियः॥

पदमञ्जरी

खार्याः प्राचाम् ॥ द्विखारीति । टजभावपक्षे नपुंसकह्रस्वत्वम्।

अयं योगः शक्योऽवक्तुम्। कथं द्विखारम्, त्रिखारमिति? खारीशब्देन समानार्थः खारशब्दोऽस्ति, यथा च 'तदस्य परिमाणम्', 'संख्यायाः संज्ञा' इत्यत्र 'अन्येभ्योऽपि दृश्यते खारशताद्यर्थम्' इति वार्तिकम्॥

द्वित्रिभ्यामञ्जलेः ॥ द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिरिति । अञ्जलिपरिमितो व्रीह्यादिरञ्जलिः; न पाणिद्वयम्, तस्य मूल्यत्वासम्भवात्। ततश्च परिमाणत्वात्प्राग्वतीयस्य ठकः 'अध्यर्द्धपूर्व' इति लुक्। *द्व्यञ्जलिप्रिय इति* । व्यवस्थितविभाषात्वादुत्तरपदद्विगोर्न भवतीत्याहुः॥

न्यासः

अर्धाच्च ॥ अर्धनावमिति । ननु च 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति स्त्रीलिङ्गेनात्र भवितव्यमिति? अत आह—**परवल्लिङ्गं न भवतीत्यादि** ॥

खार्याः प्राचाम् ॥ द्विखारीति । त्रिखारीति । पूर्वपदुपसर्जनह्रस्वः। क्वचिदर्धखारीति पाठः। अत्रैचोरुपसर्जनह्रस्वत्वे कृते 'सर्वतोऽक्तिन्नर्थादित्येके' इति बह्वादिपाठान् ङीष्॥

द्वित्रिभ्यामञ्जलेः ॥ द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिरिति । पूर्ववदार्हीयस्य लुक्। **द्व्यञ्जलिप्रिय इति** । पूर्ववदुत्तरपदे द्विगुः॥

Indira Gandhi National Centre for the Arts

अनसन्तान्नपुंसकाच्छन्दसि ॥ १०३ ॥

अन्नन्ताद्, असन्ताच्च नपुंसकलिङ्गात्तत्पुरुषाट्टच् प्रत्ययो भवति छन्दसि विषये। हस्तिचर्मे जुहोति। ऋषभचर्मेऽभिषिञ्चति। असन्तात्—देवच्छन्दसानि। मनुष्यच्छन्दसानि।

अनसन्तादिति किम् ? बिल्वदारु जुहोति। नपुंसकादिति किम् ? सुत्रामाणं पृथिवीं द्यामनेहसम्।

* अनसन्तान्नपुंसकाच्छन्दसि वावचनम् *। ब्रह्मसाम। देवच्छन्दः। ब्रह्मसामम्। देवच्छन्दसम्॥

ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥

ब्रह्मन्-शब्दान्तात्तत्पुरुषाट्टच्प्रत्ययो भवति समासेन चेद्ब्रह्मणो जानपदत्वमाख्यायते। जनपदेषु भवो जानपदः। यस्य तत्पुरुषस्य

पदमञ्जरी

अनसन्तान्नपुंसकाच्छसि ॥ *सुत्रामाणमिति*। सुष्ठु त्रायते इति 'आतो मनिन्', उपपदसमासः। *अनेहसमिति*। 'नञ्याहन एह च' इत्याङ्पूर्वाद्धन्तेरसिप्रत्ययः, धातूपसर्गयोश्चेहादेशः, नञ उपपदसमासः, द्वितीयैकवचनम्।

अन्तग्रहणं विस्पष्टार्थम्॥

ब्रह्मणो जानपदाख्यायाम् ॥ अन्तरेणापि भावप्रत्ययं जानपदशब्दो भावप्रधानः, 'द्व्येकयोः' इतिवदित्याह–*समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायते इति*। यद्यप्येकं ब्रह्मग्रहणम्, तेन च समासो विशेषितः, तथापि प्रत्यासत्तेर्ब्रह्मण एव

न्यासः

अनसन्तान्नपुंसकाच्छन्दसि ॥ हस्तिचर्म इत्यादयः षष्ठीसमासाः।

सुत्रामाणमिति। शोभनस्त्रामा इति प्रादिसमासः, 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घः, द्वितीयैकवचनम्, 'सर्वनामस्थाने च' इत्यादिनोपधादीर्घत्वम्, 'अट्कुप्वाङ्' इत्यादिना णत्वम्। **अनेहसमिति**। अनेहःशब्दात् पुंल्लिङ्गात् षष्ठीबहुवचनम्। वावचनमित्यनुवर्त्तत इति शेषः। वावचनशब्देनेह प्राग्ग्रहणं विवक्षितम्, तेन विकल्प्य उच्यन्ते, प्रत्याय्यते प्रत्ययोऽनेनेति कृत्वा। तदेतदुक्तं भवति—"'खार्याः प्राचाम्' इत्यतः प्राग्ग्रहणमनुवर्त्तते" इति।

प्राग्ग्रहणानुवृत्तौ तु यदिष्टं सिध्यति, तद्दर्शयति—**ब्रह्मसाम इति**। **देवच्छन्द इति**। उभयत्र षष्ठीसमासः॥

ब्रह्मणो जानपदाख्यायाम् ॥ **जानपदाख्यायामिति**। भावप्रधानोऽत्र जानपदशब्दः। अत एव वृत्तावाह—**समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायत इति**। भवति हि

जनपदशब्दः पूर्वपदं तस्मादेतत्प्रत्ययविधानम् । सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः । अवन्तिब्रह्मः[1] । योगविभागात्सप्तमीसमासः ।

जानपदाख्यायामिति किम् ? देवब्रह्मा नारदः ॥

कुमहद्भ्यामन्यतरस्याम् ॥ १०५ ॥

कुमहद्भ्यां परो यो ब्रह्मा तदन्तात्तत्पुरुषाट्टच् प्रत्ययो भवत्यन्यतरस्याम् । कुब्रह्मः, कुब्रह्मा । महाब्रह्मः, महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन्शब्दः ॥

द्वन्द्वाच्चुदषहान्तात्समहारे ॥ १०६ ॥

तत्पुरुषाधिकारो निवृत्तः । द्वन्द्वाच्चवर्गान्ताद्, दकारान्तात्, षकारान्तात्, हकारान्ताच्च टच् प्रत्ययो भवति, स चेद् द्वन्द्वः समाहारे वर्त्तते, नेतरेतरयोगे । वाक्च त्वक्च वाक्त्वचम् । स्रक्च त्वक्च स्रक्त्वचम् । श्रीस्रजम् । इडूर्जम् । वागूर्जम् । समिद्दृषदम् । सम्पद्विपदम् । वाग्विप्रुषम् । छत्त्रोपानहम् । धेनुगोदुहम् ।

पदमञ्जरी

जानपदत्वं विशेषणं विज्ञायते, तस्मादेतत्प्रत्ययविधानमिति । तत एव हि प्रत्ययविधाने ब्रह्मणो जानपदत्वं शक्यमाख्यातुम् ।

देवब्रह्मेति । षष्ठीसमासः, कर्मधारयो वा ॥

द्वन्द्वाच्चुदषहान्तात्समाहारे ॥ तत्पुरुषान्मा भूदिति । तत्पुरुषादेव मा भूदित्यर्थः । 'द्वन्द्वात्' इत्यनुच्यमाने हि तत्पुरुषाधिकारो न निवर्त्तेत ॥

न्यासः

भावप्रत्ययमन्तरेणापि भावप्रधानो निर्देशः, यथा–'द्व्येकयोर्द्विवचनैकवचने' इति । कथं पुनर्ब्रह्मणो जानपदत्वं शक्यं विशेषयितुम्, यावतैकमिह ब्रह्मग्रहणम्, तेन च समासो विशेषितः ? नैतदस्ति; तन्त्रेण द्वौ ब्रह्मशब्दावुच्चारितौ—तत्रैकेन समासो विशेष्यते, अपरेण जानपदत्वम्, यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदम् । पूर्ववत् समासः ॥

कुमहद्भ्यामन्यतरस्याम् ॥ द्वन्द्वाच्चुदषहान्तात् समाहारे ॥ वाक् च त्वक् च **वाक्त्वचम्** । स्रुक् च त्वक् च **स्रुक्त्वचम्** । श्रीश्च स्रक् च **श्रीस्रजम्** । वाक् च ऊर्क् **वागूर्जम्** । समिच्च दृषच्च **समिद्दृषदम्** । सम्पच्च विपच्च **सम्पद्विपदम्** । वाक् च त्विट् च **वाक्त्विषम्** । वाक् च विप्रुट् च **वाग्विप्रुषम्** । छत्रञ्च उपानच्च **छत्त्रोपानहम्** । धेनुश्च गोधुक् च **धेनुगोदुहम्** ।

---

1. 'काशीब्रह्मः'—इत्यधिकमन्यपुस्तके ।

Indira Gandhi National Centre for the Arts

द्वन्द्वादिति किम् ? तत्पुरुषान्मा भूत्—पञ्च वाचः समाहृताः पञ्चवाक् । चुदषहान्तादिति किम् ? वाक्समित् । समाहार इति किम् ? प्रावृट्शरदौ ॥

अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥

'शरद्' इत्येवमादिभ्यः प्रातिपदिकेभ्यष्टच् प्रत्ययो भवत्यव्ययीभावे । शरदः समीपम् उपशरदम् । प्रतिशरदम् । उपविपाशम् । प्रतिविपाशम् ।

अव्ययीभाव इति किम् ? परमशरत् ।

येऽत्र झयन्ताः पठ्यन्ते, तेषां नित्यार्थं ग्रहणम् । स्वर्यते चेदमव्ययीभावग्रहणं प्राग्बहुव्रीहेः ।

शरत् । विपाश् । अनस् । मनस् । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । चतुर् । यद् । तद् । ॐ जराया जरश्च ॐ । सदृश् । ॐ प्रतिपरसमनुभ्योऽक्ष्णः ॐ । पथिन् । प्रत्यक्षम् । परो-

पदमञ्जरी

अव्ययीभावे शरत्प्रभृतिभ्यः ॥ जराया जरस् चेति । जराशब्दादच् प्रत्ययो भवति, अव्ययीभावे जरसादेशश्च—उपजरसम् । *प्रतिपरसमनुभ्योऽक्ष्ण इति ।* प्रादिभ्यः परो योऽक्षिशब्दस्ततष्टज्भवति, तत्र परशब्दस्याव्ययीभावासम्भवात्तत्पुरुषाथ ग्रहणम् । *प्रत्यक्षमिति ।* 'यथार्थे यदव्ययम्' इति वीप्सायामव्ययीभावः, परक्ष्मणः परोक्षम्, 'परोक्षे लिट्' इति निर्देशात्पञ्चमीसमासः, उपसर्जनस्य च

न्यासः

पञ्चवागिति । समाहारे द्विगुः । **वाक्समिदिति ।** धकारान्तोऽयम् । धकारस्य 'झलां जशोऽन्ते' इति जश्त्वम्—दकारः, 'वावसाने' इति चर्त्वम्—तकारः ॥

अव्ययीभावे शरत्प्रभृतिभ्यः ॥ उपशरदमिति सामीप्येऽव्ययीभावः । शरद आभिमुख्ये **प्रतिशरदम् ।** 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । **उपविपाशम् । प्रतिविपाशमिति ।** पूर्ववत् ।

अत्र ये झयन्ताः पठ्यन्ते तेषां किमर्थं ग्रहणम्, यावता 'झयः' इति वक्ष्यमाणेन तदन्तात् प्रत्ययः सिध्यति ? इत्यत आह—**ये त्वत्रेत्यादि ।** यद्यत्र ते न गृह्येरंस्ततः 'झयः' इति विकल्पेन टच्प्रसज्येत । तस्मान्नित्यं यथा स्यादिति—एवमर्थं झयन्तानां पृथग्ग्रहणम् ।

जराया जरश्चेति । जराशब्दाट्टज् भवत्यव्ययीभावे, जरसादेशश्च—जरायाः समीपमुपजरसमिति । **प्रतिपरसमनुभ्योऽक्ष्ण इति ।** अक्षिशब्दात् प्रति, पर, सम्,

Indira Gandhi National Centre for the Arts

क्षम् । समक्षम् । अन्वक्षम् । प्रतिपथम् । सम्पथम् । अनुपथम् । शरदादिः ॥

अनश्च ॥ १०८ ॥

अन्नन्तादव्ययीभावाट्टच् प्रत्ययो भवति समासान्तः । उपराजम् । प्रतिराजम् । अध्यात्मम् । प्रत्यात्मम् ॥

नपुंसकादन्यतरस्याम् ॥ १०९ ॥

'अनः' इत्येव । नपुंसकग्रहणमुत्तरपदविशेषणम् । अन्नन्तं यन्नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः । पूर्वेण नित्ये प्राप्ते विकल्प्यते । प्रतिचर्मम्, प्रतिचर्म । उपचर्मम्, उपचर्म ॥

नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥

नदी, पौर्णमासी, आग्रहायणी—इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति । नद्याः समीपम् उपनदम्, उपनदि । उपपौर्णमासम्, उपपौर्णमासि । उपाग्रहायणम्, उपाग्रहायणि ॥

पदमञ्जरी

परनिपातः, अक्ष्यकारस्य चोत्वम् । अक्षियोग्यम्=*समक्षम्*, यथार्थे योग्यतायामव्ययीभावः । *अन्वक्षमिति* **। पश्चादर्थेऽव्ययीभावः ॥**

नपुंसकादन्यतरस्याम् ॥ नपुंसकग्रहणमुत्तरपदविशेषणमिति **। नाव्ययीभावविशेषणम्; अव्यभिचारात् ॥**

नदीपौर्णमास्याग्रहायणीभ्यः **॥ 'नदी' इति स्वरूपग्रहणम्, न संज्ञायाः; पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात् ॥**

न्यासः

अनु—इत्येतेभ्यः परस्मात् टज् भवति—**प्रत्यक्षम्** । **परोक्षम्**—'परोक्षे लिट्' इति निपातनादुत्वम् । **समक्षम्** । **अन्वक्षम्** ॥

अनश्च ॥ उपराजम् , प्रतिराजमिति । उपशरदं प्रतिशरदमितिवदव्ययीभावः । **अध्यात्ममिति** । आत्मन्यधीति विभक्त्यर्थे । **प्रत्यात्ममिति** पूर्ववदाभिमुख्ये ।

नपुंसकादन्यतरस्याम् ॥ नदीपौर्णमास्याग्रहायणीभ्यः ॥ नदीग्रहणेन स्वरूपं गृह्यते, न संज्ञा । यदि संज्ञा गृह्येत, पौर्णमास्याग्रहायणीग्रहणं न कुर्यात् । ननु च नियमार्थमेतत् स्यात्—ईकारान्तस्यापि नद्योः पौर्णमास्याग्रहायण्योरेव भवतीति ? नैतदस्ति; यद्येतत् प्रयोजनं स्यात्, 'पौर्णमास्याग्रहायणी' इत्येवं ब्रूयात् । तस्मात् **स्वरूपग्रहणमिति । उपनदीति । 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः ॥**

Indira Gandhi National Centre for the Arts

झयः ॥ १११ ॥

'झयः' इति प्रत्याहारग्रहणम् । झयन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति । उपसमिधम्, उपसमित् । उपदृषदम्, उपदृषत् ॥

गिरेश्च सेनकस्य ॥ ११२ ॥

गिरिशब्दान्तादव्ययीभावाट्टच् प्रत्ययो भवति सेनकस्याचार्यस्य मतेन । अन्तर्गिरम्, अन्तर्गिरि । उपगिरम्, उपगिरि ।

सेनकग्रहणं पूजार्थम्, विकल्पोऽनुवर्तत एव ॥

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ॥ ११३ ॥

स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहेः षच् प्रत्ययो भवति समासान्तः । अयमर्थोऽभिप्रेतः । सूत्रे तु दुःश्लिष्टवि-

पदमञ्जरी

झयः ॥ झय इति प्रत्याहारग्रहणमिति । झकारयकारयोस्तु ग्रहणं न भवति; तदन्तस्याव्ययीभावस्यासम्भवात् । योगविभागश्चिन्त्यप्रयोजनः ॥

गिरेश्च सेनकस्य ॥ अन्तर्गिरमिति । विभक्त्यर्थेऽव्ययीभावः । *विकल्पोऽनुवर्त्तत एवेति* । अन्यथा केषाञ्चिज्झयन्तानां शरत्प्रभृतिषु पाठोऽनर्थकः स्यात्; 'झयः' इत्यनेनैव सिद्धत्वात् । एतेनैतन्न चोदनीयम्—'द्वयोर्विभाषयोर्मध्ये नित्या विधयः' इति पूर्वस्य विधेर्नित्यत्वार्थमिदं सेनकग्रहणं स्यादिति ॥

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥ स्वाङ्गमद्रवादिलक्षणं पारिभाषिकं गृह्यते । *दुःश्लिष्टविभक्तीनीति* । दुर्=निन्दायाम् । निन्दितं यथा तथा श्लिष्टाः

न्यासः

झयः ॥ गिरेश्च सेनकस्य ॥ अन्तर्गिरमिति । गिरेरन्तरिति विभक्त्यर्थेऽव्ययीभावः । अन्तःशब्दो हि सप्तम्यर्थवृत्तित्वाद् विभक्त्यर्थे वर्त्तते । विकल्पार्थमेव सेनकग्रहणं कस्मान्न भवति ? इत्याह–**विकल्पोऽनुवर्त्तत एवेति** । विकल्पार्थत्वात् ! विकल्प्यते वानेन सः । अन्यतरस्यांग्रहणं विकल्प इत्युक्तम्, तदिह 'नपुंसकादन्यतरस्याम्' इत्यतोऽनुवर्त्तते । तस्मात् तेनैव विकल्पस्य सिद्धत्वात् पूजार्थमेव सेनकग्रहणमुक्तम्, न विकल्पार्थम् । ननु च 'विभाषयोर्द्वयोर्मध्ये नित्या विधयो भवन्ति' इति पूर्वस्य विधेर्नित्यतां सम्पादयितुं विकल्पार्थमेव सेनकग्रहणं स्यात् ? नैतदस्ति; यदि हि पूर्वो विधिर्नित्यः स्यात्, झयन्तानां शरत्प्रभृतिषु पाठोऽनर्थकः स्यात्; 'झयः' इत्यनेनैव सिद्धत्वात् । तस्मान्न विकल्पार्थं सेनकग्रहणम्, पूजार्थमेव ॥

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥ 'अद्रवं मूर्त्तिमत्' इत्यादिना पारिभाषिकं यत् स्वाङ्गं तदिह गृह्यते । **दुःश्लिष्टविभक्तीनीति** । दुःखेन कष्टेन श्लिष्टाः सम्बद्धा

भक्तीनि पदानि । दीर्घं सक्थि यस्य दीर्घसक्थः । कल्याणाक्षः । लोहिताक्षः । विशालाक्षः ।

बहुव्रीहाविति किम् ? परमसक्थिः । परमाक्षिः । सक्थ्यक्ष्णोरिति किम् ? दीर्घजानुः । सुबाहुः । स्वाङ्गादिति किम् ? दीर्घसक्थि शकटम् । स्थूलाक्षिरिक्षुः ।

टचि प्रकृते षज्ग्रहणं स्वरार्थम्—चक्रसक्थी स्त्री, दीर्घसक्थी

पदमञ्जरी

सम्बद्धाः विभक्तयो येषु तानि तथोक्तानि, तथा हि—बहुव्रीहिशब्दात्पञ्चम्या भवितव्यम्, समासान्तसम्बन्धे षष्ठ्या वा, यथा–'तत्पुरुषस्याङ्गुलेः' इति; इह तु सप्तम्येकवचनं श्रुतम् । 'सक्थ्यक्ष्णोः' इति षष्ठीद्विवचनम्, सप्तमीद्विवचनं वा । न चैवम्भूतेनानेन बहुव्रीहिः शक्यो विशेषयितुम्; भिन्नविभक्तिवचनत्वात् । *स्वाङ्गादिति* पञ्चम्येकवचनम्, तच्च न सक्थ्यक्ष्णोः समानाधिकरणं विशेषणमवकल्पते, तच्चाभिप्रेतम् । तस्माद्विभक्तिव्यत्ययमाश्रित्य विभक्तयः सम्बन्धयितव्या इति 'दुःश्लिष्टविभक्तीनि' इत्युक्तम् ।

स्थूलाक्षिरिक्षुरिति । 'अक्ष्णोऽदर्शनात्' इत्यचात्र भवितव्यम् । यदि तु नेष्यते, समासान्तविधिरनित्य इति वक्तव्यम्; तत एव तर्हि षजपि न भविष्यति । तस्मात्स्थूलाक्षा, सूक्ष्माक्षा वेणुयष्टिरिति अजेव टापि प्रत्युदाहर्त्तव्य इत्याहुः । *दीर्घसक्थीति* । दीघ सक्थ्यस्याः सा दीर्घसक्थी, अत्र षचि सति ङीषुदात्तो भवति,

न्यासः

विभक्तयो येषु तानि दुःश्लिष्टविभक्तीनि । तथा च—प्रत्ययसम्बन्धेन षष्ठ्या भवितव्यम्, यथा 'तत्पुरुषस्याङ्गुलेः' इति सक्थ्यक्षिग्रहणेन चेह तदन्तया बहुव्रीहेर्विशेषयितुमिष्टत्वात् । बहुव्रीहौ यद् विभक्तिवचनं ततोऽपि तेनैव भवितुं युक्तम् । इह तु बहुव्रीहौ सप्तम्येकवचनम् । सक्थ्यक्षिशब्दाभ्यां तु षष्ठीद्विवचनम्, सप्तमीद्विवचनं वा । स्वाङ्गग्रहणं सक्थ्यक्ष्णोरिह समानाधिकरणं विशेषणम्, ततश्च सक्थ्यक्षिशब्दाभ्यां या विभक्तिस्तद्विभक्तिकं समानाधिकरणविशेषणमुपपद्यते । एवंविधविभक्तिभिः पदैः कश्चिद् दुःखेन कृच्छ्रेण युक्तो यामाश्रित्य विभक्तिमेवार्थं प्रतिपद्यते । तस्मात् तानि दुःश्लिष्टविभक्तीनि । किमर्थं पुनस्तानि पदानि कृतानि ? वैचित्र्यार्थम् ।

दीर्घसक्थि शकटम्, स्थूलाक्षिरिक्षुरिति । अत्र सक्थ्यक्षिशब्दौ स्वाङ्गं न भवतः । शकटस्य कश्चिदवयवस्तथेक्षोश्च तथाभिधीयते । न तु तत्र 'अद्रवं मूर्त्तिमत्' इत्यादिकं स्वाङ्गलक्षणमस्ति ।

ननु च टचापि प्रकृतेन सर्वमेतत् सिध्यति, तत् किमर्थं षजिति प्रत्यान्तरमुपात्तम् ? इत्याह–**टचि प्रकृत इत्यादि । दीर्घसक्थी स्त्री**—टचि ङीबनुदात्तः स्यात्,

स्त्री । 'सक्थं चाक्रान्तात्' इति विभाषयोत्तरपदस्यान्तोदात्तता विधीयते । तत्र यस्मिन्पक्षे नास्त्युदात्तत्वं तत्र ङीपि सत्युदात्तनिवृत्तिस्वरस्याभावादनुदात्तः श्रूयेत । ङीषि तु सर्वत्रोदात्तः सिद्धो भवति ।

बहुव्रीहिग्रहणमा पादपरिसमाप्तेरनुवर्तते ॥

अङ्गुलेर्दारुणि ॥ ११४ ॥

अङ्गुलिशब्दान्ताद्बहुव्रीहेः षच्प्रत्ययो भवति समासान्तो दारुणि समासार्थे । द्व्यङ्गुलं दारु । त्र्यङ्गुलं दारु । पञ्चाङ्गुलम् । अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते ।

पदमञ्जरी

टचि तु सति ङीबनुदात्तः स्यात् । ननु टचश्चित्करणमन्तोदात्तार्थम्, ततश्च ङीबप्युदात्तनिवृत्तिस्वरेणोदात्त एव भविष्यति ? तत्राह—*सक्थं चाक्रान्तादित्यादि । विभाषयेति ।* 'विभाषोत्पुच्छ' इत्यतोऽनुवृत्तेः षचश्चित्करणमक्ष्यर्थम् । सक्थ्यपि यदाक्रान्तात्परं तदा नित्यमन्तोदात्तं भवति—चक्रसक्थः, वक्रसक्थ इति । गौरसक्थादौ तु नार्थश्चित्करणेन ॥

अङ्गुलेर्दारुणि ॥ अङ्गुलिसदृशावयवमित्यादि । दारुणि समासार्थे मुख्याभिरङ्गुलीभिः सम्बन्धो नोपपद्यत इति भावः ।

ननु च द्वे अङ्गुली प्रमाणमस्य दारुण इत्यत्र सम्भवति ? तत्राह—*यस्त्वित्यादि ।* इह च बहुव्रीहेरयं प्रत्ययो विधीयते, त्वदुक्ते चोदाहरणे तद्धितार्थे

न्यासः

षचि तु सति 'षिद्गौरादिभ्यश्च' इति ङीषुदात्तः सिद्धो भवति । ननु च ङीप्यनुदात्त उदात्तनिवृत्तिस्वरेणोदात्त एव भवति । अतः स्वरार्थमपि नैव प्रत्ययान्तरमुपादेयम् ? इत्याह—सक्थञ्चाक्रान्तादिति । 'विभाषोत्पुच्छ' इत्यतो विभाषेत्यनुवर्त्तमाने 'सक्थञ्चाक्रान्तात्' इति विकल्पेनोत्तरपदस्यान्तोदात्तत्वं विधीयते । यस्मिन् पक्ष उदात्तं भवति, तत्र ङीपि परतः 'यस्येति च' इत्यकारस्योदात्तस्य लोपे कृते 'अनुदात्तस्य च यत्रोदात्तलोपः' इति ङीप्युदात्तत्वेन भवितव्यम्, अतो नास्ति ङीपि विरोधः । यस्मिन् पक्ष उदात्तं न सम्भवति तस्मिन् ङीपि सत्युदात्तनिवृत्तिस्वरो नास्ति, उदात्तश्चाश्रीयते । ङीषि तु सति सर्वत्रोदात्तः सिद्धो भवति; ङीष्प्रत्ययस्वरेणान्तोदात्तत्वात् ॥

अङ्गुलेर्दारुणि ॥ द्वे अङ्गुली यस्य तद् । दारुणि समासार्थे मुख्याभिरङ्गुलिभिः सम्बन्धस्तत्र नोपपद्यते । तस्मात् सामर्थ्याद् द्व्यङ्गुलीसदृशेषु दार्ववयवेष्वङ्गुलिशब्दो वर्त्तमानः समास आश्रीयत इति मत्वाऽऽह—**अङ्गुलिसदृशावयवमित्यादि ।**

ननु च द्वे अङ्गुली प्रमाणमस्य दारुण इत्यादौ मुख्याभिरङ्गुलिभिः सम्बन्धः, तत्र मुख्याङ्गुलिभिः सम्बन्ध इति मुख्ये सम्भवति, अतो गौणस्य ग्रहणमयुक्तम् ?

Indira Gandhi National Centre for the Arts

यस्य तु द्वे अङ्गुली प्रमाणं दारुणस्तत्र 'तद्धितार्थ' इति समासे कृते 'तत्पुरुषस्याङ्गुलेः' इत्यचा भवितव्यम् ।

दारुणीति किम् ? पञ्चाङ्गुलिर्हस्तः ॥

द्वित्रिभ्यां ष मूर्द्धनः ॥ ११५ ॥

द्वित्रिभ्यां परो यो मूर्द्धन्-शब्दस्तदन्ताद्बहुव्रीहेः षः प्रत्ययो भवति समासान्तः । द्विमूर्द्धः । त्रिमूर्द्धः ।

पदमञ्जरी

तत्पुरुषः कर्त्तव्यः, तत्र च 'तत्पुरुषस्याङ्गुलेः' इत्यचा भवितव्यम् । तस्माद्बहुव्रीहौ दारुणि वाच्ये गौण एवाङ्गुलिशब्द इति सुष्ठूक्तमित्यर्थः ॥

द्वित्रिभ्यां ष मूर्ध्नः ॥ अथ किमर्थं षः प्रत्ययान्तरं क्रियते, न प्रकृतः षजनुवर्त्तिष्यते ? द्विमूर्द्धः, त्रिमूर्द्ध इत्यत्र 'द्वित्रिभ्यां पाद्दन्मूर्द्धसु' इति पाक्षिकमन्तोदात्तत्वं यथा स्यात् । षचि तु सति चित्त्वान्नित्यमन्तोदात्तत्वं स्यात् । 'द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहौ' इत्यस्य तु समासान्तविधेरनित्यत्वात्तदभावे द्विमूर्द्धा, 'त्रिमूर्द्धानं सप्तरश्मिं गृणीषे' इति, सोऽवकाशः स्यात् । षे तु सति यदापि समासान्तः क्रियते, तदापि पक्षेऽन्तोदात्तत्वम्, पक्षे पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिति स्वरद्वयसिद्धिः । अनित्यत्वं च षविधानादेव विज्ञायते । नित्ये हि सति प्रकृते षच्यपि विहिते द्वित्रिभ्यामपि स्वरः प्राप्तविभाषारूपेण चित्स्वरं बाधिष्यते; विषयान्तराभावात् । अनित्यत्वे तु समासान्ताभावपक्षे सावकाशम्

न्यासः

इत्याह—**यस्य त्वित्यादि** । बहुव्रीहिग्रहणानुवृत्तेरिह बहुव्रीहेः प्रत्ययो विधीयते । द्वे अङ्गुली प्रमाणमस्येत्येकार्थविवक्षायां तद्धितार्थे तत्पुरुषः कर्त्तव्यः । तस्मिंस्तु कृते 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' इत्यचा भवितव्यमेत्र । यश्च गौणोऽङ्गुलिशब्दः स एव सामर्थ्यादेव योगस्य विषय इत्युक्तं भवति ॥

द्वित्रिभ्यां ष मूर्ध्नः ॥ अथ किमर्थं षः प्रत्ययान्तरं विधीयते, न प्रकृतः षजेव विधीयते ? विकल्पेनान्तोदात्तत्वं यथा स्यात् । 'विभाषोत्पुच्छ' इत्यतो विभाषेत्यनुवर्त्तमाने 'द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' इति नकारान्तस्य मूर्धन्शब्दस्य निर्देशाद् द्वित्रिभ्यामुत्तरो यत्र नकारान्तो मूर्धन्शब्दस्तत्र बहुव्रीहेरन्तोदात्तत्वं पाक्षिकं विधीयते; अन्यथाऽकारान्तमूर्धन्शब्द उत्तरपदोदात्तत्वं विधीयते, कृतसमासान्तमेव निर्दिशेत् । तत्र यदि षच्प्रत्ययो विधीयते, ततः पाक्षिकमन्तोदात्तत्वं बाधित्वा चित्करणसामर्थ्यान्नित्यमन्तोदात्तत्वं स्यात् । विभाषान्तोदात्तवचनस्य तु यत्र समासान्तो नास्ति सोऽवकाशः । अस्मिंस्तु प्रत्ययान्तरसमासान्ते कृते विकल्पेनान्तोदात्तत्वं सिध्यति । ननु च नकारान्तनिर्देशान् नकारान्त एव हि मूर्धन्शब्दः, उत्तरपदे विभाषान्तोदात्तेन

Indira Gandhi National Centre for the Arts

द्वित्रिभ्यामिति किम् ? उच्चैर्मूर्द्धा ॥

अप्पूरणीप्रमाण्योः ॥ ११६ ॥

पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते । 'प्रमाणी' इति स्वरूपग्रहम् । पूरण्यन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् प्रत्ययो भवति समासान्तः । कल्याणी पञ्चमी आसां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीदशमा रात्रयः । स्त्री प्रमाणी एषां स्त्रीप्रमाणाः कुटुम्बिनः । भार्याप्रधाना इत्यर्थः ।

❀ अपि प्रधानपूरणीग्रहणं कर्त्तव्यम् ❀ । यत्रान्यपदार्थे पूरण्यनुप्रविशति न केवलं वर्त्तिपदार्थ एव, तत्र पूरण्याः प्राधान्यम् । पुंव-

पदमञ्जरी

'द्वित्रिभ्याम्' इति स्वरं चित्स्वरो बाधेतेति प्रत्ययान्तरकरणमर्थवद्भवति । एवं च कृत्वा मूर्धस्विति नकारान्तनिर्देश उपपन्नो भवति; अन्यथा 'सक्थं चाक्रान्तात्' इतिवदकारान्तमेव निर्दिशेत् । यदि नकारान्तो निर्दिश्यते, कथं समासान्ते कृते भवति ? नैष दोषः; वक्ष्यति हि तत्र—'यदापि समासान्तः क्रियते तदा बहुव्रीहेः कार्यित्वात्तदेकदेशत्वाच्च समासान्तस्यान्तोदात्तत्वं भवत्येव' इति ॥

अप्पूरणीप्रमाण्योः ॥ *पूरणप्रत्ययान्त इति* । 'तस्य पूरणे डट्' इत्येवमादयः पूरणार्थे ये प्रत्यया विहितास्तदन्ता इत्यर्थः । *स्त्रीलिङ्गा इति* । 'पूरणी' इति ङीपा निर्देशात् । *पूरणीग्रहणेन गृह्यन्ते इति* । पूरणार्थसाहचर्यात् ।

अपि प्रधानपूरणीग्रहणमिति । अपि विधीयमाने प्रधानं या पूरणी सा गृह्यत इति वक्तव्यमित्यर्थः । क्व पुनः पूरण्याः प्राधान्यम् ? इत्यत आह—*यत्रेति* । न

न्यासः

भवितव्यम्, तत् कथं समासान्ताद् भवेत् ? नैष दोषः; वक्ष्यति—'यत्रापि समासान्तः क्रियते तत्रापि बहुव्रीहिकार्यत्वात् तदेकदेशत्वाच्च समासान्तोदात्तत्वं भवत्येव' इति । अथ किमर्थं बहुव्रीहौ द्वित्रिभ्यामुत्तरो मूर्धन्शब्दो नकारान्तः सम्भवति, यावता नित्यं समासान्तेन भवितव्यम्, न हि सूत्रे विभाषाग्रहणमस्ति ? नैष दोषः; स एव हि नकारान्तनिर्देशो ज्ञापयति—विकल्पेन समासान्तो न भवतीति ॥

अप् पूरणीप्रमाण्योः ॥ पूरणप्रत्ययान्त इति । 'तस्य पूरणे डट्' इत्येवमादिना प्रकरणेन ये पूरणार्थे विहितास्ते तत्साहचर्यात् पूरणशब्देनोच्यन्ते । पूरणप्रत्ययोऽन्ते येषां ते पूरणप्रत्ययान्ताः ।

अपि प्रधानपूरणीग्रहणमिति । अपि प्रत्यये विधातव्ये प्रधाना या पूरणी तस्या ग्रहणं कर्त्तव्यम्—तत एव प्रयोगो यथा स्यात्, अन्यतो मा भूत् । क्व पुनरस्याः प्राधान्यम् ? इत्यत आह—यत्रेत्यादि । यत्राभिधेयत्वेनान्यपदार्थेन पूरण्यनुप्रविशति न

Indira Gandhi National Centre for the Arts

न्द्भावप्रतिषेधेऽपि प्रधानपूरण्येव गृह्यते। इह न भवति—कल्याणी पञ्चमी अस्मिन्पक्षे कल्याणपञ्चमीकः पक्ष इति ॥

❀ नेतुर्नक्षत्र उपसंख्यानम् ❀। मृगो नेता आसां रात्रीणां मृगनेत्रा रात्रयः। पुष्यनेत्राः। नक्षत्र इति किम्? देवदत्तनेतृकाः ॥

❀ छन्दसि च नेतुरुपसंख्यानम् ❀। बृहस्पतिनेत्रा देवाः। सोमनेत्राः।

❀ मासाद् भृतिप्रत्ययपूर्वपदाट्ठज्विधिः ❀। पञ्चको मासोऽस्य

पदमञ्जरी

केवलं वर्त्तिपदार्थ एवेति। समासावयवभूतं पदं वर्त्तिपदम्, तस्यार्थो वर्त्तिपदार्थः। प्रथमान्तं चैतत्, न सप्तम्यन्तम्। पूरणीत्येतदनुषज्यते, न पुनरनुप्रविशतीति। तत्रोदाहरणे उद्भूतावयवभेदस्य समुदायस्य कृतैकशेषेण रात्रिशब्देनाभिधानाद्रात्रिषु पञ्चम्या अन्तर्भावः। *कल्याणपञ्चमीकः पक्ष इति*। 'नद्यृतश्च' इति कप्। अत्र वर्तिपदार्थ एव पूरणी, न त्वन्यपदार्थः; तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थत्वात्। यथा—वृक्षशब्दस्यावयव्यभिधेयः, न तु शाखादयोऽवयवाः; अनुमीयमानस्याशब्दार्थत्वादित्यप्राधान्यं पूरण्याः।

नेतुर्नक्षत्र इति। नक्षत्रे यो नेतृशब्दस्तदन्ताद्बहुव्रीहेरित्यर्थः। *छन्दसि चेति*। अनक्षत्रार्थमिदम्। *पञ्चकमासिक इति*। पञ्चभृतिरस्य मासस्य पञ्चको मासः,

न्यासः

केवलं वर्त्तिपदार्थस्यैव समासावयवभूतस्य पदार्थः, तत्र पूरण्याः प्राधान्यम्, यथा—कल्याणीपञ्चमा रात्रय इति। अत्र हि न केवलमवयवेन विग्रहः क्रियते, रात्रय एव प्रत्ययेनाख्यायन्ते, सहपञ्चमीकाः। सह पञ्चम्या समुदितोऽन्यपदार्थः, न तु ताभिरारब्धमर्थान्तरम्। यथा—कल्याणपञ्चमीकः पक्ष इति। न भिन्नावयवः समासार्थः, किं तर्हि? तदर्थारब्धः समुदायः पक्षाख्यः। पूरणी तु समासावयवभूता नाभिधीयत इति, अन्यपदार्थेनानुप्रवेशादप्राधान्यमिह तस्याः। पुंवद्भावप्रतिषेधेऽपीत्यादि। न केवलमिहापि, अपि तु 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्' इत्यादिना सूत्रेण पुंवद्भावप्रतिषेधेऽपीत्यादि। न केवलमिहाप्यपि तु स्त्रियामिति प्रधानपूरण्येव गृह्यते। इह त्वित्यादि। अप्प्रत्ययः पुंवद्भावप्रतिषेधः कल्याणपञ्चमीकः पक्ष इत्यत्र न भवति। 'शेषाद्विभाषा' इति कप्।

नेतुरित्यादि। उपसंख्यानशब्दस्य प्रतिपादनमर्थः। नक्षत्रे यो नेतृशब्दो वर्त्तते तदन्ताद् बहुव्रीहेरपः प्रतिपादनं कर्त्तव्यमित्यर्थः। प्रतिपादनं तूत्तरसूत्रे चकारस्यानुक्तसमुच्चयार्थतामाश्रित्य कर्तव्यम्। देवदत्तनेतृकाः। 'नद्यृतश्च' इति कप्।

छन्दसीत्यादि। मासादित्यादि। भृत्यर्थे यो विहितः प्रत्ययः स भृतिसाहचर्याद्

पञ्चकमासिकः कर्मकरः। दशकमासिकः। 'सोऽस्यांशवस्नभृतयः' इति 'संख्याया अतिशदन्तायाः कन्' ॥

अन्तर्बहिर्भ्यां च लोम्नः ॥ ११७ ॥

अन्तर्, बहिस्—इत्येताभ्यां परो यो लोमन्शब्दः तदन्ताद्बहुव्रीहेरप्प्रत्ययो भवति। अन्तर्गतानि लोमान्यस्यान्तर्लोमः प्रावारः। बहिर्लोमःपटः ॥

अङ्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ ११८ ॥

नासिकान्ताद्बहुव्रीहेरच्प्रत्ययो भवति नासिकाशब्दश्च नसमादेशमापद्यते। 'अस्थूलात्' इति नासिकाविशेषणम्—न चेत्स्थूलशब्दात्परा नासिका भवतीति। 'संज्ञायाम्' इति समुदायोपाधिः। द्रुरिव नासिकाऽस्य द्रुणसः[1]। वाध्रीणसः। 'पूर्वपदात्संज्ञायामगः' इति णत्वम्। गोनसः।

पदमञ्जरी

सोऽस्यांशवस्नभृतयः' इति संख्याया कन्, पञ्चको मासोऽस्येति बहुव्रीहौ कृते टच्। अपः पित्करणं यत्र बहुव्रीहावन्तोदात्तत्वमारभ्यते तद्बाधनार्थम्—अपञ्चमाः, सुपञ्चमाः, 'नञ्सुभ्याम्' इत्यन्तोदात्तत्वं न भवति ॥

अङ्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ *नसमिति*। द्वितीयानिर्देशो वैचित्र्यार्थः। *द्रुणस इति*। द्रुरिव नासिकास्य, 'पूर्वपदात्संज्ञायामगः' इति णत्वम्। वध्रे भवा वाध्री, सा नासिकास्य *वाध्रीणसः*, 'वृद्धिनिमित्तस्य च तद्धितस्य' इति पुंवद्भावप्रतिषेधः। गौरिव नासिकाऽस्य *गोनसः*।

न्यासः

भृतिरित्युच्यते। भृतिः प्रत्ययो यस्य तद्। भृतिप्रत्ययम् पूर्वपदं यस्य बहुव्रीहेः स भृतिपूर्वपदः, तस्मान् मासशब्दाट् ठञो विधिः। चित्करणं बहुव्रीहिस्वरबाधनार्थम्। पञ्चास्य मासस्य भृतयः 'सोऽस्यांशवस्नभृतयः' इति 'संख्याया अतिशदन्तायाः कन्' पञ्चकः, पञ्चको मासोऽस्य पञ्चकमासिकः।

अपः पित्करणं यत्र बहुव्रीहावुत्तरपदान्तोदात्तत्वमारभ्यते तत्र तद्बाधनार्थम्—शोभना पञ्चमी आसां रात्रीणां सुपञ्चमाः, अविद्यमाना पञ्चमी आसां रात्रीणामपञ्चमा इति। अत्र ह्यसति पित्करणे 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वं स्यात् ॥

अन्तर्बहिर्भ्यां च लोम्नः ॥ अङ्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ संज्ञायामिति समुदायोपाधिरिति। एतेन यदि प्रकृतिप्रत्ययसमुदायः कस्यचित् संज्ञा भवत्येवं

1. 'खरणसः'—इत्यधिकं पुस्तकान्तरे।

Indira Gandhi National Centre for the Arts

संज्ञायामिति किम् ? तुङ्गनासिकः । अस्थूलादिति किम् ? स्थूलनासिको वराहः ।

❀ खुरखराभ्यां नस् वक्तव्यः ❀ । खुरणाः । खरणाः ।

पक्षेऽच्प्रत्ययोऽपीष्यते । खुरणसः । खरणसः ॥

शितिनाः, अहिनाः, अर्चनाः—इति निगम इष्यते ॥

उपसर्गाच्च ॥ ११९ ॥

उपसर्गात्परो यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् प्रत्ययो भवति नासिकाशब्दश्च नसमापद्यते । असंज्ञार्थं वचनम् । उन्नता नासिकाऽस्य उन्नसः । प्रणसः । 'उपसर्गाद्बहुलम्' इति णत्वम् ।

❀ वेर्ग्रो वक्तव्यः ❀ । विगता नासिकाऽस्य विग्रः ॥

पदमञ्जरी

खुरखराभ्यां नस् वक्तव्य इति । केवलादेशवचनं प्रत्ययनिवृत्त्यर्थम् । *खुरणाः, खरणा इति* । 'अत्वसन्तस्य च' इति दीर्घः ।

शितिः कृष्णा नासिकास्य *शितिनाः*, अहेरिव नासिकाऽस्य *अहिनाः* । अर्चा= प्रतिमा, तस्या इव नासिकास्य *अर्चनाः*, 'ङ्यापोः संज्ञाछन्दसोः' इति ह्रस्वत्वम् ॥

उपसर्गाच्च ॥ उपसर्गग्रहणं प्राद्युपलक्षणम्; नासिकां प्रति क्रियायोगाभावात् ।

वेर्ग्रो वक्तव्य इति । विशब्दात्परस्य ग्रशब्द आदेशो भवति; प्रत्ययस्त्वजेव[1] ॥

न्यासः

प्रत्ययो भवति, नान्यथेति दर्शयति । द्रुणस इति । 'पूर्वपदात् संज्ञायामगः' इति णत्वम् । वध्रे भवा च स्त्री वाध्री, सा नासिका यस्य स वाध्रीणस इति । 'वृद्धि-निमित्तस्य च तद्धितस्यारक्तविकारे' इति पुंवद्भावप्रतिषेधः । गौरिव नासिकास्य गोनसः । अचश्चित्करणं बहुव्रीहिस्वरबाधनार्थम् ।

खरणाः, खुरणा इति । 'अत्वसन्तस्य चाधातोः' इति दीर्घः ।

शितिर्नासिकास्य शितिनाः । अहिरिव नासिकास्याहिनाः । अर्चेव नासिकास्या अर्चनाः । 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' इति ह्रस्वः ॥

उपसर्गाच्च ॥ उपसर्गग्रहणं प्राद्युपलक्षणार्थम्; नासिकां प्रति क्रियायोगाभावात् ।

वेर्ग्रो वक्तव्य इति । विशब्दात् परस्य नासिकाया ग्रशब्द आदेशो भवतीति वक्तव्यम् । विग्रः । प्रत्ययोऽजेव ॥

---

१. '''यद्यहं नाथ नायास्यं विनसा हतबान्धवा' इति भट्टिप्रयोगे तु विगतया नासिकयोपलक्षितेति व्याख्येयम्'' इति भट्टोजिः । मैत्रेयस्त्वाह—''केचिन्नासिका-पर्याये नसाशब्दमिच्छन्ति, तथा च वराहमत्रपुरुषप्रकाशे नसाशब्दः प्रयुक्तः । भट्टिकाव्येऽपि 'विनसा हतबान्धवा' इति दृश्यते । न चासौ 'उपसर्गाच्च' इति नसादेशे सिध्यति; 'वेर्ग्रो वक्तव्यः' इति ग्रादेशेन बाधितत्वात्'' इति (धा० प्र०) ।

Indira Gandhi National Centre for the Arts

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ १२० ॥

सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते । अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम् । शोभनं प्रातरस्य सुप्रातः । शोभनं श्वोऽस्य सुश्वः । शोभनं दिवाऽस्य सुदिवः । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयोऽस्य चतुरश्रः । एण्या इव पादावस्य एणीपदः । अजस्येव पादावस्य अजपदः । प्रोष्ठः=गौः, तस्येव पादावस्य प्रोष्ठपदः ॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥

नञ्, दुस्, सु—इत्येतेभ्यः परौ यौ हलिसक्थिशब्दौ तदन्ताद्बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः । अविद्यमाना हलि-

पदमञ्जरी

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ टिलोपादिकमिति । *सुप्रातः, सुश्व* इत्यत्र टिलोपः । 'अव्ययानां भमात्रे टिलोपः' इत्येतत्तु नाश्रितम् । आदिपदेन एणीपदाजपदयोः पद्भावः । *शोभनं प्रातरयेति ।* प्रातःशब्दस्याधिकरणप्रधानत्वात्सामानाधिकरण्याभावात्, प्रातस्तनं कर्म प्रातःशब्देन लक्ष्यते, देवदत्तादिश्चान्यपदार्थ इत्याहुः । कथं च 'वरदः करोतु सुप्रातमह्नामयं नायकः' इति ? न ह्ययं बहुव्रीहिः, शोभनं प्रातस्तवार्कः करोत्विति ह्यत्रार्थः ? उच्यते; शोभनं प्रातस्तनं कर्म यस्य सन्ध्यादेस्तत्ते करोत्विति क्लेशेनास्य निर्वाहः ॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ हलिग्रहणमनर्थकम् ? कथमहलः, सुहल इति ? अकारान्तो हलशब्दोऽस्ति ? नन्वर्थभेदोऽस्ति—महद्धलं हलिरित्युच्यते, हलमात्रं तु हलम् ? नायमर्थभेदः किञ्चित्करः, क्रियमाणेऽपि हलिग्रहणे

न्यासः

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ टिलोपादिकमिति । आदिशब्देन सुशब्दश्च कर्मविशेषणं गृह्यते । **शोभनं प्रातरस्येति ।** शोभनमित्येतदिह कर्मणो विशेषणम् । शोभनं प्रातःकाले कर्मास्येत्यर्थः । एवमुत्तरत्रापि शोभनमित्येतत् कर्मणो विशेषणं वेदितव्यम् ॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ अकारान्तोऽपि हलशब्दोऽस्ति; तत्र यदा तेन समासः तदा हल इति भविष्यति, यदा त्विकारान्तेन तदा हलिरिति, तदनर्थकं हलग्रहणम् ? नानर्थकम्; भिन्नार्थत्वात् । तेन यो महद्धलं हलिः, तस्मिन् विषये विवक्षिते, अहल इति न सिध्यति, अहल इति यदाकारान्तेन समासः क्रियते, पूर्ववत्

Indira Gandhi National Centre for the Arts

रस्य अहलः, अहलिः । दुर्हलः, दुर्हलिः । सुहलः, सुहलिः । अविद्यमानं सक्थ्यस्य असक्थः, असक्थिः । दुःसक्थः, दुःसक्थिः । सुसक्थः, सुसक्थिः ।

'हलिशक्त्योः' इति केचित्पठन्ति । अविद्यमाना शक्तिरस्य अशक्तः, अशक्तिः । विरूपा शक्तिरस्य दुःशक्तः, दुःशक्तिः । शोभना शक्तिरस्य सुशक्तः । सुशक्तिः ॥

नित्यमसिच् प्रजामेधयोः ॥ १२२ ॥

'नञ्दुस्सुभ्यः' इत्येव । नञ्, दुस्, सु—इत्येतेभ्यः परौ यौ प्रजा-मेधाशब्दौ तदन्ताद्बहुव्रीहेर्नित्यमसिच् प्रत्ययो भवति समासान्तः । अविद्यमाना प्रजाऽस्य अप्रजाः । दुष्प्रजाः । सुप्रजाः । अविद्यमाना मेधाऽस्य अमेधाः । दुर्मेधाः । सुमेधाः ।

नित्यग्रहणं किम्; यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं नैव स्वर्यते ? एवं तर्हि नित्यग्रहणेनान्यत्रापि भवतीति सूच्यते ।

श्रोत्रियस्येव ते राजन्मन्दकस्याल्पमेधसः ।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ॥

बहुप्रजाश्छन्दसि ॥ १२३ ॥

पदमञ्जरी

हलशब्देनापि समासो न दण्डवारितः, ततश्च प्रकरणादिवशेन विशेषो ऽवगन्तव्यः; सति चैवमकारान्तेनापि समासे प्रकरणादिनैव महत्त्वमवगंस्यते ? इह तर्हि—दुर्हल इत्यकारान्तेनापि समासे पूर्वपदप्रकृतिस्वरः प्राप्नोति, समासान्ते तु विहिते चित्स्वरो भवति । अहलः, सुहल इत्यत्र 'नञ्सुभ्याम्' इत्यन्तोदात्तविधानान्नास्ति विशेषः । 'शेषाद्विभाषा' इति च हलिशब्दात्कप् प्रत्ययः प्रसज्येत; तस्माद्धलिग्रहणम् । केचित्तु *हलिशक्त्योरिति* पठन्ति । अस्थिपर्यायः शक्तिशब्दः ॥

न्यासः

प्रकृतिभावेनाद्युदात्तत्वं चेष्यते, 'शेषाद्विभाषा' इति कप् प्रसज्येत । तस्माद् युक्तं हलिग्रहणम् ॥

नित्यमसिच् प्रजामेधयोः ॥ एवं तर्हि नित्यग्रहणेनान्यत्रापि सूच्यत इति । ग्रन्थाधिक्यादर्थाधिक्यम् भवतीति कृत्वा । असिचश्चित्करणम् दुष्प्रजाः, दुर्मेधा इत्यन्तोदात्तत्वं यथा स्यात् । अप्रजाः, सुप्रजा इत्यादौ तु नार्थश्चित्करणेन; 'नञ्सुभ्याम्' इत्यनेनैवोत्तरपदान्तोदात्तत्वस्य सिद्धत्वात् ॥

Indira Gandhi National Centre for the Arts

'बहुप्रजाः' इति छन्दसि निपात्यते। बहुप्रजा निर्ऋतिमाविवेश।

छन्दसीति किम्? बहुप्रजो ब्राह्मणः॥

धर्मादनिच् केवलात्॥ १२४॥

केवलाद् यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच्प्रत्ययो भवति समासान्तः। कल्याणो धर्मोऽस्य कल्याणधर्मा। प्रियधर्मा।

केवलादिति किम्? परमः स्वो धर्मोऽस्य परमस्वधर्मः। यद्येवम्, त्रिपदे बहुव्रीहौ प्राप्नोति—परमः स्वो धर्मोऽस्येति? एवं तर्हि केवलादिति पूर्वपदं निर्दिश्यते—केवलात्पदाद्यो धर्मशब्दः, न पदसमुदायात्। तदन्ताद्बहुव्रीहेः प्रत्ययः॥

जम्भा सुहरिततृणसोमेभ्यः॥ १२५॥

बहुव्रीहौ समासे स्वादिभ्यः परं 'जभा' इति कृतसमासान्तमुत्तरपदं

पदमञ्जरी

नित्यमसिच् प्रजामेधयोः॥ असेवायं न विहितः, सकारस्येत्संज्ञा मा भूदिति। *एवं तर्हीत्यादि*। भाष्ये एतन्नाश्रितम्। चित्करणम्—दुःप्रजाः, दुर्मेधा इत्यत्रान्तोदात्तार्थम्। अन्यत्र 'नञ्सुभ्याम्' इत्येव सिद्धम्॥

धर्मादनिच् केवलात्॥ परमः स्वो धर्मोऽस्य परमस्वधर्म इति। 'सर्वनामसंख्ययोरुपसंख्यानम्' इति स्वशब्दस्य पूर्वनिपातो न भवति; प्राप्तस्य चाबाधा व्याख्येयेति, आहिताग्न्यादेराकृतिगणत्वाद्वा॥

जम्भा सुहरिततृणसोमेभ्यः॥ दन्तवचनो वेति। 'इमम्म्भसुतं पिब' इति दर्शनात्॥

न्यासः

बहुप्रजाश्छन्दसि॥ धर्मादनिच् केवलात्॥ असमस्त इति। असमासः क्रियत इत्यर्थः। **परमस्वधर्म इति**। स्वश्चासौ धर्मश्चेति स्वधर्मः, परमश्चासौ स्वधर्मश्चेति परमस्वधर्मः। **यद्येवमित्यादि**। यदि केवलग्रहणेन धर्मो विशेष्यते परमस्वधर्मश्चेति न, परमस्वधर्मेति स्यात्। **केवलात् पूर्वपदादिति**। धर्मस्य असहायात् पूर्वपदादित्यर्थः। **न पदसमुदायादिति**। परमो धर्म इति प्रकृतेन सम्बन्धः। अत्र व्याख्याने त्रिपदे बहुव्रीहौ न भवति प्रसङ्गः; पदसमुदायाद्धि परमो धर्मशब्दो न केवलात् पूर्वपदात्। अनिचश्चित्करणं पूर्वपदप्रकृतिस्वरं बाधित्वाऽन्तोदात्तत्वमेव यथा स्यात्।

जम्भा सुहरिततृणसोमेभ्यः॥ जम्भवचनेन तृणमिव जम्भोऽस्य, सोम इव जम्भोऽस्येति विग्रहीतव्यमिति। ननु तृणं जम्भोऽस्य, सोमो जम्भोऽस्येत्येवं विग्रही-

Indira Gandhi National Centre for the Arts

निपात्यते । जम्भशब्दोऽभ्यवहार्यवाची, दन्तविशेषवाची च । शोभनो जम्भोऽस्य सुजम्भा देवदत्तः । शोभनाभ्यवहार्यः, शोभनदन्तो वा । एवं हरितजम्भा । तृणजम्भा । सोमजम्भा । दन्तवचने—तृणमिव जम्भोऽस्य, सोम इव जम्भोऽस्येति विग्रहीतव्यम् ।

सुहरिततृणसोमेभ्य इति किम् ? पतितजम्भः ॥

दक्षिणेर्मा लुब्धयोगे ॥ १२६ ॥

'दक्षिणेर्मा' इति कृतसमासान्तो निपात्यते बहुव्रीहौ समासे लुब्धयोगे । लुब्धः=व्याधः । दक्षिणमीर्ममस्य दक्षिणेर्मा मृगः । ईर्मम्= व्रणमुच्यते । दक्षिणमङ्गं व्रणितमस्य व्याधेनेत्यर्थः ।

लुब्धयोग इति किम् ? दक्षिणेर्म शकटम् ॥

इच् कर्मव्यतिहारे ॥ १२७ ॥

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति । 'तत्र तेनेदमिति सरूपे' इत्ययं बहुव्रीहिर्गृह्यते । केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि । कचाकचि । मुसलैश्च मुसलैश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुसलामुसलि । दण्डादण्डि । तिष्ठद्गुप्रभृतिष्वयमिच्प्रत्ययः पठ्यते ॥

पदमञ्जरी

दक्षिणेर्मा लुब्धयोगे ॥ *लुब्धो व्याध इति* । कवयस्तु हिंसामात्रे प्रयुञ्जते–'बाली हेमाब्जमाली गुणनिधिरिषुणा निर्मितो दक्षिणेर्मा' इति यथा । *व्रणितमिति* । व्रणशब्दादितच् । 'व्रण गात्रविचूर्णने' इत्यस्माद्वा चौरादिकणिजन्तात्क्तः ॥

इच् कर्मव्यतिहारे ॥ *अयं बहुव्रीहिर्गृह्यत इति* । अस्यैव कर्मव्यतिहारे वृत्तेः । उदाहरणेषु 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम् । *तिष्ठद्गुप्रभृतिष्वयमिच् पठ्यते इति* । तेनाव्ययीभावसंज्ञकत्वादव्ययत्वे सति सुब्लुग्भवतीति भावः । यद्येवम्, अव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधनात्समासस्वरेणैवान्तोदात्तत्वं

न्यासः

तव्यम्, न हि तृणं जम्भः, न च सोमः । अभ्यवहार्यवचने तु—तृणं जम्भोऽस्य, सोमो जम्भोऽस्येत्येवमेव विग्रहः कार्यः; तृणसोमयोरभ्यवहार्यत्वात् ॥

दक्षिणेर्मा लुब्धयोगे ॥ **इच् कर्मव्यतीहारे** ॥ **'तत्र तेनेदमिति सरूपे'** इत्यय बहुव्रीहिर्गृह्यत इति । अस्यैव कर्मव्यतिहारे वृत्तेः । **केशाकेशि** । 'अन्येषामपि दृश्यते' इति दीर्घः । तिष्ठद्गुप्रभृतिष्विच्प्रत्ययस्य पाठादव्ययीभावसंज्ञा, अव्ययीभावश्च समासोऽव्ययसंज्ञो भवतीति । तेन सुब्लुग्भवतीति भावः ।

Indira Gandhi National Centre for the Arts

द्विदण्डयादिभ्यश्च ॥ १२८ ॥

द्विदण्डयादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति । 'द्विदण्डयादिभ्यः' इति तादर्थ्ये एषा चतुर्थी, न पञ्चमी । द्विदण्डयाद्यर्थमिच् प्रत्ययो भवति । तथा भवति यथा द्विदण्डयादयः सिध्यन्तीत्यर्थः । समुदायनिपातनाच्चार्थविशेषेऽवरुध्यन्ते । द्विदण्डि प्रहरति । द्विमुसलि प्रहरति । इह न भवति—द्विदण्डा शालेति ।

बहुव्रीह्यधिकारेऽपि तत्पुरुषात् क्वचिद्विधानमिच्छन्ति । निकुच्य

पदमञ्जरी

सिद्धमिति नार्थश्चित्करणेन ? विशेषणार्थं तु । असति हि तस्मिंस्तिष्ठद्गुप्रभृतिष्विकारमात्रं पठ्येत, ततश्च 'अच इः' इत्यस्यापि ग्रहणं स्यात् ॥

द्विदण्ड्यादिभ्यश्च ॥ यदि 'द्विदण्ड्यादयः साधवो भवन्ति'—इत्ययमर्थोऽभिप्रेतः, 'द्विदण्ड्यादिभ्यः' इति सूत्रपदस्य कथं निर्वाहः ? अत आह–*द्विदण्ड्यादिभ्य इति । तादर्थ्य एषा चतुर्थीत्यादि । समुदायनिपातनाच्चेति* । समुदाया यत्र प्रसिद्धास्तत्रैव तेषामवरोधः=अवस्थापनं यथा स्यादित्येवमर्थं समुदायनिपातनमित्यर्थः । *द्विदण्डि प्रहरतीति* । द्वौ दण्डावस्मिन्प्रहरणे इति विग्रहः । *इह न भवतीति* । किं न भवति ? द्विदण्डीत्येतच्छब्दरूपं साधु न भवतीत्यर्थः ।

बहुव्रीह्यधिकारेऽपीति । अत्रापि 'समुदायनिपातनाच्च' इत्ययमेव हेतुः । ननु

न्यासः

इचश्चित्करणं विशेषणार्थम् । यदि ह्यत्र चकारो न क्रियते, तदा तिष्ठद्गुप्रभृतिष्वपीकारमात्रं पठ्येत, तदेकारमात्रस्यापि ग्रहणं स्यात् ॥

द्विदण्ड्यादिभ्यश्च ॥ द्विदण्ड्यादिभ्य इति तादर्थ्ये एषा चतुर्थीत्यादि । द्विदण्ड्यादयो हि प्रातिपदिकेष्विच्प्रत्ययान्ता एव पठ्यन्त इति तेभ्यः पुनरिज्विधातुं न शक्यते, विधीयमानोऽपि निष्प्रयोजनं स्यात्, तस्मान्नेयं पञ्चमी, किं तर्हि ? तादर्थ्ये चतुर्थी । द्विदण्ड्याद्यर्थमिच् प्रत्ययो भवतीत्यनेन तादर्थ्यं दर्शयति । अस्यैवार्थं विस्पष्टीकर्तुमाह—**तत्तथा भवतीत्यादि** । एवं ब्रुवाणेन 'द्विदण्ड्यादिभ्यः प्रत्ययो भवति, न द्विदण्डादिभ्यः' इत्युक्तम् । एवं ते सिध्यन्ति; नान्यथा । अथ किमर्थं समुदायानां निपातनशुद्धा एव प्रकृतीः प्रातिपदिकेषु पठित्वा ततः प्रत्ययो विधीयते ? इत्यत आह—**समुदायनिपातनाच्चेत्यादि** । प्रातिपदिकेषु प्रकृतीः पठित्वा ताभ्यः प्रत्ययमात्रं विधीयते, ततो नियमः स्यात्—समुदायनिपातनाद् यत्रार्थे विशेषे ते प्रसिद्धास्तत्रैव विशेष्यन्ते । तत्रैव भवन्तीत्यर्थः । **द्विदण्डि प्रहरतीति** । द्वौ दण्डौ यस्मिन् प्रहरणे । **इह न भवतीति** । द्विदण्डीत्येतच्छब्दरूपमत्रार्थे साधुर्न भवतीत्यर्थः । **बहुव्रीह्यधिकारेऽपीत्यादि** ।

कर्णौ धावति निकुच्यकर्णि धावति । प्रोह्य पादौ हस्तिनं वाहयति प्रोह्यपादि हस्तिनं वाहयति । मयूर्व्यंसकादित्वात्समासः ।

द्विदण्डि । द्विमुसलि । उभाञ्जलि । उभयाञ्जलि । उभाकर्णि । उभयाकर्णि । उभादन्ति । उभयादन्ति । उभाहस्ति । उभयाहस्ति । उभापाणि । उभयापाणि । उभाबाहु । उभयाबाहु । एकपदि । प्रोह्यपदि । आढ्यपदि । सपदि । निकुच्यकर्णि । संहतपुच्छि । उभाबाहु उभयाबाह्विति निपातनादिच्प्रत्ययलोपः । प्रत्ययलक्षणेनाव्ययीभावसंज्ञा । द्विदण्ड्यादिः ॥

प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥

प्र, सम्–इत्येताभ्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवति समासान्तो बहुव्रीहौ । प्रकृष्टे जानुनी अस्य प्रज्ञुः । संज्ञुः ॥

पदमञ्जरी

प्रातिपदिकेष्विच्प्रत्ययान्तपाठादेव सिद्धं द्विदण्ड्यादीनां साधुत्वम्, तत्किमनेन ? तन्न; न हि पाठमात्रेणेजन्तत्वं शक्यमवगन्तुम्; ततश्चाव्ययीभावसंज्ञा न स्यात् । अनार्षश्च पाठः शङ्क्येत; क्वचिदप्यनुपयोगात् ॥

प्रसम्भ्यां जानुनोर्ज्ञुः ॥ *ज्ञुरित्ययमादेश इति* । प्रत्ययस्त्वयं न भवति; षष्ठीद्विवचनेन निर्देशात् । इह हि जानुशब्दस्यैकत्वेऽपि अर्थगतं द्वित्वम्, उपपदनिबन्धनं वा द्वित्वमाश्रित्य जानुनोरिति निर्देश एतदर्थः क्रियते—स्थानषष्ठीत्वमसन्दिग्धं कथं विज्ञायेतेति । छन्दसि तु स्वतन्त्रोऽपि ज्ञुशब्दो दृश्यते–'उपज्ञुबाधो नभसा', 'सदेम वत्सज्ञुं पशुकामस्य' इति ॥

न्यासः

अत्रापि समुदायनिपातनमित्ययमेव हेतुः । असति हि समुदायनिपातने बहुव्रीह्यधिकारात् तत्पुरुषान्न क्वचित् प्रत्ययविधानं स्यात् । समुदायनिपातनात् तु क्वचित् तत्पुरुषादपि भवति । यदा प्रत्ययस्य लोपो भवत्यव्ययीभावसंज्ञा, तदा न प्राप्नोतीत्यत आह—**प्रत्ययलक्षणेनेत्यादि** ।

प्रसंभ्यां जानुनोर्ज्ञुः ॥ **जानुशब्दस्यादेशो भवतीति** । कथं पुनर्ज्ञायते—आदेशोऽयम्, न प्रत्यय इति ? यदि प्रत्ययः स्यात्, 'जानुनः' इत्येकवचनेनैव निर्देशं कुर्यात्; षष्ठीद्विवचनेनैव निर्देशः कृतः । तस्मादादेशोऽयं न प्रत्यय इति विज्ञायते । षष्ठीद्विवचनेन निर्देशोऽसन्देहार्थः कृतः–स्थानषष्ठीत्वमसन्दिग्धं यथा विज्ञायेतेति । जानुन इत्युच्यमाने सन्देहः स्यात्– किमियं षष्ठी, उत पञ्चमीति ॥

Indira Gandhi National Centre for the Arts

ऊर्ध्वाद्विभाषा ॥ १३० ॥

ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा 'ज्ञुः' इत्ययमादेशो भवति । ऊर्ध्वे जानुनी अस्य ऊर्ध्वजानुः । ऊर्ध्वज्ञुः ॥

ऊधसोऽनङ् ॥ १३१ ॥

ऊधःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः । कुण्ड-मिव ऊधोऽस्याः सा कुण्डोध्नी । घटोध्नी ।

❀ ऊधसोऽनङि स्त्रीग्रहणं कर्तव्यम् ❀ । इह मा भूत्—महोधाः पर्जन्यः । घटोधो धैनुकम् ॥

धनुषश्च ॥ १३२ ॥

धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । गाण्डीवधन्वा । पुष्पधन्वा । अधिज्यधन्वा ॥

वा संज्ञायाम् ॥ १३३ ॥

धनुःशब्दान्ताद्बहुव्रीहेरनङादेशो वा भवति संज्ञायां विषये । पूर्वेण

पदमञ्जरी

ऊधसोऽनङ् ॥ ङित्करणादन्त्यादेशत्वम्, अकारादित्वं च निश्चित्याऽऽह—अनङादेशो भवतीति । कुण्डोध्नीति । 'बहुव्रीहेरूधसो ङीष्', 'अल्लोपोऽनः' । अनङ्विधानमुत्तरार्थम्, इह तु नकारादेशेनापि सिद्धम् ॥

न्यासः

ऊर्ध्वाद्विभाषा ॥ ऊधसोऽनङ् ॥ अनङादेशोऽयं भवतीति । कथं पुनर्विज्ञायते—आदेशोऽयं न प्रत्यय इति ? यद्येष प्रत्ययः स्यात् ङित्करणमनर्थकं स्यात् । आदेशे ह्यस्मिन्नन्त्यादेशार्थं ङित्त्वमर्थवद् भवति । तस्माद् ङित्त्वादेवायमादेशो भवतीति विज्ञायते । **कुण्डोध्नीति ।** अनङि कृते 'अतो गुणे' पररूपत्वम्, 'बहुव्रीहेरूधसो ङीष्' इति ङीष्, 'अल्लोपोऽनः' ।

स्त्रीग्रहणं कर्त्तव्यमिति । स्त्री गृह्यते येनाभिधेयनित्यत्वेन ततः स्त्रीग्रहणं कर्त्तव्यम् । एतदुक्तं भवति—तथा व्याख्यानं कर्त्तव्यं यथा स्त्रियामभिधेयायामनङ् भवतीति । तत्रेदं व्याख्यानम्—'ऊर्ध्वाद् विभाषा' इत्यतो विभाषाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा, तेन स्त्रियामेव भवति, नान्यत्रेति ।

अनङोऽकारादित्वमुत्तरार्थम् । इह विनापि तेन सिध्यत्येव ॥

धनुषश्च ॥ शार्ङ्गधन्वेति । अनङि कृते यणादेशः, 'सर्वनामस्थाने च' इति दीर्घः ।

वा संज्ञायाम् ॥ जायाया निङ् ॥ निङादेशो भवतीति । आदेशत्वमस्य पूर्ववद्

Indira Gandhi National Centre for the Arts

नित्यः प्राप्तो विकल्प्यते। शतधनुः, शतधन्वा। दृढधनुः, दृढधन्वा ॥

जायाया निङ् ॥ १३४ ॥

जायाशब्दान्तस्य बहुव्रीहेर्निङादेशो भवति। युवतिर्जाया यस्य युवजानिः। वृद्धजानिः ॥

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३५ ॥

उत्, पूति, सु, सुरभि—इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तो बहुव्रीहौ समासे। तकार उच्चारणार्थः। उद्गतो गन्धोऽस्य उद्गन्धिः। पूतिगन्धिः। सुगन्धिः। सुरभिगन्धिः।

एतेभ्य इति किम्? तीव्रगन्धो वातः।

❀ गन्धस्येत्त्वे तदेकान्तग्रहणम् ❀। तेन शोभनो गन्धोऽस्य सुगन्ध आपणिकः ॥

पदमञ्जरी

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ इकारादेशो भवतीति। षष्ठीनिर्देशादादेशत्वावसायः। प्रकरणभेदाय चादेशत्वं व्यवस्थाप्यते, न त्वस्मिन्प्रत्ययेऽपि कश्चिद्दोषः।

गन्धशब्दोऽयमस्ति द्रव्यवचनः—वहति जलमियम्, पिनष्टि गन्धानियमिति, अस्ति च गुणवचनः—चन्दनस्य गन्ध इति, तत्र गुणवाचिनो ग्रहणार्थमाह—*गन्धस्येत्त्व इति*। रूपादिसमुदायः=द्रव्यम्, तस्य गन्धलक्षणो गुण एकान्त एकदेशो भवति, रूपादिव्यतिरिक्तमवयवि द्रव्यमिति तु पक्षे एकान्त इवैकान्तः; तत्स्थस्योपलम्भात्।

सुगन्ध आपणिक इति। आपणे नियुक्त आपणिकः; प्राग्वहतीयष्ठक्। भवार्थे

न्यासः

ङित्त्वादेव विज्ञायते। युवजानिरिति। 'लोपो व्योर्वलि' इति यलोपः। 'स्त्रियाः पुंवत्' इति पुंवद्भावः।

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ इकार आदेशो भवतीति। कथं पुनर्ज्ञायते—आदेशोऽयं न प्रत्यय इति? 'गन्धस्य' इति षष्ठ्या निर्देशात्। यदि हि प्रत्ययः स्यात्, असन्दिग्धार्थम् 'गन्धात्' इति पञ्चम्या निर्देशं कुर्यात्, षष्ठ्या तु निर्देशः। तस्मादादेशोऽयमिति विज्ञायते।

गन्धस्येत्त्व इत्यादि। गन्धो द्विविधः। गुणो गन्धः, सोऽन्यपदार्थस्यैकान्तो न भवति। यस्तु शोभनो गन्धोऽस्येति सुगन्ध आपणिक इति तत्र द्रव्यगन्धो गन्ध-

Indira Gandhi National Centre for the Arts

अल्पाख्यायाम् ॥ १३६ ॥

अल्पाख्यायां यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे । सूपोऽल्पोऽस्मिन् सूपगन्धि भोजनम् । अल्पमस्मिन् भोजने घृतम् घृतगन्धि । क्षीरगन्धि । अल्पपर्यायो गन्धशब्दः ॥

उपमानाच्च ॥ १३७ ॥

उपमानात्परो यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे । पद्मस्येव गन्धोऽस्य पद्मगन्धिः । उत्पलगन्धिः । करीषगन्धिः ॥

पादस्य लोपोऽहस्त्यादिभ्यः ॥ १३८ ॥

पदमञ्जरी

वा अध्यात्मादित्वाट्ठक् । अथ वायौ कथं सुगन्धिः, दुर्गन्धिरिति, न ह्ययं गन्धो वायोर्गुणः ? मा भूत्तस्य गुणः, तेन तावदविभागापन्नो लक्ष्यते, एतावदेव च तदेकान्तत्वं विवक्षितम्, न तद्गुणत्वम् । एवं च कृत्वा कुङ्कुमाद्यनुलेपनमपि यदा देवदत्तादेरविभागपन्नं भवति तदेत्त्वं भवत्येव—सुगन्धिर्देवदत्त इति, सर्वथा द्रव्यवचननिवृत्तिः ॥

अल्पाख्यायाम् ॥ सूपोऽल्पोऽस्मिन्सूपगन्धीति । अर्थप्रदर्शनमेतत्, विग्रहस्तु सूपस्य गन्धो लेशोऽस्मिन्निति; अन्यथा विशेषणत्वाद् गन्धशब्दस्य पूर्वनिपातः स्यात् । यद्वा—अस्मादेव निपातनाद् गन्धशब्दस्य परनिपातः ॥

न्यासः

शब्देनोच्यते, तच्चापणिकस्यैकदेशो भवति। तत्र गुणगन्धे यथा स्याद्, द्रव्यगन्धे मा भूदित्येवमर्थं गन्धस्येत्त्वे विधेये तदेकान्तग्रहणं कर्त्तव्यम् । तदित्यनेन बहुव्रीह्यर्थः सामर्थ्यान्निर्दिश्यते । तस्यैकान्त एकदेशो वा धर्मोऽवयवस्तदेकान्तः संगृह्यते । येन तदेकान्तग्रहणं कर्त्तव्यम् । एतदुक्तं भवति—तादृशं व्याख्यानं कर्त्तव्यं येनेत्त्वविधाविह गन्धोऽन्यपदार्थस्यैकदेशात् तत आश्रयितव्य इति । तत्रेदं व्याख्यानम्—'वा संज्ञायाम्' इत्यतो वाग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा । तेन यत्र गन्धोऽन्यपदार्थस्यैकदेशभूतस्तत्रैवेत्त्वं भवति, नान्यत्रेति । अथ वा—अस्त्ययं गन्धशब्दो द्रव्यवचनः—गन्धान् विक्रीणीत इति । अस्ति गुणवचनो यथा—गन्धवती पृथिवी । तत्र गुणवचनस्येदं ग्रहणम्, न द्रव्यवचनस्य । तस्माद् द्रव्यवचनो बहुवचनान्त एव द्रव्ये वर्त्तते—गन्धान् विक्रीणीते, गन्धाः पण्यमस्येति । इह गन्धस्येत्येकवचनेनैव निर्देशः । तस्मादवसीयते—गुणवचनस्येदं ग्रहणमिति । गुणवचनस्य तु ग्रहणे तत्र गुणो गन्धोऽन्यपदार्थस्यैकदेशो भवति, तेन तदेकान्तभूतस्यैव गन्धस्येत्त्वं भवति ॥

अल्पाख्यायाम् ॥ उपमानाच्च ॥ पादस्य लोपोऽहस्त्यादिभ्यः ॥ लोपो भवति

Indira Gandhi National Centre for the Arts

'उपमानात्' इत्येव । उपमानाद्धस्त्यादिवर्जितात्परस्य पादशब्दस्य लोपो भवति समासान्तो बहुव्रीहौ समासे । स्थानिद्वारेण लोपस्य समासान्तता विज्ञायते । व्याघ्रस्येव पादावस्य व्याघ्रपात् । सिंहपात् ।

अहस्त्यादिभ्य इति किम् ? हस्तिपादः । कटोलपादः ।

हस्तिन् । कटोल । गण्डोल । गण्डोलक । महिला । दासी । गणिका । कुसूल । हस्त्यादिः ॥

कुम्भपदीषु च ॥ १३९ ॥

कुम्भपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यन्ते, तत्रैवं सूत्रं ज्ञेयम् । पादस्य लोपो भवति कुम्भपद्यादिविषये यथा, कुम्भ-

पदमञ्जरी

पादस्य लोपोऽहस्त्यादिभ्यः ॥ लोपो भवति समासान्त इति । यदि त्वयं समासान्तो न स्याद्, 'आदेः परस्य' इत्यादेः स्यात्, 'शेषाद्विभाषा' इति कप् च प्रसज्येत; समासान्तापेक्षस्य शेषस्याश्रयणात् । कथं पुनरभावरूपोऽन्तावयवो भवति ? तत्राह—*स्थानिद्वारेणेति* ॥

कुम्भपदीषु च ॥ बहुवचननिर्देशात्प्रभृत्यर्थोऽवगम्यत इत्याह—*कुम्भपदीप्रभृतय इति । समुदाया एव निपात्यन्त इति ।* कथं तर्हि सूत्रे भूतविभक्त्या सप्तम्या निर्देशः ? इत्यत आह—*तत्रेति ।* विषयग्रहणेन सूत्रे विषयसप्तमीति दर्शयति—*यथा कुम्भपद्यादयः सिद्ध्यन्तीति ।* यत्तदोर्नित्यसम्बन्धात्पूर्वत्र तथा लोपो भवतीत्यर्थो ग्राह्यः । किमर्थं पुनः समुदाया एव निपात्यन्ते, न कुम्भादीनेव गणे पठित्वा तेभ्यः परस्य पादशब्दस्य लोपो विधीयेत ? तत्राह—*समुदायपाठस्य*

न्यासः

समासान्त इति । किं पुनः स्यात् समासान्तो न स्यात् ? 'आदेः परस्य' इत्यादेरेव स्यात् । समासान्तत्वे सत्यन्तशब्दोऽयं नियतदेशमेवावयवमाचष्ट इत्यन्तस्यैव भवति । एवञ्च समासान्तो भवति यद्यन्तस्य भवति, नान्यथा । ननु च लोपस्याभावरूपत्वात् समासान्तो नोपपद्यते ? इत्याह—**स्थानिद्वारेणेत्यादि** । स्थानिनोऽकारस्य समासान्तत्वादुपचारेण लोपोऽपि समासान्त उच्यत इति दर्शयति ॥

कुम्भपदीषु च ॥ कुम्भपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यन्त इति । यद्येवम्, कथमिदं नेतव्यम् ? इत्याह–**तत्रैवमित्यादि** । तत्र तेषु कुम्भपदीप्रभृतिषु कृतपादलोपेषु पठितेष्वेवं व्याख्येयमित्यर्थः । कुम्भपद्यादिविषय इति विषयग्रहणेन कुम्भपदीष्विति विषयसप्तम्येवेति दर्शयति । **यथा कुम्भपद्यादयः सिध्यन्तीति** । यत्तदोर्नित्यसम्बन्धात् तथेत्यनुच्यमानमपि प्रतीयते । तदायमर्थः—पादस्य तथा लोपो भवति कुम्भपद्यादिविषये यथा कुम्भपद्यादयः सम्भवन्तीति । किमर्थं पुनः समुदाया

Indira Gandhi National Centre for the Arts

पद्यादयः सिद्धयन्ति। समुदायपाठस्य च प्रयोजनं विषयनियमः— स्त्रियामेव, तत्र ङीष्प्रत्यये एव, नान्यदा। कुम्भपदी। शतपदी।

यच्चेहोपमानपूर्वम्, संख्यापूर्वं च पठयते, तस्य सिद्धे लोपे नित्यङीबर्थं वचनम्। 'पादोऽन्यतरस्याम्' इति विकल्पो न भवति।

कुम्भपदी। शतपदी। अष्टापदी। जालपदी। एकपदी। मालापदी। मुनिपदी। गोधापदी। गोपदी। कलशीपदी। घृतपदी। दासीपदी। निष्पदी। आर्द्रपदी। कुणपदी। कृष्णपदी। द्रोणपदी। द्रुपदी। शकृत्पदी। सूपपदी। पञ्चपदी। अर्वपदी। स्तनपदी[1]। कुम्भपद्यादिः॥

संख्यासुपूर्वस्य॥ १४०॥

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः। द्वौ पादावस्य द्विपात्। त्रिपात्। शोभनौ पादावस्य सुपात्॥

पदमञ्जरी

चेति। विषयनियममेव दर्शयति—*स्त्रियामेवेति*। अत्र च स्त्रियामपि ङीप्प्रत्यय एव। 'पादोऽन्तरस्याम्' इति यदा ङीब्विषयभूतस्तदैवेत्यर्थः।

यच्चेत्यादि। उपमानपूर्वपदम्–कुम्भपदी, जालपदीत्यादि; संख्यापूर्वपदम्–एकपदी, शतपदीति। *अष्टापदीति* पठ्यते, तत्र निपातनाद्दीर्घत्वम्, 'अष्टनः संज्ञायाम्' इति वाऽऽकारः॥

न्यासः

एव पठ्यन्ते, न कुम्भपदादीन् शब्दान् प्रातिपदिकेषु पठित्वा तेभ्यः परस्य पादशब्दस्य लोपो विधीयेत ? इत्याह—**समुदायपाठस्य चेत्यादि**। यदि कुम्भादिभ्यः परस्य पादस्य स लोप उच्येत, 'कृतपादलोपाः समुदाया एव न पठ्येरन्' इति नियमो न लभ्येत। ततस्त्रिष्वपि लिङ्गेषु स्युः, स्त्रियामेव चेष्यन्ते। समुदायपाठे सति स्त्रियां ङीप्प्रत्यय एव विषयभूते भवति। **नान्यदेति**। **कुम्भपदीति**। 'पादोऽन्यतरस्याम्' इति ङीपि विषयभूते पादस्य लोपः, ततो ङीप्, तस्मिन् 'पादः पत्' इति पद्भावः।

यच्चेहोपमानपूर्वमिति—कुम्भपदी, जालपदीत्येवमादि। **संख्यापूर्वपदञ्चेति**—एकपदी शतपदीत्येवमादि। **तस्य सिद्ध इति**। उपमानपूर्वस्य पूर्वेणैव सिद्धे संख्यापूर्वस्य तूत्तरेण।

अष्टापदीत्यस्मिन् पठ्यते। तत्र निपातनं दीर्घत्वार्थम्। 'अष्टनः संज्ञायाम्' इति वा॥

संख्यासुपूर्वस्य॥ अनुपमानार्थमिदम्॥

---

१. स्थूलपदी, सूत्रपदी, कलहंसपदी, द्विपदी, विषपदी, सुपदी, सूकरपदी, सूचीपदी—अत्रैते शब्दाः पुस्तकान्तरेऽधिकाः॥

Indira Gandhi National Centre for the Arts

वयसि दन्तस्य दतृ ॥ १४१ ॥

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दस्तस्य 'दतृ' इत्ययमादेशो भवति समासान्तो वयसि गम्यमाने । ऋकार उगित्कार्यार्थः । द्वौ दन्तावस्य द्विदन् । त्रिदन् । चतुर्दन् । शोभना दन्ता अस्य समस्ता जाताः सुदन् कुमारः ।

वयसीति किम् ? द्विदन्तः कुञ्जरः । सुदन्तो दक्षिणात्यः ॥

छन्दसि च ॥ १४२ ॥

छन्दसि च दन्तशब्दस्य 'दतृ' इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे । पत्त्रदतमालभेत । उभयदत आलभते ॥

स्त्रियां संज्ञायाम् ॥ १४३ ॥

स्त्रियामन्यपदार्थे संज्ञायां विषये दन्तशब्दस्य 'दतृ' इत्ययमादेशो भवति । अयोदती । फालदती ।

संज्ञायामिति किम् ? समदन्ती । स्निग्धदन्ती ॥

विभाषा श्यावारोकाभ्याम् ॥ १४४ ॥

श्याव, अरोक–इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशा

पदमञ्जरी

वयसि दन्तस्य दतृ ॥ द्विदन्निति । ऋकारस्योगित्कार्यार्थत्वाद् 'उगिदचाम्' इति नुम् ॥

स्त्रियां संज्ञायाम् ॥ अच्छन्दोऽर्थमिदम् । *अयोदतीति* । अय इव दन्ता अस्या अयोदती, उगित्त्वान्ङीप् । *समदन्तीति* । 'नासिकोदरोष्ठ' इत्यादिना ङीष् ॥

विभाषा श्यावारोकाभ्याम् ॥ अरोको निर्दीप्तिरिति । 'रुच दीप्तौ', रोचनम्= रोकः, स न विद्यते यस्येति कृत्वा ॥

न्यासः

वयसि दन्तस्य दतृ ॥ द्विदन्निति । ऋकारस्योगित्कार्यार्थत्वाद् 'उगिदचाम्' इति नुम्, हल्ङ्यादिसंयोगान्तलोपौ । **सुदन्तो दाक्षिणात्य इति** । शोभनत्वमिह गम्यते, न वयः ॥

छन्दसि च ॥ अवयोऽर्थम्, असंख्यापूर्वपदार्थञ्च वचनम् । **उभयतोदत इति** शसन्तमेतत् ॥

स्त्रियां संज्ञायाम् ॥ अच्छन्दोऽर्थमेतत् । अय इव दन्ता अस्या **अयोदती** । 'उगितश्च' इति ङीप् ।

समदन्तीति । 'नासिकोदर' इत्यादिना ङीष् ॥

विभाषा श्यावारोकाभ्याम् ॥ 'स्त्रियाम्' इति निवृत्तम् । रोकः=रोचनम्, दीप्तिः ।

Indira Gandhi National Centre for the Arts

भवति विभाषा समासान्तो बहुव्रीहौ । श्यावदन्, श्यावदन्तः । अरोकदन्, अरोकदन्तः । अरोकः=निर्दीप्तिः ।

संज्ञायामित्येव—श्यावदन्तः । अरोकदन्तः ॥

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥

'विभाषा' इत्येव । अग्रान्ताच्छब्दात्, शुद्ध, शुभ्र, वृष, वराह-इत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा 'दतृ' इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे । कुड्मलाग्रदन्, कुड्मलाग्रदन्तः । शुद्धदन्, शुद्धदन्तः । शुभ्रदन्, शुभ्रदन्तः । वृषदन्, वृषदन्तः । वराहदन्, वराहदन्तः ।

अनुक्तसमुच्चयार्थश्चकारः । अहिदन्, अहिदन्तः । मूषिकदन्, मूषिकदन्तः । गर्दभदन्, गर्दभदन्तः । शिखरदन्, शिखरदन्तः ॥

ककुदस्यावस्थायां लोपः ॥ १४६ ॥

ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तोऽवस्थायां गम्यमानायाम् । कालादिकृता वस्तुधर्मा वयःप्रभृतयः=अवस्था इत्युच्यते । असञ्जातं ककुदमस्य असञ्जातककुत् । बाल इत्यर्थः । पूर्णककुत् । मध्यमवया इत्यर्थः । उन्नतककुत् । वृद्धवया इत्यर्थः । स्थूलककुत् । बलवानित्यर्थः । यष्टिककुत् । नातिस्थूलो नातिकृश इत्यर्थः ।

अवस्थायामिति किम् ? श्वेतककुदः ॥

पदमञ्जरी

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ चकारोऽनुक्तसमुच्चयार्थः ।

अहिदन्नित्यादि । *भाष्ये एतन्नाश्रितम्* ॥

ककुदस्यावस्थायां लोपः ॥ *कालादिकृता इति* । आदिशब्देनाहारपरिणामादेर्ग्रहणम् ॥

न्यासः

'रुच दीप्तौ', भावे घञ्, 'चजोः कुघिण्ण्यतोः' इति कुत्वम् । अविद्यमानो रोकोऽस्येत्यरोकशब्दस्य व्युत्पत्तिं हृदि कृत्वा तस्यार्थं दर्शयितुमाह—**अरोको निर्दीप्तिरिति** ॥

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ **ककुदस्यावस्थायां लोपः** ॥ **कालादिकृतेति** । आदिशब्देनाहारादयो गृह्यन्ते ॥

Indira Gandhi National Centre for the Arts

त्रिककुत्पर्वते ॥ १४७ ॥

त्रिककुदि बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते पर्वतेऽभिधेये । त्रीणि ककुदान्यस्य त्रिककुत्पर्वतः । ककुदाकारं पर्वतस्य शृङ्गम्=ककुदमित्युच्यते । न च सर्वस्त्रिशिखरः पर्वतस्त्रिककुत् । किं तर्हि ? संज्ञैषा पर्वतविशेषस्य ।

पर्वत इति किम् ? त्रिककुदोऽन्यः ॥

उद्विभ्यां काकुदस्य ॥ १४८ ॥

उत्, वि—इत्येताभ्यां परस्य काकुदशब्दस्य लोपो भवति बहुव्रीहौ समासे । उद्गतं काकुदमस्य उत्काकुत् । विकाकुत् । तालु= काकुदमुच्यते ॥

पूर्णाद्विभाषा ॥ १४९ ॥

पदमञ्जरी

त्रिककुत् पर्वते ॥ पर्वतेऽन्यपदार्थे मुख्यस्य ककुदस्यासम्भवादाह—*ककुदाकारं शृङ्गमित्यादि* । *न चेत्यादि* । उच्यत इत्यस्यानुषङ्गः । *संज्ञैषेत्यादि* । एतच्च निपातनाल्लभ्यते । एवं च पर्वतग्रहणं विस्पष्टार्थम् ॥

न्यासः

त्रिककुत् पर्वते ॥ अनवस्थार्थमिदम् । पर्वतेऽन्यपदार्थे मुख्यं ककुदं न सम्भवति, उच्यते चेदम्—त्रिककुत् पर्वत इति । तत्र सामर्थ्यात्ककुदाकारे पर्वतशिखरे सादृश्यात् ककुदशब्दो वर्त्तते, तस्येदं ग्रहणं विज्ञायते । अत एवाह—**ककुदाकारमित्यादि** । यद्येवम्, इदं तर्हि यस्य कस्यचित् पर्वतस्य त्रीणि ककुदाकाराणि शृङ्गाणि तस्य सर्वस्य त्रिककुदभिधानं प्राप्नोति ? अत आह–**न चेत्यादि** । 'उच्यते' इति प्रकृतेन सम्बन्धः । **संज्ञैषेत्यादि** । एतेन यस्यैषा संज्ञा त्रिककुच्छब्देनोच्यत इति तद् दर्शयति । एतच्च निपातनात् 'स्त्रियां संज्ञायाम्' इत्यतः संज्ञाग्रहणानुवृत्तेर्लभ्यते । ननु चाभिधेयनियमोऽपि तत एव लभ्यत इति पर्वतग्रहणं न कर्त्तव्यम् ? नैतदस्ति; शैलीयमाचार्यस्य यत् प्रसिद्धेष्वपि नित्यतरेष्वभिधेयनिमित्तमाचष्टे, यथा–'पुष्यसिद्ध्यौ नक्षत्रे' इति, किं पुनर्यत्र प्रसिद्धिर्नास्ति ! सा तु लौकिकी ॥

उद्विभ्यां काकुदस्य ॥ **उत्काकुत्, विकाकुदिति** । अन्त्यस्य लोपे कृते 'वावसाने' इति चर्त्वम् । ननु च 'आदेः परस्य' इत्यादिलोपेन भवितव्यम्, तत् कथमन्त्यस्य भवति ? अन्त्यवचनो ह्यवयववचनोऽपि, स नियतदेशावयवमाचष्ट इत्युक्तम् । तत्र यद्यादेः स्यात्, समासान्तता नोपपद्यते ॥

Indira Gandhi National Centre for the Arts

पूर्णात्परस्य काकुदशब्दस्य विभाषा लोपो भवति बहुव्रीहौ समासे । पूर्णं काकुदमस्य पुर्णकाकुत्, पुर्णकाकुदः ॥

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥

सुहृत्, दुहृत्–इति निपात्यते यथासंख्यं मित्रामित्रयोरभिधेययोः । सुशब्दात्परस्य हृदयशब्दस्य हृद्भावो निपात्यते बहुव्रीहौ, तथा दुःशब्दात्परस्य । शोभनं हृदयमस्य सुहृत् मित्रम् । दुष्टं हृदयमस्य दुर्हृदमित्रम् ।

मित्रामित्रयोरिति किम् ? सुहृदयः कारुणिकः । दुर्हृदयश्चोरः ॥

उरःप्रभृतिभ्यः कप् ॥ १५१ ॥

उरःप्रभृत्यन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति । व्यूढमुरोऽस्य व्युढोरस्कः । प्रियसर्पिष्कः । अवमुक्तोपानत्कः ।

पुमान्, अनड्वान्, पयः, नौः, लक्ष्मीरिति विभक्त्यन्ताः पठ्यन्ते, न प्रातिपदिकानि । तत्रेदं प्रयोजनम्–एकवचनान्तानामेव ग्रहणमिह विज्ञायेत, द्विवचनबहुवचनान्तानां मा भूदिति । तत्र 'शेषाद्विभाषा' इति विकल्प एव भवतीति । द्विपुमान्, द्विपुंस्कः । बहुपुमान्, बहुपुंस्कः ।

उरस् । सर्पिस् । उपानह् । पुमान् । अनड्वान् । नौः । पयः ।

पदमञ्जरी

उरःप्रभृतिभ्यः कप् ॥ *व्यूढोरस्कः*, *प्रियसर्पिष्क इति* । 'सोऽपदादौ', 'इणः षः', उपपूर्वान्नह्यतेः सम्पदादित्वात्कर्मणि क्विप्, उपनद्धा उपानत्, 'नहिवृति' इति दीर्घः, अवमुक्ते उपानहौ येन सोऽवमुक्तोपानत्कः । 'नहो धः', जश्त्वचर्त्वे ॥

विकल्प एव भवतीति । लक्ष्मीशब्दात् 'नद्यृतश्च' इति नित्यः कब् न

न्यासः

पूर्णाद्विभाषा ॥ **सुहृद्दुर्हृदौ मित्रामित्रयोः** ॥ **उरःप्रभृतिभ्यः कप्** ॥ 'शेषाद्विभाषा' इति कपि सिद्धे नित्यार्थं वचनम् । **प्रियसर्पिष्क इति** । 'इणः षः' इति विसर्जनीयस्य षकारः । अवमुक्ते उपानहौ येन स **अवमुक्तोपानत्क इति** । 'नहो धः' इति विहितस्य धकारस्य 'झलां जशोऽन्ते' इति जश्त्वम्—दकारः, तस्य 'खरि च' इति चर्त्वम्–तकारः ।

किं पुनरेतद्विभक्त्यन्तानां पाठे प्रयोजनम् ? इत्याह–**तत्रेत्यादि** । तत्रेत्यनेन विभक्त्यन्तानां पाठः प्रत्यवमृश्यते ।

Indira Gandhi National Centre for the Arts

लक्ष्मीः । दधि । मधु । शालिः । * अर्थान्नञः * । अनर्थकः । उरःप्रभृति ॥

इनः स्त्रियाम् ॥ १५२ ॥

इन्नन्ताद्बहुव्रीहेः कप् प्रत्ययो भवति स्त्रियां विषये । बहवो दण्डिनोऽस्यां शालायां बहुदण्डिका शाला । बहुच्छत्त्रिका । बहुस्वामिका नगरी । बहुवाग्मिका सभा ।

स्त्रियामिति किम् ? बहुदण्डी राजा । बहुदण्डिकः । 'शेषाद्विभाषा' इत्येतद्भवति ।

नद्यृतश्च ॥ १५३ ॥

नद्यन्ताद्बहुव्रीहेर्ऋकारान्ताच्च कप् प्रत्ययो भवति । बह्व्यः कुमार्योऽस्मिन्देशे बहुकुमारिको देशः । बहुब्रह्मबन्धूकः । ऋतः खल्वपि—बहुकर्तृकः ।

तकारः मुखसुखोच्चारणार्थः ॥

शेषाद्विभाषा ॥ १५४ ॥

पदमञ्जरी

भवति; एकवचनान्तपाठस्य नियमार्थत्वात् । *अर्थान्नञ इति* । नञः परो योऽर्थशब्दस्तदन्ताद्बहुव्रीहेर्नित्यं कब्भवति । नास्यार्थोऽस्ति *अनर्थकः* ॥

इनः स्त्रियाम् ॥ 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' ॥

नद्यृतश्च ॥ *नद्यन्ताद्बहुव्रीहेरिति* । अत्रान्तशब्द उत्तरपदे वर्त्तते, नद्युत्तरपदाद्बहुव्रीहेरित्यर्थः । यद्वा—बहुव्रीह्यर्थमुत्तरपदं बहुव्रीहिः, तस्मान्नद्यन्तादित्यर्थः । किं सिद्धं भवति ? बहुग्रामणीर्नगरी, बहुखलपूर्नगरीत्यत्र कब् निवर्त्तितो भवति ॥

न्यासः

अर्थान्नञ इति । नञ्परो योऽर्थशब्दस्तदन्ताद्बहुव्रीहेः कब्भवति । नास्त्यर्थोऽस्येति **अनर्थकः** ॥

इनः स्त्रियाम् ॥ इदमपि पूर्ववत् कपि सिद्धे नित्यार्थमेव । **बहुदण्डिकेति** । 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः ॥

नद्यृतश्च ॥ **शेषाद् विभाषा** ॥ शेषः कबपेक्षो वा स्याद्-यस्माद् बहुव्रीहेः कब्न विहितः स शेष इति ? समासान्तापेक्षो वा—यस्माद् बहुव्रीहेः समासान्तो न विहितः स शेष इति ? तत्र यदि कबपेक्षः शेषः स्याद्—अनृचः, व्याघ्रपात्, सुगन्धिरित्यत्रापि स्यात् । न ह्यतः केनचित् कब्विहित इति कबपेक्षे शेषे दोषं दृष्ट्वा समासान्तापेक्षया

Indira Gandhi National Centre for the Arts

यस्माद्बहुव्रीहेः समासान्तो न विहितः स शेषः, तस्माद्विभाषा कप्प्रत्ययो भवति । बह्व्यः खट्वा अस्मिन् बहुखट्वकः, बहुमालकः, बहुवीणकः । बहुखट्वाकः, बहुमालाकः, बहुवीणाकः । बहुखट्वः, बहुमालः, बहुवीणः ।

कथमनृक्कं साम, बह्वृक्कं सूक्तमिति, यावता विहितोऽत्र सामान्येन समासान्तः 'ऋक्पूः' इति ? नैतदस्ति; विशेषे स इष्यते— 'अनृचो माणवको ज्ञेयो बह्वृचश्चरणाख्याम्' इति ।

शेषादिति किम् ? प्रियपथः । प्रियधुरः ॥

पदमञ्जरी

शेषाद्विभाषा ॥ *यस्माद्बहुव्रीहेरिति* । कर्मणि ल्यब्लोपे एषा पञ्चमी, बहुव्रीहिमाश्रित्येत्यर्थः, तेन यत्राप्यादेशः समासान्तः—व्याघ्रपात्, सुगन्धिः, कुण्डोध्नीति; असावपि शेषो न भवति । प्रत्ययप्रायत्वाद्वा समासान्तस्य 'यस्मात्' इत्युक्तम् ।

इह शेषः कबपेक्षो वा स्याद्, अनन्तरो यो बहुव्रीह्यधिकारस्तदपेक्षो वा, समासान्तमात्रापेक्षो वा–इति त्रयः पक्षाः सम्भवन्ति । तत्राद्ये पक्षे–व्याघ्रपात्, सुगन्धिः, द्विदशाः, अनृचः, विधुर इत्यादौ नित्यकब्विषयवर्जं सर्वत्र प्रसज्येत । शेषग्रहणं चानर्थकम्, न हि नित्यकब्विषये विकल्पप्रसङ्गः; नित्यकविधेरानर्थक्यप्रसङ्गात् । द्वितीयेऽपि द्विदशा इत्यादौ स्यादेव प्रसङ्ग इति मन्यमानस्तृतीयं पक्षमाश्रयति—*समासान्तो न विहित इति* । *बहुखट्वक* इत्यादौ 'आपोऽन्यतरस्याम्' इति ह्रस्वः, *बहुखट्व* इत्यादौ 'गोस्त्रियोरुपसर्जनस्य' इति ।

कथमित्यादि । यदि समासान्तापेक्षः शेष इति प्रश्नः । *विशेषे स इष्यत इति* । ततश्च विषयान्तरे सूक्ते सामनि च बहुव्रीहेः समासान्तापेक्षं शेषत्वमस्त्येवेति

न्यासः

शेष इति दर्शयन्नाह—**यस्माद् बहुव्रीहेः समासान्तो न भवति स शेष इति** । कथं ज्ञायते—समासान्तापेक्षः शेष इति ? शेषग्रहणात् । तत्र यदि कब्पेक्षः शेषः स्यात्, शेषग्रहणमनर्थकं स्यात् । आरम्भसामर्थ्यादेव हि शेषविषय एव विकल्पो भविष्यति; अन्यथा यदि यतोऽपि पूर्वैर्विधिवाक्यैः कब्विहितस्ततोऽप्यनेन विभाषा विधीयते, विधिवाक्यानामानर्थक्यमापद्येत । तस्माच्छेषग्रहणात् समासान्तापेक्षः शेषो विज्ञायते । **बहुखट्वक इति** । 'आपोऽन्यतरस्याम्' इति ह्रस्वः । बहुखट्व इत्यत्रापि 'गोस्त्रियोरुपसर्जनस्य' इति ।

कथमित्यादि । यदि समासान्तापेक्षः; शेषः अनृक्कं साम, बह्वृक्कं सूक्तमित्यत्र कब्न सिध्यतीत्यभिप्रायः । **विशेषे स इष्यत इति** । स ह्यकारः समासान्तो विशेषे

Indira Gandhi National Centre for the Arts

न संज्ञायाम् ॥ १५५ ॥

संज्ञायां विषये बहुव्रीहौ समासे कप् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिद्धचते । विश्वे देवा अस्य विश्वदेवः । विश्वयशाः ॥

ईयसश्च ॥ १५६ ॥

ईयसन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति । सर्वा प्राप्तिः प्रतिषिध्यते । बहवः श्रेयांसोऽस्य बहुश्रेयान् । 'शेषाद्विभाषा' इत्यस्य प्रतिषेधः । ह्रस्वत्वमपि न भवति; 'ईयसो बहुव्रीहौ पुंवत्' इति वचनात् ।

पदमञ्जरी

भावः । किमर्थं पुनः शेषग्रहणम्, यावता यत्र समासान्ता विहितास्तत्र त एव बाधका भविष्यन्ति, अनवकाशा विधयो बाधका भवन्ति, सावकाशाश्च ते, कोऽवकाशः ? विभाषा कप्, यदा न कप् सोऽवकाशः–कपोऽप्यन्याः प्रकृतयः; विशेषप्रकृतिभ्य उभयप्रसङ्गे परत्वात्कप् स्यात् । तस्माच्छेषग्रहणम् ॥

ईयसश्च ॥ *सर्वा प्राप्तिः प्रतिषिद्धयत इति* । न तु 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति शेषलक्षणस्यैव कपः प्रतिषेध इति सर्वशब्दस्यार्थः । एतच्च शेषादित्येतस्य निवृत्तत्वात्कब्मात्रस्यानुवृत्तेर्लभ्यते । *बहुश्रेयसीति* । लिङ्गविशिष्टग्रहणादत्र प्रतिषेधः । यथात्र सोर्हल्ङ्यादिलोपः, तथा तत्रैव वक्ष्यामः । *ह्रस्वत्वमपि न भवतीति* । 'गोस्त्रियोरुपसर्जनस्य' इति प्राप्तम् । कस्मात् ? इत्याह–*ईयसो बहु-*

न्यासः

माणवे चरणाख्यायां चेष्यत इति तत्राकारो विहितः । न चापि तत्रैव विशेषे कब् विहितः, किं तर्हि ? विषयान्तरे—सामनि, सूक्ते च । तत्र बहुव्रीहेः समासान्तापेक्षः शेषः । तेन च प्रियपथः, प्रियधुर इति 'ऋक्पूरब्धूः' इत्यादिनाऽकारः समासान्तः । अथ किमर्थं शेषग्रहणम्, यावता याभ्यः प्रकृतिभ्यः समासान्ता विहिताः, ताभ्यस्त एव बाधका भविष्यन्ति ? नैतदस्ति; निरवकाशा हि विधयो बाधका भविष्यन्ति, सावकाशाश्च समासान्ताः । कोऽवकाशः ? प्रतिपदोपात्तप्रकृतयः, याभ्यः समासान्ता अर्थविशेषे समासविशेषं प्रति प्रतिपदमुपादाय विहिताः सोऽवकाशः; विशेषप्रकृतिभ्यः प्रसङ्गे सत्युभयप्राप्तौ परत्वात् कप्रत्ययः स्यात् । तस्माच्छेषग्रहणं कर्त्तव्यम् ॥

न संज्ञायाम् ॥ **ईयसश्च** ॥ **सर्वा प्राप्तिः प्रतिषिध्यत इति** । ननु 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति शेषलक्षणस्यैव कपः प्रतिषेधः प्राप्नोति ? नैष दोषः; कबत्रानुवर्तते, न शेषादिति । तेनायं कब्मात्रस्य प्रतिषेधो भविष्यति । **बहवः श्रेयांस इति** । 'द्विवचनविभज्योपपदे' इत्यादिनेयसुन्, 'प्रशस्यस्य श्रः' इति श्रः । **ह्रस्वत्व-**

Indira Gandhi National Centre for the Arts

वन्दिते भ्रातुः ॥ १५७ ॥

वन्दितेऽर्थे यो भ्रातृशब्दो वर्तते तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति। वन्दितः=स्तुतः, पूजित इत्युच्यते। शोभनो भ्राताऽस्य सुभ्राता।

वन्दित इति किम्? मूर्खभ्रातृकः। दुष्टभ्रातृकः॥

ऋतश्छन्दसि ॥ १५८ ॥

ऋवर्णान्ताद् बहुव्रीहेश्छन्दसि विषये कप् प्रत्ययो न भवति। हता माताऽस्य हतमाता। हतपिता। हतस्वसा। सुहोता॥

नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥

स्वाङ्गे यौ नाडी-तन्त्रीशब्दौ तदन्ताद्बहुव्रीहेः कप् प्रत्ययो न भवति। बह्व्यो नाड्योऽस्य बहुनाडिः कायः। बहुतन्त्रीर्ग्रीवा। धमनीवचनस्तन्त्रीशब्दः।

पदमञ्जरी

व्रीहावित्यादि। पुंवद्वचनेनात्र न स्त्रीप्रत्ययस्य निवृत्तिर्विवक्षिता, किं तर्हि? ह्रस्वप्रकरणात्तदभावः। तथा च 'गोस्त्रियोः' इत्यत्र वृत्तौ-'ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः' इत्येवोक्तम्॥

वन्दिते भ्रातुः॥ वन्दितः स्तुत इति। यद्यपि 'वदि अभिवादनस्तुत्योः' इत्यभिवादनेऽपि वदिः पठ्यते, तथापि व्याख्यानात्स्तुत्यर्थस्यैव ग्रहणमिति दर्शयति। तेन वन्दितभ्रातृक इत्यत्र कब्भवत्येव॥

नाडीतन्त्र्योः स्वाङ्गे॥ नाडीशब्दो जातिलक्षणङीषन्तः। तन्त्रीशब्दः 'अवितृ-

न्यासः

मपि न भवतीति। 'गोस्त्रियोरुपर्जनस्य' इति ह्रस्वत्वं प्राप्नोति, तदपि न भवति। कस्मान्न भवति? इत्याह—ईयसो बहुव्रीहेरित्यादिना। नात्र पुंवद्वचनेन स्त्रीप्रत्ययस्य निवृत्तिरभिप्रेता, किं तर्हि? ह्रस्वत्वप्रकरणात् तदभावः। एतदुक्तं भवति—यथा पुंवद्भावे सतीकारस्य ह्रस्वो न भवति, एवमीयसः परस्य स्त्रीप्रत्ययस्यापि न भवति॥

वन्दिते भ्रातुः॥ 'नद्यृतश्च' इति प्राप्तस्य कपोऽयं प्रतिषेधः। 'वदि अभिवादनस्तुत्योः' इति यद्यपि वदिरभिवादने वर्त्तते, तथापीह स्तुतावेव वर्त्तमान आश्रीयते, अत एवाह—**वन्दितः स्तुत इति।**

ऋतश्छन्दसि॥ अयमपि पूर्ववत् प्राप्तस्य कपः प्रतिषेधः॥

नाडीतन्त्र्योः स्वाङ्गे॥ अयमपि 'नद्यृतश्च' इति प्राप्तस्य कपः प्रतिषेधः। **स्वाङ्गमिह** पारिभाषिकं गृह्यते। **बहुनाडिरिति।** पूर्ववदुपसर्जनह्रस्वत्वम्। **बहुतन्त्रीरिति।**

Indira Gandhi National Centre for the Arts

स्वाङ्गे इति किम् ? बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा ॥

निष्प्रवाणिश्च ॥ १६० ॥

'निष्प्रवाणिः' इति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते । प्रोयतेऽस्यामिति प्रवाणी । प्रवयन्ति तयेति वा प्रवाणी । करणसाधनोऽयं ल्युट् । तन्तुवायशलाका भण्यते । निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः । निष्प्रवाणिः कम्बलः=अपनीतशलाकः समाप्तवानः प्रत्यग्रो नवक उच्यते ॥

इति श्रीवामनविरचितायां काशिकावृत्तौ

पञ्चमाध्यायस्य चतुर्थः पादः

पदमञ्जरी

स्त्रृतन्त्रिभ्य ईः' इतीकारान्तः । *बहुनाडिरिति* । उपसर्जनह्रस्वम् । *बहुतन्त्रीरित्यत्र* तु 'कृत्स्त्रियाः प्रतिषेधः' इति वचनान्न भवति ॥

निष्प्रवाणिश्च ॥ *प्रोयतेऽस्यामिति प्रवाणीति* । वेञोऽधिकरणे ल्युट्, 'कृत्यचः' इति णत्वम् ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यां

पञ्चमस्याध्यायस्य चतुर्थं पादः

न्यासः

अत्र ह्रस्वत्वं न भवति; 'कृतः स्त्रियाः प्रतिषेधो वक्तव्यः' इति वचनात् । तथा चोक्तम् (१।२।४८)—'स्त्रीग्रहणं स्वरयिष्यति' इति ॥

निष्प्रवाणिश्च ॥

इति बोधिसत्त्वदेशीयाचार्यश्रीजिनेन्द्रबुद्धिपादविरचितायां

काशिकाविवरणपञ्जिकायां पञ्चमस्याध्यायस्य

चतुर्थः पादः

—:❀❀❀:—

❀ समाप्तोऽयं पञ्चमोऽध्यायः ❀

Indira Gandhi National Centre for the Arts

अथ षष्ठाध्याये प्रथमः पादः

एकाचो द्वे प्रथमस्य ॥ १ ॥

अधिकारोऽयम् । 'एकाचः' इति च, 'द्वे' इति च, 'प्रथमस्य' इति च त्रितयमधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः प्राक्सम्प्र-

पदमञ्जरी

एकाचो द्वे प्रथमस्य ॥ इह यद्यपि स्वार्थत्वे सम्भवति पारार्थ्यमयुक्तम्, विधेयकार्यिणोर्द्वयोर्निर्देशात् सम्भवति च स्वार्थत्वम्, तथापि 'लिटि धातोः' इत्यादौ विधेयानिर्देशेन वैयर्थ्यप्रसङ्गान्नायम् 'अण्कुटिलिकायाः' इत्यादिवत्केवलो विधिः, नापि 'शेषे' इत्यादिवल्लक्षणं चाधिकारश्च । तथा हि सति सर्वेषामेव शब्दानां प्रथमस्यैकाचोऽनेन द्विर्वचने सिद्धे 'लिटि धातोः' इत्यादि व्यर्थं स्यात् । धातोर्लिट्येव, लिटि धातोरेव–इति नियमान्न वैयर्थ्यमिति चेत् ? न; विधिनियमसम्भवे विधेरेव ज्यायस्त्वात् । अस्य हि पारार्थ्येऽवश्यम्भाविनि सति यथा तेषां विधित्वं तथास्य वर्णनं युक्तमतः परार्थ एवायम् । तत्रापि न परिभाषा–द्विर्वचनं विधीयमानं प्रथमस्यैकाचो वेदितव्यमिति; एवं हि सति 'सर्वस्य द्वे' इत्यत्रैवास्य व्यापार इति तत्रैवैकाचः प्रथमस्येति वाच्यं स्यात् । 'लिटि धातोः' इत्यादिकं च विधेयानिर्देशाद्व्यर्थं स्यात् । अतः पारिशेष्यात्स्वरितत्वाच्चाधिकार एवायमिति निश्चित्याह—*एकाच इति चेति ।* अधिकारोऽयमिति वक्तव्ये पृथक् स्वरितत्वप्रदर्शनार्थमेवमुक्तम । *एतत्त्रितयमिति ।* तस्य प्रयोजनम्—यत्र यदपेक्षितं तत्र तस्य सम्बन्धः, यथा—'अजादेर्द्वितीयस्य' इत्यत्र 'एकाचो द्वे' इति, 'उभे अभ्यस्तम्' इत्यत्र 'द्वे' इति, लिटि धातोरित्यादौ सर्वं सम्बध्यते । *इत उत्तरमित्यादि ।*

न्यासः

एकाचो द्वे प्रथमस्य ॥ इह केचित् स्वार्था एव विधयो भवन्ति, न परार्थाः, तद्यथा–'अण्कुटिलिकायाः' इति कुटिलिकाशब्दादण् विधीयमानः स्वार्थो भवति । केचित् पुनः स्वार्थाः, परार्थाश्च, तद्यथा—'पदरुजविशस्पृशो घञ्' इति पदादिभ्यो घञ् विधीयमानः स्वार्थो भवति, स्वरितलिङ्गासङ्गादुत्तरेषु योगेष्वनुवर्त्तमानः परार्थश्च । केचित् पुनः परार्था एवाधिकारा भवन्ति, न स्वार्थाः, यथा–'समर्थानां प्रथमाद्वा' इति; तत् किमयं स्वार्थ एव ? अथोभयार्थ एवाधिकारः ? उत परार्थ एवेति ? सन्देहापनयनाय परार्थतामेवास्य दर्शयितुमाह–**एकाच इति चेत्यादि** । एतद्ग्रहणकं वाक्यम्, अस्य च **इत उत्तरमित्यादि** विवरणम् । सिंहावलोकितन्यायेन पूर्वत्राप्यधिकाराणामनुवृत्तिर्भवति, अतस्तन्निवृत्त्यर्थमित उत्तरमित्युक्तम् । प्रागिति । अनेनाधिकाराणा-

Indira Gandhi National Centre for the Arts

सारणविधानात् तत्र 'एकाचः प्रथमस्य द्वे भवतः' इत्येवं तद्वेदितव्यम् ।

वक्ष्यति–'लिटि धातोरनभ्यासस्य' इति । तत्र धातोरवयवस्यानभ्यासस्य प्रथमस्यैकाचो द्वे भवतः । जजागार । पपाच । इयाय । आर ।

'एकाचः' इति बहुव्रीहिनिर्देशः । एकोऽच् यस्य सोऽयमेकाच्—

पदमञ्जरी

अनन्तरोक्तस्यैव विवरणम् । *प्राक् सम्प्रसारणविधानादिति* । तत आरभ्य तु नास्य सम्बन्धः; विधेयान्तरनिर्देशात्स्वरिते कृते नाधिकार इति वा व्याख्यानात् ।

सामान्येनोक्तमुदाहरणनिष्ठं दर्शयति—*वक्ष्यतीति* । अत्र यदि 'धातोरेकाचः' इति सामानाधिकरण्येन सम्बन्धः स्यात्, पचिप्रभृतीनामेव स्यात्, न जागर्त्यादीनाम् । प्रथमग्रहणं चानर्थकं स्यात्, न ह्येकाचां धातूनां द्वितीयादिरेकाजस्ति । न च प्रथमस्य धातोरिति सम्बन्धः । तथा हि सति धातुपाठे प्रथमपठितस्य भवतेरेव स्यात्, ततश्च भवतिग्रहणमेव कर्तव्यं स्यात् । अथैकाचो धातोः प्रथमस्य वर्णस्येति सम्बन्धः ? तदयुक्तम्; सहनिर्दिष्टयोः सामानाधिकरण्यस्य स्वतः प्राप्तस्य त्यागायोगात् । अतो वैयधिकरण्येन सम्बन्ध इत्याह—*धातोरवयवस्येति* । *द्वितीयस्य चेति* । यद्यप्यत्र द्वितीयग्रहणं नास्ति, तथापि 'लिटि धातोः' इत्यत्र त्वधिकृतमस्ति, तस्य चार्थः प्रदर्श्यते इति नासङ्गतं किञ्चित् । *जजागार*–इत्यादीनि मुख्यगौणतया क्रमेणोदाहरणानि ।

एकाच इति यद्ययं तत्पुरुषः स्यात्तदा 'धातोः' इत्यनेन सामानाधिकरण्यं

न्यासः

मवधिं दर्शयति । इतस्त्ववधेरुत्तरत्रानुवृत्तिरस्वरितत्वाद् विज्ञेया । कस्य पुनः 'एकाचो द्वे भवतः' इत्येवं तद् वेदितव्यम् ? इत्यत आह–वक्ष्यतीत्यादि । धातोरित्येकाच इत्यनेन समानाधिकरणा षष्ठी स्यात्, व्यधिकरणा वा; तत्र यद्येषा धातोरेव समानाधिकरणा षष्ठी स्यात्, तदा पचादीनामेव द्विर्वचनं स्यात्, न जागर्त्यादीनाम्, न हि तत्रैकाच इति मन्यमानो नैवैकाच इति समानाधिकरणा षष्ठी–धातोरेकाच इति, अपि त्ववयवयोगा–धातोर्योऽवयव एकाच इति दर्शयितुमाह—**धातोरवयवस्येति** । **जजागारेत्यत्र** जागित्येतद् द्विरुच्यते, **पपाचेत्यत्र** पच्छब्दः; पूर्वत्र 'अचो ञ्णिति' इति वृद्धिः, उत्तरत्र 'अत उपधायाः' इति । **इयायेति** । 'इण् गतौ', 'अचो ञ्णिति' इति वृद्धौ कृतायां 'द्विर्वचनेऽचि' इति स्थानिवद्भावादिकारो द्विरुच्यते, आयादेशः, 'अभ्यासस्यासवर्णे' इतीयङ् । **आरेति** । 'ऋ गतौ', ऋ इत्येतस्य द्विर्वचनम्, 'उरत्' इत्यत्त्वम् रपरत्वम्, 'अत आदेः' इति दीर्घः, सवर्णदीर्घत्वञ्च ।

एकाच इति तत्पुरुषोऽयं वा स्याद्–एकश्चासावच्चेति एकाच्, बहुव्रीहिर्वा—

Indira Gandhi National Centre for the Arts

इत्यवयवेन विग्रहः । तत्र समुदायः समासार्थः । अभ्यन्तरश्च समु-

पदमञ्जरी

चेत् ? इयाय आरेत्यादावेव स्याद्, वैयधिकरण्ये तु पपाचेत्यादिषु भवदपि द्विर्वचनमज्मात्रस्यैव स्यात्, ततश्च 'हलादिः शेषः', 'शर्पूर्वाः खयः', 'लिट्यभ्यासस्योभयेषाम्' इत्याद्यनुपपन्नं स्यात् । एकग्रहणं चानर्थकम, प्रथमस्याच इति विशेषणादेकस्य च धातोरनेकप्रथमाजसम्भवादच इत्येकत्वं वा विवक्षिष्यते, किमेकग्रहणेन ? तस्माद् बहुव्रीहिरयम् । तदाह—*एकाच इति बहुव्रीहिनिर्देश इति* । बहुव्रीहिणा विवक्षितस्यार्थस्य प्रतिपादनं बहुव्रीहेर्वा उच्चारणं बहुव्रीहिनिर्देशः । विग्रहप्रदर्शनं विस्पष्टप्रतिपत्त्यर्थम् । यदि बहुव्रीहिनिर्देशस्ततो बहुव्रीहेरन्यपदार्थप्रधानत्वाद्यथा 'चित्रगुरानीयताम्' इत्युक्ते यस्य ता गावः स एवानीयते न चित्रा गावः, तद्वदत्रोपलक्षितं तदुभयपार्श्ववर्त्ति व्यञ्जनद्वयमेव द्विरुच्येत, न तूपलक्षणभूतोऽजित्यत आह—*तत्रेति* । भवति वै बहुव्रीहावपि क्वचिद्वर्तिपदार्थस्यापि कार्ययोगः, तद्यथा—शुक्लवाससमानयेति मत्वर्थे बहुव्रीहिः, तत्र यथा दण्डी, विषाणीति संसर्गे मत्वर्थीय उत्पन्ने तस्य द्विष्ठत्वाद् गुणस्यापि कार्ययोगः; तद्वद् बहुव्रीहावपि यत्र संसर्गो वाच्यस्तत्राविरुद्धो गुणस्यापि कार्ययोगः । *अभ्यन्तरश्चेति* । अन्तर्भूत इत्यर्थः । *आभ्यन्तरमिति* पाठे

न्यासः

एकोऽज् यस्येति ? तत्र यद्ययं तत्पुरुषः स्यात्, इणादीनामेव द्विरुक्तिः स्यात्—इयाय, आरेत्येवमादौ; पचादीनां तु पपाचेत्यादौ न स्यात्, तेषामज्झल्समुदायात्मकत्वादित्येतन्मनसि कृत्वाऽऽह—**एकाच इति बहुव्रीहिनिर्देशोऽयमिति** । बहुव्रीहिणा विवक्षितस्यार्थस्य निर्देशः=कथनम् । बहुव्रीहेर्निर्देशः=कथनम्, उच्चारणं वा बहुव्रीहिनिर्देशः । कुतः पुनरेतदवसितम्—बहुव्रीहेर्निर्देशोऽयमिति ? 'हलादिः शेषः', 'शर्पूर्वाः खयः' इत्येवमादिलिङ्गात् । ननु च तत्पुरुषस्यापि लिङ्गमस्ति—'दीर्घ इणः किति' इतीणोऽभ्यासस्य दीर्घविधानम् ? नैतदस्ति; बहुव्रीहावपि ह्यस्मिन् व्यपदेशिवद्भावादिणो द्विर्वचनेऽभ्यासस्य दीर्घविधानमुपपद्यत एव, न तु तत्पुरुषेऽस्मिन् हलादिशेषादिकार्यमुपपद्यते; पचादीनामज्झल्समुदायानां द्विर्वचनानुपपत्तेः । तस्माद् बहुव्रीहेरेव लिङ्गमस्ति, न तत्पुरुषस्येति बहुव्रीहिनिर्देश एवायम् । यद्येवम्; बहुव्रीहेरेवान्यपदार्थप्रधानत्वादुपलक्षणविनिर्मुक्तस्य शुद्धस्यैवान्यपदार्थस्य बहुव्रीहिणाभिधानादचावयवेन य उपलक्षितोऽन्यपदार्थस्तस्यैवानच्कस्य द्विर्वचनं प्राप्नोति, न तूपलक्षणभूतस्यापि । न ह्युपलक्षणं कार्योपयोगि भवति । तथा हि—यथा चित्रगुरानीयतामित्युक्ते यस्य चित्रा गावः सन्ति स एवानीयते, न तूपलक्षणभूता गावोऽपि । अत एव तस्य निरासाय तद्गुणसंविज्ञानोऽयं बहुव्रीहिरिति दर्शयन्नाह—तत्रेत्यादि । **समुदायः समासार्थ इति** । सह तेनोपलक्षणभूतेनाचावयवेन समुदाय एवान्यपदार्थ इत्यर्थः । **अभ्यन्त-**

Indira Gandhi National Centre for the Arts

दायेऽवयवो भवतीति साच्कस्यैव द्विर्वचनं भवति । एवं च—पच् इत्यत्र येनैवाचा समुदाय एकाच्, तेनैव तदवयवोऽच्छब्दः पशब्दश्च । तत्र पृथगवयवैकाचो न द्विरुच्यन्ते, किं तर्हि ? समुदायैकाजेव ।

तथा हि—सकृच्छास्त्रप्रवृत्त्या सावयवः समुदायोऽनुगृह्यते ।

पदमञ्जरी

अभ्यन्तरम्=मध्यम्, तत्र भवमाभ्यन्तरम् । *साच्कस्यैव द्विर्वचनं भवतीति* । यथा तत्सन्निहितमवयवान्तरं द्विरुच्यते, तथोपलक्षणीभूतोऽप्यजित्यर्थः । अत्र च ज्ञापकम् 'दीर्घोऽकितः' इत्यादि । चोदयति–*एवं च पचित्यत्रेति* । *तेनैव तदवयवोच्छब्दः पशब्दश्चेति* । चकारादकारश्च व्यपदेशिवद्भावादेकाजेव, यथैवाङ्गुल्या देवदत्तोऽङ्गुलिमांस्तथा हस्तोऽपि, तद्वदत्रापि । ततश्च सर्वेषामेव तेषां द्विर्वचनप्रसङ्ग इति शेषः । नन्वर्थवद्ग्रहणे नानर्थकस्येति समुदायस्यैव भविष्यति, नावयवानाम् । नन्वेवं जागर्त्यादीनां न स्यात्, किञ्च यत्र 'शे' इत्यादौ विशिष्टं शब्दस्वरूपं गृह्यते तत्रैवेयं परिभाषा, अत्र तु 'धातोरवयवस्यैकाचः' इति तटस्थेनोपलक्षणेन जाग्, पच्–इत्येवमादिकं गृह्यते, न तु स्वरूपेणेति नेह तस्याः प्रवृत्तिः ? परिहरति—*तत्रेति* ।

तेषु समुदायादिष्वेकाज्ञु मध्येऽवयवैकाचः प्रथमा न द्विरुच्यन्ते, कुतः ? इत्याह—*तथा हीत्यादि* । अयमभिप्रायः—किमेकस्मिन्नेव प्रयोगे युगपच्च सर्वप्रयोगश्चोद्यते ? पर्यायेण वा ? किं वा प्रयोगभेदेन कस्यचित् क्वचनेति ? न

न्यासः

श्चेति । तदन्तर्भूत इत्यर्थः । चशब्दोऽवधारणे । अभ्यन्तर एवेत्यर्थः । इतिकरणो हेतौ । यस्मात् समुदाये समासार्थेऽवयवोऽभ्यन्तरो भवति, तस्मात् साच्कस्यैव द्विर्वचनं भवति । लोकेऽपि क्वचिदुपलक्षणस्य समासेऽन्तर्भावात् कार्योपयोगित्वं दृष्टमेव, यथा शुक्लवाससमानयेत्युक्ते सहैव शुक्लेन वाससानीयते । पचित्यत्र येनैवाचा समुदाय एकाच् तेनैव तदवयवोऽप्यच्छब्दः पशब्दश्चेति, ततश्चावयवानामपि प्रत्येकं द्विर्वचनं प्राप्नोति । यथा येनैव हस्तेनावयवेन बाहुर्हस्तवान् भवति, तेनैव देवदत्तोऽपि हस्तवान् भवति; तथा पचतौ धातौ येनैवाकारेण पच्छब्दः समुदाय एकाच् तेनैव तदवयवोऽप्यच्छब्दः पशब्दश्चेति । ततश्चावयवानामपि प्रत्येकं द्विर्वचनं प्राप्नोत्येव । द्विर्वचनञ्च कार्यिण एकाचः; सामान्येन निर्देशात् । एवञ्च समुदायस्य तदवयवानाञ्चैकाचां पृथग्द्विर्वचने कृतेऽनिष्टं रूपं स्यात् । अत एतद् द्वेष्यमपाकर्तुमाह—**तत्रेत्यादि** । तेषु समुदायेष्वेकाक्षु मध्ये पृथगवयवैकाचो न द्विरुच्यन्ते । किं तर्हि ? समुदायैकाजेव । अवयवैकाजिति कर्मधारयः । **समुदायैकाजिति** । अयमपि कर्मधारय एव ।

कुतः पुनरयं सामान्याभिधाने विशेषो लभ्यते ? इत्यत आह—**तथा हीत्यादि** ।

पदमञ्जरी

तावदाद्य कल्पः, प्रमित्यनुष्ठानयोर्द्वयोरप्यसम्भवात् । तथा हि—एकाच्त्वेन निरूपितं द्विर्वचनं प्रमातव्यम्, न चैकोऽवयवो युगपदनेकावयवत्वेन शक्यो निरूपयितुम्, तत्कथं युगपत्प्रमीयताम्, प्रमितं वा कथमनुष्ठीयताम् ! न ह्येकस्मिन्नेकाचि द्विरुच्यमाने तदैवान्य एकाच्छक्यो द्विर्वक्तुम्; वाचः क्रमभावित्वात् । नापि द्वितीयः; 'अनभ्यासस्य' इति प्रतिषेधादनवस्थापाताच्च । तस्मात्प्रयोगभेदेन सर्वप्रसङ्ग इत्येष एव पक्षः सम्भवति । तत्र 'णिजिर् शौचपोषणयोः' इत्यस्य श्लौ यदा निशब्दस्य द्विर्वचनम्, तदा नेनेक्ति, नेनिक्त इत्यत्र न कश्चिद्दोषः । नेनिजति, अनेनिजुः, नेनिजदित्यत्र 'अदभ्यस्तात्', 'सिजभ्यस्तविदिभ्यश्च', 'नाभ्यस्ताच्छतुः' इत्यङ्भावजुसभावनुम्प्रतिषेधा न स्युः; जकारेण व्यवधानात्, इकारस्येच्छब्दस्य च द्विर्वचने रूपमेव न सिध्यतीत्येष एव दोषः ? तस्य परिहारः—'शास्त्रहानिप्रसङ्गात्' इति । अवयवे हि द्विरुच्यमानेऽवयवान्तरविषयसमुदाविषयं च शास्त्रं हीयते । ननु शास्त्रेण प्रमितमेव यदि नानुष्ठीयेत, स्याच्छास्त्रहानिः, अत्र तु पर्यायेण प्रतीयत इत्युक्तम्, तच्चानुष्ठितमेव कथं शास्त्रहानिः ? अङ्ग तु भवानाचष्टाम्—पशब्दे द्विरुच्यमाने चकारः किमिति न द्विरुच्यते, तदा तद्द्विर्वचनस्याप्रतीतत्वादिति चेत्किमिति न प्रतीयते, तेन सहैकाच्त्वेनानिरूपितत्वादितिचेत्किमिति न निरूप्यते ? मौनमत्रोत्तरम्, तस्माद्यस्मिन् प्रयोगे यच्च यावच्च प्रथमैकाच्त्वेन शक्यते निरूपयितुम्, तस्य सर्वस्य द्विर्वचनं प्रमातव्यमनुष्ठातव्यं च; अन्यथा तु क्रियमाणं प्रतीत्यनुष्ठानयोरुभयोरपि शास्त्रहानिमावहति । तस्मात्समुदायस्य द्विर्वचनमिति । न चात्रापि पक्षेऽवयवविषये शास्त्रहानिः; अवयवात्मकत्वात्समुदायस्य, न खल्ववयवानां द्विर्वचनमकृत्वा समुदायः शक्यो द्विर्वक्तुम्, तद्यथा—वृक्षः प्रचलन्सहावयवैः प्रचलति ।

न्यासः

यद्यपि समुदायोऽवयवश्चैकाच्, तथापि यस्य द्विर्वचने कृते सर्वेषामनुग्रहो भवति तस्यैव द्विर्वचनं युक्तम् । एवं हि शास्त्रहानिर्न भवति; सर्वेषामेव शास्त्रविहितकार्यस्य निष्पत्तेः । अयमेवानुग्रहो या शास्त्रविहितकार्यस्य निष्पत्तिः । समुदायस्यैव द्विर्वचने कृते सर्वेषामनुग्रहो भवति । यथा वृक्षः प्रचलन् सहावयवैः प्रचलति, तथैकयैव शास्त्रप्रवृत्त्या समुदायो द्विरुच्यमानः सहावयवैर्द्विरुच्यते, न हि विनावयवैः समुदायो द्विर्वक्तुं शक्यते; तस्य तदात्मकत्वात् । अवयवानां तु द्विर्वचनं नैकया प्रवृत्त्या सर्वेषां कर्तुं शक्यते । न तद्द्विरुक्तौ सर्वेषामनुग्रहो भवति । कथम् ? सर्वेषां हि तेषामेकाज्व्यपदेश एकोऽजिति साधारणो हेतुः; तत्र यदा येनाचैकोऽवयव एकाजिति व्यपदिश्यते, तदा तेनैव तस्याक्षिप्तत्वान्न शक्यतेऽपर एकाजिति व्यपदेष्टुम् । ततश्चैकस्य द्विर्वचने विधित्सिते तदेदानीं तेनाचा य एकाच् कश्चिदवयवस्तस्यैव द्विर्वचनं स्यात्, नेतरस्य; अनच्कत्वात् । अत्रैतत् स्यात्—"'एकाचः' इति सर्वेषां षष्ठ्या निर्दिष्टत्वात्

पपाचेत्यत्र प्रथमत्वं व्यपदेशिवद्भावात् । इयाय, आर–इत्यत्रैकाच्त्वमपि व्यपदेशिवद्भावादेव ।

पदमञ्जरी

अथ कथं पपाचेति द्विर्वचनम्, यावता धातुरेवायं न धात्ववयवः, नापि प्रथमः, द्वितीयादिषु हि सत्सु यस्मात्पूर्वो नास्ति स प्रथमः ? कथन्तरां चेयायेत्यादौ यत्रैकोऽजस्येति व्यतिरिक्तोऽन्यपदार्थो नास्ति ? तत्राह—*पपाचेत्यत्रेति* । *एकाच्त्वमपीति* । अपिशब्दात्प्रथमत्वमपि, उभयत्रापि धातुं प्रत्यवयवत्वम् । *व्यपदेशिवद्भावादिति* । मुख्य एकाज्व्यपदेशः, अवयवव्यपदेशश्च येषामस्ति ते व्यपदेशिनो जाग्रादिषु जाग्रित्येवमादयः, तेषामिवैषामपि कार्यं भवतीत्यर्थः । न चेदं वचनम्, लौकिकोऽयं न्यायः, लोके हि 'शिलापुत्रकस्य शरीरम्' इति बहिर्वस्तुभेदेऽसत्यपि भेदव्यवहारोऽवस्थाभेदाश्रयो दृश्यते । शिलापुत्रकः क्रीयमाणविक्रीयमाणत्वाद्यवस्थायुक्तो यो दृष्टस्तस्येदं शरीरमिति परिदृश्यमानावस्थाभेदेन व्यपदिश्यते । पपाचेत्यत्रापि पचेरनन्तप्रयोगविषयस्य सम्प्रति प्रयुज्यमानं लिट्परं रूपमवयव इति शक्यं व्यपदेष्टुम्, प्रथमशब्दोऽपि प्रथमगर्भेण हतेत्यादावसतोऽपि द्वितीयादीन् बुद्ध्या परिकल्प्य मुख्यप्रथमसाधर्म्याद्यथा लोके एकस्मिन्नपि प्रथम इति प्रयुज्यते, तद्वदत्रापि । इयायेत्यत्रापि इतः, यन्ति, आयन्, अगात्, जिगमिषतीत्यनन्तप्रयोगस्थेनैकोऽयमिकार इत्यन्यपदार्थोऽपि कल्पितः । प्रसिद्ध्यप्रसिद्धिकृतश्च गौणमुख्यविवेकः । एवंविधस्तु व्यवहारो मुख्यादपि प्रसिद्ध इति न गौणत्वदोषः । एवं च कृत्वा—'व्यथो लिटि', 'भवतेरः', 'लिट्यभ्यासस्योभयेषाम्', 'दीर्घ इणः किति' इत्यादिकमुपपद्यते ।

अत्र 'द्वे' इत्यस्य संख्येयापेक्षायां शब्दानुशासनप्रस्तावाच्छब्दरूपे संख्येये 'षष्ठी स्थानेयोगा' इति वचनादेकाचः प्रथमस्येति स्थानषष्ठ्यां सत्यामेकस्य

न्यासः

सर्वेषामेव तेषां द्विर्वचनं कर्त्तव्यम्, न च तद् युगपत् सम्भवति, अत एकस्य तावत् क्रियते । एकस्मिन् कृते पुनः प्रवृत्त्यन्तरेणापरस्यापि करिष्यते" इति ? एतच्च न; यस्य ह्यवयवस्य पूर्वं द्विर्वचनं कृतं तेनैव सहाचो द्विरुक्तत्वान्न युज्यते पुनस्तस्यावयवान्तरेण द्विर्वचनं कर्तुम् । अकृतद्विरुक्तस्य हि द्विर्वचनं क्रियते, न द्विरुक्तस्य; अन्यथा ह्यनवस्था स्यात् । 'अनभ्यासस्य' इति वचनाच्चायुक्तमेवैकस्मिन्नवयवे द्विरुक्तेऽपरस्य द्विर्वचनं कर्तुम् । अतो नावयवद्विर्वचने सर्वेषामनुग्रहः सम्भवति । तत्र यस्य द्विर्वचनं न सम्भवति तस्य शास्त्रहानिः स्यात् । तदयुक्तमवयवानां प्रत्येकं द्विर्वचनम् ।

अथैषां युगपदवयवानां द्विर्वचनं न सम्भवतीति प्रयोगान्तरे पर्यायेण करिष्यते पूर्वोक्तदोषपरिहारार्थम् ? एवमपि यदा पचेरच्छब्दस्य द्विर्वचनं स्यात्, तदा पपाचेत्येवमादि न सिध्येत् । किञ्च 'णिजिर् शौचपोषणयोः' इत्यस्माल्लट्, झि, शप्, तस्य

पदमञ्जरी

स्थाने द्वे शब्दरूपे भवत इत्यर्थो भवति, यथा–'अस्तेर्भूः' इत्यादौ, तदा 'स्थाने द्विर्वचनम्' इत्ययं पक्षो भवति। यदा शब्दसम्बन्धिनी उच्चारणे संख्येये क्रियारूपस्य शब्दस्य च स्थान्यादेशसम्बन्धायोगादध्याहृतोच्चारणक्रियापेक्षयैकाच इति कर्मषष्ठी—एकाचो द्वे उच्चारणे भवतः, एकाचं द्विरुच्चारयेदित्यर्थः, तदा 'द्विःप्रयोगो द्विर्वचनम्' इत्ययं पक्षो भवति। तत्राद्ये पक्षे 'स्थानेऽन्तरतमः' इति वचनाच्छब्दतश्चान्तरतमयोर्द्वयोर्विधानाद् यद्यपि ये केचन प्राप्नुत इति दोषानवतारः। चिचीषतीत्यत्र तु 'सन्यङोः' इति षष्ठ्याः स्थापयिष्यमाणत्वाच्चिस् इत्यस्य स्थाने चिस्चिस् इति शब्दान्तर आदेशे सति तत्स्थस्य सकारस्य सन्त्वे प्रमाणाभावात् 'अज्झनगमां सनि' इति दीर्घत्वं न स्यात्; आदेशस्य स्थानिवद्भाव उच्यते नादेशावयवस्य स्थान्यवयववद्भाव इति स्थानिवद्भावेनापि सन्त्वं नास्ति। तस्य तु यत्र सन्मात्रस्य द्विर्वचने स्थानिवद्भावेन सन्त्वं सोऽवकाशः, यथा—इणः सन्, ईषिषतीति।

ननु शब्दान्तरप्राप्त्या द्विर्वचनमनित्यम्, अप्राप्त्या तु दीर्घत्वमित्युभयोः परत्वाद्दीर्घत्वे कृते द्विर्वक्ष्यते? इह तर्हि ह्वयतेः सनि ह्वास् इत्यस्य द्विर्वचनम्,

न्यासः

जुहोत्यादित्वात् श्लुः, 'श्लौ' इति द्विर्वचनम्। तत्र यदि निशब्दमात्रस्य द्विर्वचनं क्रियते तदा 'णिजां त्रयाणाम्' इति गुणः। अत्रेदानीम् 'अदभ्यस्तात्' इत्यदादेश इष्यते–नेनिजतीति रूपं यथा स्यादित्येवमर्थम्, स च न प्राप्नोति; जकारेण व्यवहितत्वात्। न हि जकारस्याभ्यस्तसंज्ञा, किं तर्हि? निशब्दस्य; द्विरुक्तत्वात्, जकारस्य चाद्विरुक्तत्वात्। अनेनिजुरिति—अत्र लङादेशस्य झेः 'सिजभ्यस्तविदिभ्यश्च' इति जुस् न प्राप्नोति; पूर्वस्मादेव हेतोः। नेनिजदित्यत्र 'नाभ्यस्ताच्छतुः' इति नुम्प्रतिषेधो न स्यात्; अत एव हेतोः। न च शक्यते वक्तुम्—वचनसामर्थ्याद् व्यवधानेऽपि भविष्यतीति; यदा समुदायस्य द्विर्वचनं तदा वचनस्य सावकाशत्वात्। यदा त्विकारसहितस्य जकारस्य द्विर्वचनं तदा नेनिजतीत्यादिकं रूपमेव न स्यात्। तस्मादयुक्तमवयवानां द्विर्वचनम्। अतः समुदाय एव द्विर्वक्तव्यः।

अथ पपाचेत्यत्र कथं द्विर्वचनम्, यावता 'एकाचो द्वे प्रथमस्य' इत्युच्यते, न चात्रैकाचः प्रथमव्यपदेशोऽस्ति, प्रथमशब्दो ह्यप्रथमापेक्षो भवति, सम्बन्धिशब्दत्वात्; सत्स्वनेकेषु यस्मात् पूर्वो नास्ति स प्रथमः, यः पुनरेक एव नासौ प्रथमव्यपदेशं लभते, एकश्चात्रैकाच्। तेनात्र द्विर्वचनं न स्यात्, जजागारेत्यादावेव स्यात्? इयाय, आरेत्यत्रापि कथं द्विर्वचनम्, यावतैकाचस्तदुच्यते, न चैकाच्त्वमस्ति, अज्व्यतिरिक्तस्यानच एकाज्व्यपदेशहेतोरभावात्? इत्यत आह-पपाचेत्यत्रेत्यादि। एकसंख्याव्यवच्छिन्नस्वरसम्बन्धहेतुको व्यपदेशः, स यस्यास्ति स व्यपदेशी। जागर्त्यादिषु धातुषु जागित्येव-

Indira Gandhi National Centre for the Arts

पदमञ्जरी

समुदायस्य समुदाय आदेशस्तत्र आदेश एतन्नास्ति—इयं प्रकृतिरयं प्रत्यय इति, ततश्च 'ह्वोऽभ्यस्तस्य' इति संप्रसारणं न स्यात्, जुहाव जुहुवतुरित्यादावेव तु स्याद्–यत्र ह्वामात्रस्य द्विर्वचनात्स्थानिवत्त्वम् ? नैष दोषः; 'ह्वोऽभ्यस्तस्य' इति व्यधिकरणे षष्ठ्यौ, ह्वयतेरभ्यस्तस्य भविष्यतः प्रागेव संप्रसारणं परपूर्वत्वम्, 'हलः' इति 'अज्झनगमाम्' इति वा दीर्घत्वम्, 'ह्वास्' इत्यस्य द्विर्वचनम् । इह च पिपक्षति, उद्विवक्षतीत्यत्र 'पूर्वत्रासिद्धमद्विर्वचने' इति वचनात्परत्वात्कुत्वादिषु कृतेषु पश्चाद् द्विर्वचनमिति न कश्चिद्दोषः । इह तर्हि आटिटद्, आशिशद् इति णिलोपे कृतेऽपि 'द्विर्वचनेऽचि' इति रूपस्थानिवद्भावाच्छब्दान्तरप्राप्त्यभावेन नित्यत्वात्पूर्वं द्विर्वचने सति समुदायस्य समुदाय आदेशस्तत्र सम्प्रमुग्धत्वात्प्रकृतिप्रत्ययत्वं नष्टम्, स णिज्न भवतीति णिलोपो न स्यात्, तस्य तु कारणेत्यादिरवकाशः । इह च जिघांसतीति समुदायस्य समुदाय आदेशे कृते हन्तेरभावाद् 'अभ्यासाच्च' इति हन्तेरिति कुत्वं न स्यात् । तस्य तु जघनिथ, जघन्थ, अहं किल जघन, जघन्वानित्यादिरवकाशः, यत्रहन्तिमात्रस्य द्विर्वचनात्स्थानिव-

न्यासः

मादिः । 'तेन तुल्यं वर्त्तते' इति व्यपदेशिवत्, तस्य भावो व्यपदेशिवद्भावः । एकाच्त्वमपीत्यपिशब्दाद् द्वितीयत्वमपीति । ततोऽनेन जजागारेत्यत्र यथा वास्तव प्रथमत्वेजाग् इत्येतस्य प्रथमस्यैकाचो द्वर्वचनं भवति, तथा परमार्थतो सत्यपि प्रथमत्वे प्रथमस्यैकाचो द्विर्वचनं भवति व्यपदेशिवद्भावेन पपाचेत्यत्र पच्छब्दस्य । इयाय, आरेत्यत्राप्यसति वास्तव एकाच्त्वे द्वितीयत्वे च व्यपदेशिवद्भावेन द्विर्वचनं भवति; यथा—अटिटिषतीत्यत्र वस्तुत एवैकाचो द्वितीयस्य टिशब्दस्येति ।

न चैतद् वक्तव्यम्—'यस्मादप्रथमस्यापि पच् इत्येवम्प्रकारस्य व्यपदेशिवद्भावेन द्विर्वचनं भवति' इति । अत्र 'लिट्यभ्यासस्योभयेषाम्' इति वचनं ज्ञापकम्, असत्यपि वास्तव एकाच्त्वे द्वितीयत्वे च पुनर्व्यपदेशिवद्भावेन चेणप्रभृतीनां द्विर्वचनं भवतीति । अत्राभ्यासस्य दीर्घविधानार्थम् 'दीर्घ इणः किति' इति वचनं ज्ञापकम् । इह 'आ दशभ्यः संख्याः संख्येये वर्त्तन्ते, न तु संख्यानमात्रे' इति द्विशब्दोऽत्र संख्येये वर्त्तते । तच्च संख्येयं शब्दरूपं वा स्याद् ? उच्चारणं वा ? तत्र यदि शब्दरूपं संख्येयं स्यात् तदा 'द्वे' इत्यनेन द्विशब्दरूपे भाव्यमानतया निर्दिश्येते इति । अत एकाच इत्यस्य च स्थाने योगलक्षणः सम्बन्धो भवति, अतः 'स्थाने द्विर्वचनम्' इत्येष पक्षो भवति । तदैकाच इति स्थानषष्ठी जायते ।

अथ पुनरुच्चारणं संख्येयं तदा स्थान्यादेशसम्बन्धो न भवति । उच्चारणं नाम शब्दानुगतो धर्मः । यद्यसावादेशो विधीयते तदा निवृत्तिधर्मा स्थानी भवतीति शब्दस्य स्थानिनो निवृत्त्या भवितव्यम्, ततश्चोच्चारणमपि न स्यात्; तस्य तद्धर्मत्वात् । तस्मादुच्चारणे संख्येये स्थाने द्विर्वचनं न सम्भवतीति 'द्विष्प्रयोगो द्विर्वचनम्'

Indira Gandhi National Centre for the Arts

द्विःप्रयोगश्च द्विर्वचनमिदम् । आवृत्तिसंख्या हि 'द्वे' इति

पदमञ्जरी

द्भावः । तदेवमाद्यपक्षस्य दुष्टत्वाद् द्वितीयं पक्षमाश्रित्याह–*द्विःप्रयोगो द्विर्वचनमिति* । चशब्दोऽवधारणे । कथं पुनः 'षष्ठी स्थानेयोगा' इति परिभाषायां सत्यां द्विःप्रयोगपक्षः शक्य आश्रयितुम् ? तत्राह–*आवृत्तिसंख्या हीति* । यद्यावृत्तेः संख्या

न्यासः

इत्येष पक्षो भवतीति । तदैकाच इति 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी, सा ह्येकाजुच्चारणक्रियया व्याप्तुमिष्टतमत्वात् कर्म भवति । तत्र यदि 'स्थाने द्विर्वचनम्' इत्येष पक्ष आश्रीयेत, तदा जिघांसतीति हन्तेः कुत्वे न स्यात् । समुदायस्य हि सन्नन्तस्य समुदायः सन्नन्त आदेशः, तत्र कृत एतन्नास्ति । अयं प्रत्ययः इयं प्रकृतिरिति सन्दिग्धत्वात् प्रकृतिप्रत्ययस्य हन्तिर्नष्टो भवतीति 'अभ्यासाच्च' इति कुत्वं हन्तिहकारस्य न स्यादितीमं स्थानेद्विर्वचनपक्षे दोषं दृष्ट्वा द्विष्प्रयोगो द्विर्वचनमिति पक्षमाश्रित्याह–**द्विष्प्रयोगश्चेत्यादि** । चकारोऽवधारणे । द्विष्प्रयोग एवेत्यर्थः । न स्थाने द्विष्प्रयोग इत्यर्थः । अथ द्विष्प्रयोगद्विर्वचने कथमयं दोषो न भवति ? इत्याह–**आवृत्तिसंख्या हीत्यादि** । पुनः पुनरुच्चारणम्=आवृत्तिः । तत् पुनः संख्याव्यवस्थितस्यैव धातोर्विधीयते । **तेनेत्यादि** । यस्मादावृत्तिः संख्याव्यवस्थितस्यैव धातोर्विधीयते, तेन स एव शब्दो व्यवस्थित एव द्विरुच्चार्यते, न तु तस्य स्थाने शब्दान्तरं विधीयत इति कुतः पुनः पूर्वोक्तदोषावसरप्रसङ्गः !

यदि तर्हि द्विष्प्रयोगो द्विर्वचनमित्येष पक्ष आश्रीयते, एवञ्च सति 'वस्वेकाजाद्घसाम्' इत्यत्रादिवान्, आशिवान्, पेचिवान्, शेकिवान्–इत्युदाहृत्य यद्वक्ष्यति—'धात्वभ्यासयोरेकादेशे कृत एत्वाभ्यासलोपयोः कृतयोः कृतद्विर्वचना एत एकाचो न भवन्ति' इति, तन्न युज्यते; अकृतेऽपि धात्वभ्यासयोरेकादेशेऽकृतयोरपि चैत्वाभ्यासलोपयोः कृतद्विर्वचनानामप्येषामेकाच्त्वात् । स्थाने द्विर्वचने हि शब्दान्तरमेवानेकाजादिश्यत इति स्यादेषां कृतद्विर्वचनानामनेकाच्त्वम्, न तु द्विष्प्रयोगपक्षे । तत्र हि स एव शब्दो द्विरुच्चार्य्यते । न चासौ शतकृत्वोऽप्युच्चार्यमाण एकाच्त्वं जहाति, किं पुनर्द्विरुच्यमानः ।

यदपि नियमस्य व्यवच्छेद्यं दर्शयितुं बिभिद्वानित्यादि तत्रोपन्यसिष्यति, तदप्ययुक्तमेव; भिदिप्रभृतीनामेव यथोक्तादेव हेतोः कृतद्विर्वचनानामप्येकाच्त्वात् । यदप्याद्ग्रहणमनेकाजर्थमित्यभिधास्यति, तदप्ययुक्तमेव; ततएव हेतोराकारान्तानां कृतद्विर्वचनानामप्यनेकाच्त्वानुपपत्तेः । तस्मात् स्थाने द्विर्वचनपक्षोऽप्यङ्गीकर्त्तव्यः । एवं तर्ह्यन्यथा व्याख्यायते । इह पक्षद्वयं पूर्वोक्तं सम्भवति । तत्र किं द्विष्प्रयोगो द्विर्वचनमित्येष पक्ष आश्रीयते ? उत स्थाने द्विर्वचनपक्षः ?—इति प्रश्नावसर इदमाह–**द्विष्प्रयोगश्च द्विर्वचनमिति** । चकारः स्थाने द्विर्वचनमित्यमुमर्थं द्योतयति । ननु च 'षष्ठी स्थानेयोगा' इति वचनात् स्थाने द्विर्वचनपक्षे नात्र भवितुं युक्तम्, तत् कथं द्विष्प्र-

Indira Gandhi National Centre for the Arts

विधीयते । तेन स एव शब्दो द्विरुच्चार्यते, न च शब्दान्तरं तस्य स्थाने विधीयते ॥

पदमञ्जरी

विधीयते, एवं सति त्रिर्वचनं प्राप्नोति । न ह्याद्यमुच्चारणमावृत्तिः, अतस्तदेकम्, आवृत्ती च द्वे इति त्रिर्वचनप्रसङ्गः । तस्मादावृत्तिकृता संख्या । आवृत्तिसंख्या कस्य ? उच्चारणस्य, आवृत्तमुच्चारणं विधीयत इत्यर्थः । तत्र च स्थान्यादेशभावो न सम्भवतीत्युक्तम् । अत्र पक्षे यथाटिटदित्यादौ दोषो न भवति तथा दर्शयति—*तेनेत्यादिना* ।

नन्वत्रापि पक्षे नेमतुः, सेहे इत्यादौ नत्वसत्वयोः कृतयोर्धातोरादेशादित्वस्य द्विःप्रयोगेऽप्यनिवृत्तेरेत्वाभ्यासलोपौ न स्याताम्, पक्षान्तरे तु नादेशादिव्यपदेशः ? अलाश्रयत्वेन स्थानिवत्त्वाभावात्समुदायादेशत्वेनादेशादित्वाभावाच्च न दोषः; 'लिटि आदेशः' इति विशेषणान्नत्वसत्वयोरनैमित्तिकत्वाद् । इह तर्हि बेभिदितेति बेभिद्यशब्दात्तृचि अल्लोपयलोपयोः कृतयोरुपदेशे य एकाजनुदात्तः स एवायमितीट्प्रतिषेधः स्यात्, पक्षान्तरे त्वेकाज्व्यपदेशस्यालाश्रयत्वाद् बेभिद्येत्यस्य व्यच्कत्वान्निषेधाभावः ? द्विःप्रयोगेऽपि न दोषः; पूर्वस्मादपि विधौ अल्लोपस्य स्थानिवद्भावात् । इह तर्हि जरीगृहितेति ग्रहेर्लिटि दीर्घत्वं स्यात्, न ह्यत्र स्थानिवत्त्वम्, दीर्घविधौ निषेधात् ? नैष दोषः; 'एकाच उपदेशे' इत्यत 'एकाच' इत्यनुवर्त्तयिष्यते । यद्वा—ग्रहेर्विहितं यदार्द्धधातुकं तस्य य इट् तस्य दीर्घ इति जरीगृह्यशब्दाद्विहितस्य न भविष्यति । इह च सिषेचति, यद्यपि सिचेर्लिड्विहितः; तथापि द्विर्वचने कृते समुदायस्यैका पदसंज्ञा न तदवयवस्य, सेचशब्दस्य पदसंज्ञायां तदादिग्रहणानिवृत्तेरभ्यासस्य वर्जनायोगादिति 'सात्पदाद्योः' इति षत्वनिषेधाभावः । इह तर्हि बिभिद्वानित्यादौ शतकृत्वोऽप्युच्चारणे एकाच्त्वं न याति, किं पुनर्द्विरुच्चारण इति 'वस्वेकाजाद्धसाम्' इतीट्प्रसङ्गः ? तन्न; उच्चारणभेदाद्विरुद्धसंख्याप्रादुर्भावे पूर्वसंख्याकृतव्यपदेशनिवर्त्तनात् । अत

न्यासः

योगपद्योऽप्युपपद्यत इत्यत आह—**आवृत्तिसंख्या हीत्यादि** । यदि शब्दान्तरं तस्य स्थाने विधीयते तदा स्थान्यादेशसम्बन्धे प्रतिस्थाने द्विर्वचनमित्येष पद्यो जायत इत्युक्तम् । यदा त्वावृत्तिसंख्या विधीयते तदेतरः पक्षो भवतीति । एतदपि प्रतिपादितम् प्राक् । तस्मात् द्विष्प्रयोगपक्षो यदाङ्गीकर्तुमिष्यते तदावृत्तिसंख्या द्वे इति विधीयते । तेन स एव शब्दो द्विरुच्चार्यते, न तु शब्दान्तरं तस्य स्थाने विधीयते । तस्माद् द्विष्प्रयोगद्विर्वचनपक्षोऽप्यङ्गीकर्तव्यः ।

अथ कथं स्थाने द्विर्वचनमित्येषोऽपि पक्ष आश्रीयते, यावता जिघांसतीत्यत्र हन्तेर्हकारस्य कुत्वं न प्राप्नोतीत्युक्तम् ? नैष दोषः; उच्यते चेदम्—अभ्यासाच्च

Indira Gandhi National Centre for the Arts

अजादेर्द्वितीयस्य ॥ २ ॥

प्रथमद्विर्वचनापवादोऽयम् । अजादेर्द्वितीयस्यैकाचो द्विर्वचनम-

पदमञ्जरी

एवाद्ग्रहणं कृतं पपिवानित्यादाविडर्थम् । इह तर्हि विसुष्वापेति, तस्यैवार्थवतो द्विरुक्तिभावमात्रमित्यभ्यासस्यार्थवत्त्वात्सुपेः षत्वमित्यत्रानर्थको विसुषुपुरिति वक्ष्यमाणं विहन्येत ? नैष दोषः; अन्वयव्यतिरेकाभ्यां शब्दस्याशेषार्थावसायः, न चात्राभ्यासोपजनने कश्चिदर्थ उपजायते, अपाये चापयाति । ननु स एव चेद् द्विरुच्यते, अर्थप्रत्ययेनाप्यावर्तितव्यम्, यथा—अहिरहिर्बुध्यस्वबुध्यस्वेति ? किमत्रोपालभ्येमहि, न तावदर्थप्रत्यया आवर्तन्ते ! तदेतदेवं दृश्यताम्—यथा स्वप्नः, सुप्तः, अस्वपदित्यादौ कचिदविकृतः, कचिद्विकृतः, कचिदडागमापेक्षोऽर्थं प्रतिपादयति, तथा सुष्वापेत्यादावावृत्त एव प्रतिपादयतीति ॥

अजादेर्द्वितीयस्य ॥ प्रथमद्विर्वचनापवादोऽयमिति । ननु विरोधे समानफलत्वे च बाध्यबाधकभावः, यथा—'अष्टाश्रिर्यूपः कर्तव्यो वाजपेयस्य चतुरश्रिः' इत्यष्टाश्रित्वचतुरश्रित्वयोर्यथा नैवारश्चरुर्नखावपूतानामिति नखावपनेन वैतुष्यफलकेन तत्फलकोऽवघातो बाध्यते, नखैश्चोलूखलमुसलम् ; यत्र त्वेतदुभयं न भवति न तत्र बाधः, यथा—कृत्कृत्यप्रत्ययसंज्ञानाम् , यथा वा—तद्धिततद्राजप्रत्ययसंज्ञानाम् । इह तु न समानफलत्वम् ; फलस्य कस्यचिदभावात्, अस्ति च सम्भवो यदुभयं स्यात् ? स्यादेतत्—द्वयोरासीनयोर्मध्ये कस्मिंश्चिदुपविष्टे द्वितीयस्तृतीयो भवति, तथा प्रथमे द्विरुक्ते द्वितीयस्तृतीयो भवतीत्यस्येवात्राप्यसम्भव इति, स्यादप्येवम्, यदि प्रथमद्विर्वचनमेव नियोगतः पूर्वं स्यात्, किञ्च नात्रौत्पत्तिकस्य द्वितीयस्य द्विर्वचनमुच्यते, किं तर्हि ? द्वितीयमात्रस्य, ततः किम् ? प्रथमे द्विरुक्ते यो द्वितीयस्तस्य भविष्यति ।

नन्वेवमनारम्भसमं स्यात्, कथमटः सन, प्रथमस्य द्विर्वचनम्, अट् + अट् इति स्थिते हलादिःशेषश्च प्राप्नोति, द्वितीयद्विर्वचनं च, परत्वान्नित्यत्वाच्च हलादिःशेषः, ततो द्विर्वचनम्, अ + अट् + अट् इति स्थिते हलादिशेषे त्रयाणाम-

न्यासः

हन्तेः कुत्वं भवतीति । न च तस्य स्थाने शब्दान्तर एवादेशे कृते हन्तिरस्ति । तत्र वचनसामर्थ्यादादेशैकदेशे हन्तिप्रतिरूपके[1] हन्तिशब्दो विज्ञास्यते ।

अन्ये त्वनयोः पक्षयोर्दोषा य आशङ्क्यन्ते ते भाष्य एवोत्क्षिप्य प्रतिक्षिप्ताः । इह त्वतिविस्तरग्रन्थभयान्न लिख्यन्ते ॥

अजादेर्द्वितीयस्य ॥ प्रथमद्विर्वचनापवादोऽयमिति । ननु च 'एकाचो द्वे प्रथमस्य' इत्यनेन प्रथमस्यैकाचो द्विर्वचनं विधीयते, 'अजादेर्द्वितीयस्य' इत्यनेन तु द्वितीयस्य;

---

१. हन्तिस्वरूपक इति मुद्रितः पाठः ।

Indira Gandhi National Centre for the Arts

धिक्रियते। अच् आदिर्यस्य धातोस्तदवयवस्य द्वितोयस्यैकाचो द्वे

पदमञ्जरी

काराणामतो गुणे पररूपत्वेऽटिषतीत्येतद्रूपं स्याद्, अकृतेऽपि द्विर्वचने एतदेव रूपम्, द्वयोरकारयोः पररूपमित्येतावद् नानारम्भसमम्, कथम्? प्रथमं द्विर्वचनम्, हलादिःशेषः, अ + अट् इति स्थिते 'सन्यतः' इतीत्वं च प्राप्नोति द्विर्वचनं च, द्वयोर्नित्ययोः परत्वादित्वम्। नन्वित्वं सनमभ्यासं चापेक्षत इति बहिरङ्गम्, ततः किम्? अन्तरङ्गम् 'अतो गुणे' इति पररूपत्वं प्राप्नोति, समानाश्रये च वार्णादाङ्गं बलीयः? एवं तर्हि कृतेऽपि पररूपे तस्यान्तवद्भावादित्वं प्राप्नोति, अकृते चेति नित्यत्वं परत्वं चेति द्वे तस्य प्राबल्यकारणे। पररूपस्य त्वन्तरङ्गत्वमेकमेवेतीत्वमेव तावद् भवति। सति तु तस्मिन् 'अभ्यासस्यासवर्णे' इतीयङ् च प्राप्नोति द्विर्वचनं च, तत्र द्विर्वचनमियङि कृते यङित्यस्य प्राप्नोति; अकृते त्वङित्यस्येति शब्दान्तरप्राप्त्याऽनित्यम्, तेन परत्वान्नित्यत्वाच्चेयङि कृते यङ्शब्दस्य द्विर्वचने हलादिः शेषः, इत्वम्, इयियटिषति, ओणेः–उवुवोणिषतीति भवति। असति द्वितीये द्विर्वचने—इयटिषति, उवोणिषतीति भवतीति नानारम्भसाम्यम्।

एवं तर्हि 'अनभ्यासस्य' इति निषेधादेकस्मिन् द्विरुक्ते नापरो द्विर्वक्तुं शक्यत इत्यस्यैवासम्भवः। अथ वा–सामान्यविहितस्य विशेषविहितं सत्यपि सम्भवे बाधकं भवति, तद्यथा–दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति। ओदनसेकाख्यस्य फलस्य समानत्वादत्र दधिबाध इति चेद्? इहापि तर्ह्यर्थाभिधानाख्यं फलमेकम्, अर्थाभिधानाय हि द्विरुच्चारणम्, तच्चैकेनैव साध्यते। अथ रूपविशेषाख्यं फलं भिन्नम्, अन्यद्धि रूपं प्रथमस्य द्विर्वचने, अन्यच्च द्वितीयस्य? इतरत्रापि तृप्तिविशेषाख्यं फलं भिद्यते, अन्या हि दध्नस्तृप्तिरन्या हि तक्रस्य, अतो नाप्राप्ते तस्मिन्नारभ्यमाणत्वमेव बाधनिबन्धनम्, नासम्भवः, सामान्यशब्दा हि विशेषशब्दसन्निधौ तत्रैवोपसंह्रियन्ते, ततोऽन्यत्र वा, यथा—वसिष्ठो ब्राह्मणः, ब्राह्मणाः आयाता वसिष्ठोऽप्यायात इति।

न्यासः

तत् कथमन्यस्योच्यमानमिदमन्यस्य बाधकं स्यात्? सति खलु सम्भवे बाधकं भवति, अस्ति च सम्भवो यदुभयं स्यात्। स्यादेतत्—धातोरित्येषा षष्ठी, तस्या द्वितीयेनैकाचा प्रथमेन च सम्बन्धो नोपपद्यते, अतो नास्त्युभयसम्भव इति? एतच्च नास्ति; अन्यद्धि वाक्यं प्रथमद्विर्वचनस्य विधायकम्, अन्यच्च द्वितीयद्विर्वचनस्य। तत्र वाक्यभेदे च सति किमिति सम्बन्धो नोपपद्यते, तस्मात् कृतेऽपि द्वितीयद्विर्वचने प्रथमद्विर्वचनं सम्भवत्येवेत्ययुक्तं बाधनम्? नैष दोषः; इह द्वीपम्, अन्तरीपमित्यत्र 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इतीत्त्वम् 'अलोऽन्त्यस्य' इत्यनेनान्तस्यालः प्राप्तम् 'आदेः परस्य' इत्यनेनादेर्विधीयते,

भवतः । अटिटिषति । अशिशिषति । अरिरिषति । अर्त्तेः 'स्मिपूङ्-

पदमञ्जरी

ननु कौण्डिन्यस्यापि ब्राह्मणत्वाद् दधि प्राप्तम्, इह तु प्रथमस्योच्यमानं द्विर्वचनं द्वितीयस्य न प्राप्नोतीति कथं येन नाप्राप्तिः ? न क्रमो द्वितीयस्य प्राप्तमिति; किन्तु धातुसामान्यविहितं प्रथमद्विर्वचनमजादेर्धातोः प्राप्तमिति; तत्र दधितक्राख्यं विधेयं भिद्यते, इह तु कार्यं भिद्यते, विधेयं द्विर्वचनमेकमित्येतावान् विशेषः । यद्वा—तत्रापि दानमेव विधेयं तस्य तु देयभेदाद् भेदः, इहापि कार्यिभेदाद्भेदः, तदिदमुक्तम्—प्रथमद्विर्वचनापवादोऽयं द्वितीयद्विर्वचनमिति । सर्वथा प्रथमद्विर्वचनं द्वितीयद्विर्वचनेन बाध्यते । यद्येवम्, यथाभूतस्यैकाचः प्रथमद्विर्वचनं प्राप्तं तथाभूतस्यैव द्वितीयद्विर्वचनं बाधकं स्यात्, सव्यञ्जनस्यैतत्प्राप्तमिति तेन सहव्यञ्जनानामप्यनावृत्तिप्रसङ्गः ? स्यादेवं यद्यजादिषु प्रथमस्यैकाचः किञ्चिद्विहितं प्रतिषिद्धं वा भवेत्, इह तु विशेषसन्निधौ सामान्यशब्दस्य ततोऽन्यत्र वृत्तेरजादिषु प्रथमद्विर्वचनरूपाप्रतीतत्वादप्राप्त्यनुमानमेव बाधः । व्यञ्जनानि च यदा यस्य कार्यं तदा तदङ्गानीति द्वितीयैकाच्यन्तर्भावात्तेन सह द्विर्वचनं केन वार्यते ! अत्र च लिङ्गम् 'न न्द्राः' इति प्रतिषेधः । अथेयाय, आरेत्यादौ केन द्विर्वचनम् ? न तावदनेनाद्वितीयत्वात्, नापि पूर्वेणाजादिषु तस्याप्रवृत्तेः, ननु च यत्र द्वितीयसद्भावादस्य प्रवृत्तिः—अटिटिषतीत्यादौ, तत्र तदप्रवृत्तिः, यत्रैतदप्रवृत्तिः, यत्र तु द्वितीयाभावादेतन्न प्रवर्त्तते न तत्र तस्य प्रवृत्तिर्वार्यते ? तत्रापि वार्यते, अजादेरिति सामान्यनिर्देशात् । सामान्यनिर्देशे हि क्वचिदपि

न्यासः

तत्र यथा सत्यपि सम्भवेऽनन्त्यविकारोऽन्त्यविकारं बाधते, तथा द्वितीयद्विर्वचनं प्रथमद्विर्वचनं बाधिष्यते । यदि तर्हि प्रथमस्यैकाचो द्विर्वचनमनेन बाध्यते, व्यञ्जनस्यापि प्रथमद्विवचनसम्बन्धिनो द्विर्वचनं बाध्येत । तद् यथाभूतस्यैव प्रसङ्गस्तथाभूतस्यैव द्विर्वचननिवृत्तिर्भवति । किम्भूतस्य च प्रथमद्विर्वचनस्य प्रसङ्गः ? सव्यञ्जनस्य । तत्र यथा प्रथमस्यैकाचो द्विर्वचनं न भवति, एवमेकाज्व्यपदेशिनो व्यञ्जनस्यापि न स्यात् ? नैष दोषः; यदयम् 'न न्द्राः संयोगादयः' इति प्रतिषेधं शास्ति, तज्ज्ञापयति—व्यञ्जनस्य द्विर्वचननिवृत्तिर्न भवतीति । अन्यथा हि नदराणां द्विर्वचनप्रतिषेधोऽनर्थकः स्यात्; प्राप्त्यभावात् ।

अटिटिषति । अशिशिषतीति । अटेरशेश्च सनीटि कृते टिष्शब्दः, शिष्शब्दश्च द्विरुच्यते । **अरिरिषतीति ।** अर्त्तेः सन्निड्गुणरपरत्वेषु कृतेषु रिष्शब्दो द्विरुच्यते । **स्थानिवद्भावः प्राप्नोतीति ।** 'सन्यङोः' इत्यनेन सन्नन्तस्य द्विर्वचनमुच्यते, इट् च सन्भक्तः । तस्मादसौ द्विर्वचनस्य निमित्तमित्यभिप्रायः । स्थानिवद्भावे च सति रेफरहितस्येषो द्विर्वचने कृते सवर्णदीर्घत्वे चारीषतीत्यनिष्टं रूपं स्यात् ।

Indira Gandhi National Centre for the Arts

ञ्ज्वशां सनि' इति इट् क्रियते, तस्मिन् कृते गुणे च रपरत्वे च 'द्विर्वचनेऽचि' इति स्थानिवद्भावः प्राप्नोति । तत्र प्रतिविधानम्—द्विर्वचननिमित्तेऽचीत्युच्यते । न चात्र द्विर्वचननिमित्तमिट्, किं तर्हि ? कार्यी । न च कार्यी निमित्तत्वेनाश्रीयते । तथा हि—क्ङिन्निमित्तयोर्गुणवृद्ध्योः प्रतिषेधो विधीयमानः शयितेत्यत्र न भवति, न हि कार्यिणः शीङो गुणं प्रति निमित्तभाव इति ।

पदमञ्जरी

द्वितीयवत्यां व्यक्तौ सर्वत्र बाधेत, यथा हलादिःशेषे वक्ष्यते—'क्वचिदपि प्रवर्त्तमानो हलादिःशेषः सर्वत्र निवृत्तिं करोति' इति ? नैष दोषः;

जात्योपलक्षिता व्यक्तिः प्राधान्येनेह गृह्यते ।
द्वितीयवत्यामेवेदं व्यक्तौ तेन प्रवर्त्तते ॥
प्रवर्त्तते च यत्रेदं तत्र पूर्वं निवर्त्तते ।
जातिर्हलादिशेषे तु प्राधान्येन समाश्रिता ॥ इति ।

गुणे चेति । नित्यत्वात्परत्वाच्च । *स्थानिवद्भावः प्राप्नोतीति* । ततश्च इस इत्यस्य द्विर्वचने हलादिःशेषे च दीर्घत्वे सति अरीषतीति प्रसङ्गः । *न चात्र द्विर्वचननिमित्तमिडिति* । यत्र परतो द्विर्वचनमुच्यते, तदेव तस्य निमित्तमिति भावः । *किं तर्हि कार्यीति* । 'सन्यङोः' इति षष्ठ्याश्रयणात् । ततः किम् ? इत्याह—*न चेति* । तद्भावभावित्वे सत्यपि कार्यिणः सप्तमीनिर्देशाभावान्न निमित्तत्वं शास्त्रे स्थितमित्यर्थः । अवश्यं चैतदेवं विज्ञेयमित्याह—*तथा हीति* । *गुणवृद्ध्योरिति* । 'क्ङिति च' इत्यत्र वृद्धेरपि प्रतिषेधाद् गुणवृद्ध्योरित्युक्तम् । *शयितेत्यत्र न*

न्यासः

कार्यीति । द्विरुक्तिरेव कार्यम्, तदस्यास्तीति कार्यी । स्यादेतत्—यद्यप्यसौ कार्यी तथापि कार्यं प्रति निमित्तमेवेत्याह—**न चेत्यादि** । कथं पुनर्ज्ञायते एतत् कार्यी निमित्तत्वेनाश्रीयते इति ? अत आह—**तथा हीत्यादि** । तथाहीति यस्मादित्यर्थे । इतिकरणः प्रकारे । यस्मात् क्ङिन्निमित्तयोः गुणवृद्ध्योः 'क्ङिति च' इति प्रतिषेधो विधीयमानः शयितेत्येवम्प्रकारविषये न भवति, ततो ज्ञायते—न हि कार्यी निमित्तत्वेनाश्रीयत इति । यदि ह्याश्रीयेत, तदा शीङो ङित्वात् तन्निमित्तयोः गुणवृद्ध्योः 'क्ङिति च' इति विधीयमानः शयितेत्यत्र गुणप्रतिषेधश्च स्यात्, शायक इत्यत्र वृद्धिप्रतिषेधश्च । ननु च येन विना यन्न भवति तत् तस्य निमित्तम्, यथा—वृष्टेर्मेघः । यथा च प्रत्ययेन विना गुणवृद्धी न भवतस्तथा कार्यिणापि; तत् कथं शीङो गुणवृद्धिप्रतिषेधो नेह भवति ? इत्यत आह—**न हि कार्यिण इत्यादि** । अत्राश्रीयत इत्यध्याहार्य्यम् । सत्यम्;

अत्र केचिदजादेरिति कर्मधारयात्पञ्चमीमिच्छन्ति—अच्चासावादिश्चेत्यजादिः, तस्मादजादेरुत्तरस्यैकाचो द्वे भवत इति। तेषाम् 'द्वितीयस्य' इति विस्पष्टार्थं द्रष्टव्यम् ॥

न न्द्राः संयोगादयः ॥ ३ ॥

'द्वितीयस्य' इति वर्त्तते। द्वितीयस्यैकाचोऽवयवभूतानां न्द्राणां तदन्तर्भावात् प्राप्तं द्विर्वचनं प्रतिषिध्यते। नकारदकाररेफा द्वितीयै-

पदमञ्जरी

भवतीति । गुणस्य प्रतिषेधः । क्वचित्तु—शायक इत्यपि पठ्यते, तदयुक्तम्, अप्रकृतित्वादत्र वृद्धेः । यथा चोत्तरग्रन्थे गुणग्रहणमेव कृतम् ।

तेषां द्वितीयस्येति विस्पष्टार्थमिति । 'तस्मादित्युत्तरस्य' इत्यनन्तरस्य द्वितीयस्यैव भविष्यति, न तृतीयादेः। यदा तु बहुव्रीहिः षष्ठी—अजादिर्यस्य धातोरिति, तदा सामर्थ्यादप्रथमार्थेऽप्यारम्भे तृतीयादेरपि प्रसङ्गः ॥

न न्द्राः संयोगादयः ॥ 'उन्दी क्लेदने,' 'अड्ड अभियोगे' दोपधः, ष्टुत्वम्, 'अर्च पूजायाम्', 'ईक्ष दर्शनाङ्कनयोः', 'अन प्राणने', 'द्रा कुत्सायां गतौ', उब्जिर्विषये यद्वक्तव्यं तत्सर्वम् 'हयवरट्' इत्यत्रैवोक्तम्।

न्यासः

कार्यपि शीङ्निमित्तम्, तस्य गुणं प्रति वृद्धिञ्च प्रति यस्मान्निमित्तभावो नाश्रीयते, तेन शयितेत्यादौ गुणवृद्धिप्रतिषेधो न भवति। गुणग्रहणमुपलक्षणार्थं वृत्तौ द्रष्टव्यम्। इतिकरणोऽनन्तरोऽस्य प्रतिविधानस्य स्वरूपं दर्शयति। कथं पुनर्ज्ञायते—न हि कार्यी निमित्तत्वेनाश्रीयत इति ? 'दीधीवेवीटाम्' इति दीधीवेव्योर्गुणप्रतिषेधात्। यदि हि निमित्तत्वेनाश्रीयेत, दीधीवेव्योर्ङित्वात् किन्निमित्तत्वाच्च गुणवृद्ध्योः 'क्ङिति च' इति कार्यी प्रतिषेधः सिद्ध एवेति तयोर्गुणप्रतिषेधोऽनर्थकः स्यात्।

अत्र केचिदजादेरिति कर्मधारयात् पञ्चमीमिच्छन्तीति । अच्चासावादिश्चेत्यजादिः, तस्मादजादेरिति । एवं वर्णयन्तः कर्मधारयात् पञ्चमीमिच्छन्ति । यदि तर्हि कर्मधारयादियं पञ्चमी तेषां द्वितीयग्रहणमनर्थकम्; यस्मात् तृतीयस्य प्राप्तिरेव नास्ति। येषां बहुव्रीहेरियं षष्ठ्यभिमता, तेषामक्रियमाणे द्वितीयग्रहणे तृतीयस्यापि द्विर्वचनं प्राप्नोतीति तन्निवृत्त्यर्थं युक्तं द्वितीयग्रहणम्। येषां च कर्मधारयादियं पञ्चम्यभिमता, तेषां द्वितीयग्रहणमनर्थकम्; 'तस्मादित्युत्तरस्य' इत्यनेनानन्तरस्यैव द्वितीयस्य भविष्यति, न तृतीयस्य, व्यवहितत्वात्? इत्यत आह—**तेषामित्यादि** ॥

न न्द्राः संयोगादयः ॥ तदन्तर्भावादिति । अवयवानां समुदायाभ्यन्तरत्वात् तदन्तर्भावः। **अवयवभूता इति** । आदिशब्दस्य नियतदेशावयववाचित्वाद् विशिष्ट-

काचोऽवयवभूताः संयोगादयो न द्विरुच्यन्ते । उन्दिदिषति । अड्डि-डिषति । अर्चिचिषति ।

न्द्रा इति किम् ? ईचिक्षिषते । संयोगादय इति किम् ? प्राणि-णिषति । 'अनितेः' 'उभौ साभ्यासस्य' इति णत्वम् ।

अजादेरित्येव—दिद्रासति ।

केचिदजादेरित्यपि पञ्चम्यन्तं कर्मधारयमनुवर्त्तयन्ति । तस्य प्रयोजनम्—इन्दिद्रीयिषतीति । अजादेरनन्तरत्वाभावाद् दकारो द्विरुच्यत एव, नकारो न द्विरुच्यते । इन्द्रमिच्छति, क्यच्, तदन्तात् इन्द्रीयितुमिच्छतीति सन् ॥

❀ बकारस्याप्ययं प्रतिषेधो वक्तव्यः ❀ । उब्जिजिषति । यदा बकारोपध उब्जिरुपदिश्यते तदायं प्रतिषेधः । दकारोपधोपदेशे तु न वक्तव्यः । बत्वं तु तदा दकारस्य विधातव्यम् ।

न्यासः

देशावयवभूता इत्येषोऽर्थो वेदितव्यः । उन्दिदिषतीति । 'उन्दी क्लेदने', सनीटि च कृते दिष्शब्दस्य द्विर्वचनम् । अड्डिडिषतीति । 'अड्ड अभियोगे' इत्यत्र यः संयोगः स दकारादिः, तस्य ष्टुत्वेन दकारस्य डकारः, ष्टुत्वञ्च द्विर्वचनेऽसिद्धम्, तेन सनीटि कृते दिष्शब्दो द्विरुच्यते, ततः ष्टुत्वम् । अर्चिचिषतीति । 'अर्च पूजायाम्', चिष्शब्दस्य द्विर्वचनम् । ईचिक्षिषत इति । 'ईक्ष दर्शने' सनीटि च कृते क्षिष्शब्दस्य द्विर्वचनम्, 'हलादिः शेषः', 'कुहोश्चुः' इति चुत्वम् । प्राणिणिषतीति । 'श्वस प्राणने', 'अन च' प्रपूर्वः । दिद्रासतीति । 'द्रा कुत्सितायाङ्गतौ' ।

केचिदजादेरित्यादि । तेषां मतेनाजादेरुत्तरे ये नकारादयः संयोगादिभूतास्ते न द्विरुच्यन्त इति सूत्रार्थः । किं पुनस्तदनुवर्त्तनस्य प्रयोजनम् ? इत्यत आह—तस्येत्यादि । दकारस्तु द्विरुच्यत एवेति कर्मधारयपञ्चम्यन्तानुवृत्तौ हि 'तस्मादित्युत्तरस्य' इत्यनन्तराणामेव नकारादीनां द्विर्वचनप्रतिषेधेन भवितव्यम्; निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् । दकारस्तत्र यद्यपि रेफदकारयोर्यः संयोगस्तदादिभूतः, तथापि नकारेण व्यवहितः । तस्माद्दकारोऽपि द्विरुच्यत एव । इन्दिद्रीयिषतीति । इन्द्रशब्दात् क्यचि कृते 'क्यचि च' इतीत्वम्, क्यजन्तात् सन्, इट्, 'अतो लोपः' इत्यकारलोपः । उब्जिजिषतीति । 'उब्ज आर्जवे' । यदा बकारोपध उब्जिरुपदिश्यत इति । प्रतिषेधस्य विषयं दर्शयति । इह केचिद् बकारोपधमिमं धातुं पठन्ति—उब्जितेत्येवमादिरूपं यथा स्यात् । केचिन् च दकारोपधमभ्युद्गः, समुद्ग इति यथा स्यात् । तत्र यदा बकारोपध उब्जिरु-पदिश्यते तदायं प्रतिषेधो वक्तव्यः । दकारोपधोपदेशे तु न वक्तव्यः, 'न न्द्राः' इत्यनेनैव सिद्धत्वात् । बत्वं तु तदा दकारस्य विधातव्यमिति । उब्जिता, उब्जिजिषतीति

Indira Gandhi National Centre for the Arts

❀ यकारपरस्य रेफस्य प्रतिषेधो न भवतीति वक्तव्यम् ❀। अरार्यते। अर्तेः 'अटचर्तिशूर्णोतीनामुपसंख्यानम्' इति यङ्। तत्र 'यङि च' इति गुणः, ततो द्विर्वचनम्।

❀ ईर्ष्यतेस्तृतीयस्य द्वे भवत इति वक्तव्यम् ❀। कस्य तृतीयस्य? केचिदाहुर्व्यञ्जनस्येति—ईर्ष्यियिषति। अपरे पुनः 'तृतीयस्यैकाचः' इति व्याचक्षते—ईर्ष्यिषिषति।

पदमञ्जरी

यकारपरस्येति। यकारः परो यस्माद्रकारात्तस्येत्यर्थः।

व्यञ्जनस्येति। तृतीयव्यञ्जनसहितस्यैकाच इत्यर्थः। तत्र षकारस्य द्विर्वचनं न भवति। *अपरे पुनरिति*। अस्मिन्पक्षे ईर्ष्यतेस्सनि कृते इति व्याख्येयम्, तत्सम्बन्धिनस्तृतीयस्यैकाचोऽसम्भवात्। नामधातवः=सुब्धातवः।

न्यासः

यथा स्यात्। तदपि बत्वमकुत्वविषये विधातव्यम्; अन्यथाऽभ्युद्गः, समुद्ग इति न सिध्येत्। दकारोपधस्यैव युक्तः पाठः। बत्वमात्रं वक्तव्यम्? तदपि न वक्तव्यम्; तत्र 'भुजन्युब्जौ पाण्युपतापयोः' इति निपातनादेव लिङ्गाद् बत्वं लभ्यते। न चाभ्युद्गः, समुद्ग इत्यत्रापि प्रसज्येत, अकुत्वविषयत्वान् निपातनस्य; यत्र कुत्वं नास्ति तत्रैव बत्वं विज्ञायते, न तु कुत्वविषये।

यकारपरस्येत्यादि। यकारः परो यस्मात् तस्य प्रतिषेधो न स्यादित्येतदर्थरूपं व्याख्येयमित्यर्थः। तत्र कैश्चिदेवं व्याख्यायते—बहिरङ्गो रेफः, 'गुणोऽर्त्तिसंयोगाद्योः', 'यङि च' इति गुणोऽङ्गस्य विधीयमानो यङि भवति बहिरङ्गः, तदाश्रितो रेफोऽपि बहिरङ्ग एव, ततश्च सोऽन्तरङ्गे प्रतिषेधेऽसिद्धः। तस्मात् तस्य द्विर्वचनप्रतिषेधो न भवतीति। यद्येवम्, इन्दिदिषतीति नुमोऽपि प्रतिषेधो न प्राप्नोतीति? नैष दोषः; वक्ष्यति ह्येतत्—नुम्विधावुपदेशिवद्वचनमिति।

नैयायिकास्त्वन्यथा वर्णयन्ति—'न न्द्राः संयोगादयः' इति। तैः किमुक्तम्? 'संयोगात् पूर्वं नकारादयो न द्विरुच्यन्ते स चेद् भवति यकारान्तः संयोगः' इति। तेनारार्यत इत्यत्र संयोगस्य यकारान्तत्वात् प्रतिषेधो न भवतीति। **अरार्यत इति**। 'यङि च' इति गुणे रपरत्वे च र्यशब्दस्य द्विवचनम्, हलादिशेषः, 'दीर्घोऽकितः' इति दीर्घः। ननु चार्तेरहलादित्वाद् यङा न भवितव्यम्, स हि 'धातोरेकाचः' इत्यादिना हलादेरेव धातोर्विधीयते? इत्याह—**अर्त्तेरित्यादि**।

व्यञ्जनस्येति। ईर्ष्यतेर्व्यञ्जनं यदेकाच् तस्य द्विर्वचनं कर्त्तव्यम्। तच्च व्यञ्जनं यकारः, तस्येटि कृते साच्कस्यैव द्विर्वचनं कर्त्तव्यम्।

Indira Gandhi National Centre for the Arts

❀ कण्ड्वादीनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् ❀। कण्डूयियिषति। असूयियिषति ॥

❀ वा नामधातूनां तृतीयस्यैकाचो द्वे भवत इति वक्तव्यम् ❀। अश्वीयियिषति। अशिश्वीयिषति।

अपर आह—

❀ यथेष्टं नामधातुष्विति वक्तव्यम् ❀। पुपुत्रीयिषति। पुतित्रीयिषति। पुत्रीयियिषति। पुपुतित्रीयियिषति। पुत्रीयिषिषति ॥

पूर्वोऽभ्यासः ॥ ४ ॥

'द्वे' इति प्रथमान्तं यदनुवर्त्तते तदर्थादिह षष्ठयन्तं जायते। तत्र प्रत्यासत्तेरस्मिन्प्रकरणे ये द्वे विहिते तयोर्यः पूर्वोऽवयवः सोऽभ्यास-

पदमञ्जरी

पूर्वोऽभ्यासः ॥ *अर्थादिति*। सामर्थ्यात्पूर्वशब्दोऽयमवयववचनः, अवयवश्चावयविनो भवति, स चेह कश्चिन्न निर्दिष्टः, अतोऽवश्यम् 'द्वे' इति अत्रानुवर्त्तनीयम्। न चानुवृत्तमपि प्रथमान्तमेवावस्थितमवयव्यपेक्षां पूरयितुमलमित्येतत्सामर्थ्यम्। *अस्मिन्प्रकरण इति*। अनेन 'सर्वस्य द्वे' इत्यत्र प्रकरणे इयं संज्ञा न

न्यासः

एकाच इति। सनः। स हीटि कृते तृतीय एकाज् भवति। तस्य द्विर्वचने कृते 'सन्यतः' इतीत्त्वम्। पूर्वं पूर्वमिणमाश्रित्य सर्वसकाराणां षत्वम्। **कण्डूयियिषतीति**। **असूयियिषतीति**। 'कण्डूञ्', 'असूञ्' इति कण्ड्वादिषु पठ्येते, ततः 'कण्ड्वादिभ्यो यक्'।

वा नामधातूनामिति। सुब्धातुर्नामधातुरभिधीयते। **अश्वीयियिषतीति**। अश्वशब्दात् क्यजन्तात् सनीटि च कृते यिष्शब्दस्य द्विर्वचनम्। **अशिश्वीयिषतीति**। श्वीशब्दस्य द्विर्वचनम्, ह्रस्वत्वम्, हलादिशेषः।

यथेष्टमिति। प्रथमादीनामन्यतरस्य यस्येष्यते तस्य कर्त्तव्यमिति ॥

पूर्वोऽभ्यासः ॥ अभ्यासशब्दोऽयमावृत्तिवचनो लोके प्रसिद्ध एव। सा चावृत्तिः प्रथमस्य नास्तीत्यभ्यासप्रदेशेषु परस्य ग्रहणे प्राप्ते पूर्वस्य ग्रहणं यथा स्यादित्येवमर्थं तस्याभ्याससंज्ञा विधीयते। पूर्वशब्दोऽवयववचनः, यथा—पूर्वं कायस्य पशोरिति। अवयवाश्चावयविनो भवन्ति, स चेह यद्यपि न निर्दिश्यते, तथापि 'द्वे' इत्यनुवृत्तेस्तद्वाच्यस्यैवार्थस्य पूर्वो विज्ञायत इत्याह—**द्वे इति प्रथमान्तं यदनुवर्त्तत इत्यादि**। ननु च 'द्वे' इति प्रथमान्तमनुवर्त्तते, षष्ठयन्तेन चेहार्थः, न ह्यन्यथा पूर्वशब्देन सम्बन्धः शक्यते दर्शयितुमित्यत आह—**तदर्थादित्यादि**। अर्थाद्विभक्तिविपरिणामो भवतीति। तदिह

संज्ञो भवति । पपाच । पिपक्षति । पापच्यते । जुहोति । अपोपचत् ।

अभ्यासप्रदेशास्तु—'अत्र लोपोऽभ्यासस्य' इत्येवमादयः ॥

उभे अभ्यस्तम् ॥ ५ ॥

'द्वे' इति वर्त्तमाने 'उभे' ग्रहणं समुदायसंज्ञाप्रतिपत्त्यर्थम् । ये द्वे विहिते ते उभे अपि समुदिते अभ्यस्तसंज्ञे भवतः । ददति । ददत् । दधतु ।

पदमञ्जरी

भवति, तेन तत्र हलादिशेषाद्यभावः । यद्येवम्, 'द्युतिगमिजुहोत्यादीनां द्वे' इत्यत्र न प्राप्नोति ? कर्त्तव्योऽत्र यत्नः । *तयोः पूर्वोऽवयव इति* । अवयववाचिभिर्दिक्शब्दैर्योगे पञ्चमी न भवति; 'तस्य परमाम्रेडितम्' इति लिङ्गात् । *पपाचेत्यादौ* 'हलादिः शेषः', 'सन्यतः', 'दीर्घोऽकितः', 'कुहोश्चुः', 'अभ्यासे चर्च', 'सन्वल्लघुनि', 'दीर्घो लघोः' इत्यादीनि यथायोगमभ्यासकार्याणि ॥

उभे अभ्यस्तम् ॥ द्वे इति वर्त्तमान इत्यादि । द्विरुक्तसमुदायस्यैकाऽभ्यस्तसंज्ञा यथा स्याद्, द्वयोर्द्वे संज्ञे मा भूतामित्येवमर्थमुभेग्रहणम्, न तु संज्ञिनिर्देशार्थम् । द्वे इत्यस्यानुवृत्त्यैव संज्ञिनिर्देशस्य सिद्धत्वादित्यर्थः । दद*तीत्यादौ* 'अदभ्यस्तात्' इत्यद्भावः, 'श्नाभ्यस्तयोरातः' इत्याकारलोपः ।

न्यासः

षष्ठ्यन्तं जायत इत्यर्थः । अथ पुनरत्रावयवावयविलक्षणा षष्ठी भवति, यथा—वृक्षस्य शाखेति ? एवमपि यदि 'द्वे' इत्यनुवृत्तेर्द्वयोर्यः पूर्वस्तस्याभ्याससंज्ञा विधीयते तदा 'सर्वस्य द्वे' इत्यत्रापि प्रकरणे ये द्वे विहिते तयोर्यः पूर्वस्तस्याप्यभ्याससंज्ञा प्राप्नोतीत्यत आह—**तत्रेत्यादि** । **पूर्वोऽवयव इति** । पूर्वशब्दो व्यवस्थावचनोऽप्यस्ति, अतस्तद्व्यवच्छेदार्थमवयवग्रहणम्, पपाचेत्यत्राभ्याससंज्ञायाम् सत्याम् 'ह्रस्वः' इत्यभ्यासस्य ह्रस्वत्वम्, हलादिशेषः, प्रकृतिचरां प्रकृतिचरो भवन्तीति चर्त्वम् । **पिपक्षतीति** । 'सन्यतः' इतीत्त्वम् । **पापच्यत इति** । 'दीर्घोऽकितः' इति दीर्घत्वम् । **जुहोतीति** पूर्ववद्धकारस्य चुत्वम्, तस्य 'अभ्यासे चर्च' इति जकारः । **अपीपचदिति** । पचेर्ण्यन्ताच्च्लेश्चङ्, णिलोपः, 'णौ चङ्युपधाया ह्रस्वः', द्विर्वचनम्, 'सन्वल्लघुनि' इतीत्त्वम्, 'दीर्घो लघोः' इति दीर्घः । सर्वाण्यभ्याससंज्ञायाः प्रयोजनान्येतानि ॥

उभे अभ्यस्तम् ॥ इह उभेग्रहणं संज्ञिनिर्देशार्थं क्रियते । स च संज्ञिनिर्देशः 'द्वे' इत्यनुवृत्तेरन्तरेणाप्युभेग्रहणं प्रकल्प्यत एव, तत् किमर्थं द्वे इत्यनुवर्त्तमान उभेग्रहणं क्रियते ? इत्यत आह—**द्वे इत्यनुवर्त्तमान इत्यादि** । यद्युभेग्रहणं न क्रियेत, तदा

Indira Gandhi National Centre for the Arts

उभेग्रहणं किम् ? नेनिजतीत्यत्र 'अभ्यस्तानामादिः' इति समुदाये उदात्तत्वं यथा स्यात्, प्रत्येकं पर्यायेण वा मा भूदिति ।

पदमञ्जरी

नेनिजतीत्यत्रेत्यादि । असत्युभे ग्रहणे 'वृद्धिरादैच्' इत्यादौ प्रत्येकं वाक्यपरिसमाप्तिदर्शनादिहापि प्रत्येकं स्यात्, ततश्च नेनिजतीत्यत्र पृथगाद्युदात्तत्वं स्यात् । न च 'अनुदात्तं पदमेकवर्जम्' इत्येकस्यानुदात्तत्वम्; वर्जनीयविशेषावगमहेतोः सतिशिष्टत्वादेरसम्भवात् । अथापि स्यात्, एवमपि पर्यायः स्यात् । ननु च 'भीह्रीभृहुमद' इति ज्ञापकात्परस्य न भविष्यति ? पूर्वस्यापि तर्हि न स्यात्, परेण व्यवधानात् । उच्यते च स्वरः, ततश्च स एव पर्यायप्रसङ्गः ।

यदि तु संयोगसमासादिसंज्ञावदन्वर्थत्वप्रतिपत्त्यर्थं महासंज्ञाकरणम्, तेनान्वर्थताविज्ञाने समुदायस्यैव संज्ञेत्युच्यते, तदोभेग्रहणं शक्यमकर्तुम् । ननु यत्रोभे श्रूयेते तत्र यथा स्यात्, अन्यतराभावे मा भूद्–इत्येवमर्थमुभेग्रहणं कर्त्तव्यम्; अन्यथा ऋधेरापश्च 'सनीवन्त' इति इडभावपक्षे परत्वात् प्रतिपदविहितत्वाच्च 'आप्ज्ञप्यृधामीत्' इतीत्वे 'न न्द्राः' इति प्रतिषेधाद्रेफवर्जं द्वितीयस्यैकाचो द्विर्वचने कृते 'अत्र लोपोऽभ्यासस्य' इत्यतः प्रागन्तरङ्गत्वादभ्यस्तसंज्ञा स्यात् । सा च प्रत्येकम्, समुदायस्य वा ? तत्र प्रत्येकपक्षेऽभ्यासलोपेऽपि परस्य न निवर्तेत । समुदायपक्षेऽपि पूर्वं संज्ञा समुदाये प्रवृत्ता; पश्चादेकदेशनिवृत्तावप्यवशिष्टेऽवतिष्ठेत । यथेयसुन ईकारे लुप्तेऽपि तद्धितसंज्ञा–भूयानित्यत्र । सत्यां च संज्ञायाम्—ईप्सन्ति, ऐप्सन्, ईर्त्सन्ति, ऐर्त्सन्, इत्यत्राड्भावजुसभावनुम्प्रतिषेधाः स्युः, अतः श्रूयमाणप्रतिपत्त्यर्थमुभेग्रहणं कर्त्तव्यम् ? तन्न; प्रतीषिषतीत्यादिवत्सिद्धेः । तथा हि–'अजादेर्द्वितीयस्य' इति सनि द्विरुक्ते श्रूयमाणयोरुभयोः सत्यामप्यभ्यस्तसंज्ञायामड्भावादयो न भवन्ति । यथा च पुत्रीयियिषन्तीत्यादौ 'यथेष्टं नामधातूनाम्' इति सनि द्विरुक्ते, तद्वदत्रापि न भविष्यति । अत्र हि ईप्स + झि, ईर्त्स + झीति स्थितेऽड्भावात्प्राग्नित्यत्वाच्छप्, अड्भावो हि शपि कृते

न्यासः

प्रत्येकमभ्यस्तसंज्ञा प्रवर्त्तते । प्रत्येकमपि हि तयोः प्रवर्त्तमानासौ प्रवृत्तैव भवति । तथा हि—द्वावानीयेयातामित्युक्ते प्रत्येकमप्यानयनेन तावानीतौ भवतः । तस्मात् समुदाये संज्ञायाः प्रवृत्तिर्यथा स्यादेकैकस्य मा भूदित्येवमर्थमुभेग्रहणम् । समुदिते इति । सहिते, समुदायभूते इत्यर्थः । ननु च यत्राभ्यासः श्रूयते तत्रैव यथा स्याद्, यत्र तु न श्रूयते तत्र मा भूद् । ईप्सन्ति, ईप्सन्, ऐप्सन्नित्यादौ विषये मा भूदित्येवमर्थमुभेग्रहणं स्यात् ? नैतदस्ति; अभ्यासग्रहणं ह्यनुवर्तते, तत्रैवमभिसम्बन्धः क्रियते—द्वे अभ्यस्तसंज्ञे भवतः, अभ्यासश्चेदस्तीति । एवञ्च सति विनाप्युभेग्रहणं यत्राभ्यासः श्रूयते, तत्रैव

अभ्यस्तप्रदेशाः–'अभ्यस्तानामादिः' इत्येवमादयः ॥

जक्षित्यादयः षट् ॥ ६ ॥

पदमञ्जरी

तेन व्यवधानान्न प्राप्नोतीत्यनित्यः, ततः 'झोऽन्तः' प्राप्नोति, पूर्वेण सहैकादेशश्च, परत्वादन्तादेशः। नित्य एकादेशः–कृतेऽप्यन्तादेशे प्राप्नोति, अकृतेपि। अन्तादेशस्त्वनित्यः, कृते एकादेशे तस्यान्तवद्भावादभ्यस्तग्रहणेन ग्रहणादद्भावेन बाध्यते। यस्य च निमित्तं लक्षणान्तरेण विहन्यते तदनित्यम्। अन्तरङ्गस्तर्ह्येकादेशः; वर्णाश्रयत्वात्। अन्तादेशस्त्वाङ्गत्वाद्बहिरङ्गः, समानाश्रये च 'वार्णादाङ्गं बलीयः'; अन्तादेशोऽप्यन्तरङ्गः, वक्ष्यति हि–आयन्नादिषूपदेशिवद्वचनमिति। तदेवमुभयोरप्यन्तरङ्गयोर्नित्ययोश्च परत्वादन्तादेशः, ततो झकाराभावादलाश्रयत्वेन स्थानिवद्भावाभावाच्चादादेशो न भवति।

अस्तु वा पूर्वमेकादेशः, एवमपि 'आत्मनेपदेष्वनतः' इत्यत्र'अनतः' इत्यस्य 'अदभ्यस्तात्' इति पूर्वेणापि सम्बन्धात्पूर्वस्मादपि विधावेकादेशस्य स्थानिवत्त्वाद्वाऽद्भावो न भविष्यति। एवमैप्सन्नित्यत्रापि, ईप्स=झि इति स्थिते शप् च प्राप्नोति, जुस्भावश्च, नित्यत्वाच्छपि कृते तेन व्यवधानान्न जुस्भावः। न च पूर्वेण सहैकादेशे कृते तस्यान्तद्भावात्पुनर्जुस्प्रसङ्गः, पूर्वस्मादपि विधौ स्थानिवत्त्वात्। ईप्सन्नित्यत्रापि लटः शत्रादेशः, ईप्स+शतृ इति स्थिते सार्वधातुकमात्रापेक्षत्वादन्तरङ्गत्वाच्छपि कृते तत्र सनोऽकारेणातो गुणे पररूपे पश्चात्सर्वनामस्थाने चोत्पन्ने नुमः प्रसक्तस्य तस्यां दशायां शत्रभ्यस्तयोर्व्यपवर्गाभावादुभयवर्णाश्रयत्वेनान्तादिवद्भावाभावाच्च निषेधाभावः। एवं प्रतीषिषन्तीत्यादावपि। चिकीर्षन्तीत्यादौ तु यत्र सनोऽकारो न द्विरुच्यते, तत्र तेनैव व्यवधानादद्भावाद्यभावः ॥

न्यासः

भविष्यति, नान्यत्र। तस्माद् वृत्तिकारोपदर्शितमेवोभेग्रहणस्य प्रयोजनं युक्तम्। ददतीति। ददातेर्लट्, झि, शप्, 'जुहोत्यादिभ्यः श्लुः', 'श्लौ' इति द्विर्वचनम्। अत्राभ्यस्तसंज्ञायां सत्याम् 'श्नाभ्यस्तयोरातः' इत्याकारलोपः, 'अदभ्यस्तात्' इति झेरदादेशः। ददात्विति। लोट्, 'एरुः' इत्युत्वम्।

समुदाय उदात्तत्वं यथा स्यादिति। उभेग्रहणे ह्यसति प्रत्येकमभ्यस्तसंज्ञा स्यात्। तस्माद् 'अभ्यस्तानामादिः' इत्याद्युदात्तमपि प्रत्येकं स्यात्। अथापि 'अनुदात्तं पदमेकवर्जम्' इति नास्ति यौगपद्यसम्भवः, एवमपि पर्यायेण स्यात्! तस्माद् 'अभ्यस्तानामादिः' इत्येतत् कार्यं समुदाये यथा स्यात्, प्रत्येकं पर्यायेण वा मा भूदित्येवमर्थमुभेग्रहणम् ॥

Indira Gandhi National Centre for the Arts

'अभ्यस्तम्' इति वर्त्तते। 'जक्ष' इत्ययं धातुरित्यादयश्चान्ये षट् धातवोऽभ्यस्तसंज्ञा भवन्ति। सेयं सप्तानां[1] धातूनामभ्यस्तसंज्ञा विधीयते। 'जक्ष भक्षहसनयोः' इत्यतः प्रभृति 'वेवीङ् वेतिना तुल्ये' इति यावत्। जक्षति। जाग्रति। दरिद्रति। चकासति। शासति।

दीध्यते, वेव्यते--इत्यत्र 'अभ्यस्तानामादिः' इत्येष स्वरः प्रयो-

पदमञ्जरी

जक्षित्यादयः षट् ॥ अत्र जक्षेः श्तिपि 'रुदादिभ्यः सार्वधातुके' इतीटि कृते जक्षितिरिति भवति, स आदिर्येषां ते जक्षित्यादय इति विज्ञायमाने वेव्यतेः सप्तमस्य न स्यात्, लाघवार्थमसन्देहार्थं च इकैव निर्देष्टव्यं स्यात्—जक्ष्यादय इति। तस्मान्नायमुक्तविग्रहो बहुव्रीहिः, किं तर्हि? 'जक्ष' इति पृथक् पदमित्याह—*जक्ष इत्ययं धातुरित्यादयः षडिति*। इतिनानन्तरो जक्षिर्निर्दिश्यते। आदिशब्दः समीपवचनः, अतद्गुणसंविज्ञानो बहुव्रीहिः। *सेयमिति*। येयमुक्तप्रकारा, सेयमित्यर्थः।

एष स्वर इति। अन्यथा ङित्त्वाल्लसार्वधातुकानुदात्तत्वं धातुस्वरः, यणादेशे 'उदात्तस्वरितयोः' इति स्वरितत्वं प्रसज्यते। *शतरि व्यत्ययेन सम्पादित इति*। ङित्त्वात्परस्मैपदासम्भवाद्व्यत्ययः।

षड्ग्रहणमनर्थकम्, सन्त्वागणान्ता जक्षित्यादयः। वेवीङोऽपि परे ये पठ्यन्ते तेषां कस्मान्न भवति? अत्रैवं गणपाठः, वेवीङोऽनन्तरम् 'षस स्वप्ने, वश कान्तौ, चर्करीतं च, ह्नुङ् अपनयने' इति, केचिद्वेवीङोऽनन्तरम् 'आङः शासु' इति पठन्ति, 'षस्ति स्वप्ने' इति च। तत्राशासो न विशेषः; अभ्यस्तकार्याणि

न्यासः

जक्षित्यादयः षट् ॥ **जक्षित्यादय इति**। एष निर्देशो जक्षेः श्तिबन्तस्यादिशब्देन बहुव्रीहावपि कृते भवति, द्वन्द्वेऽपि—यदा जक्षेरनजन्तस्येत्यादिशब्दस्य च द्वन्द्वः क्रियते। वाक्येऽपि यदानयोरन्तरोक्तयोरुभयोरपि प्रयोगो भवति, तदा तत्र बहुव्रीहौ गृह्यमाणे यदि तद्गुणसंविज्ञानोऽयं बहुव्रीहिराश्रीयेत, तदा वेवीङो ग्रहणं न स्यात्; अथातद्गुणसंविज्ञानोऽयम्, तदा जक्षेर्न स्यादितीमं बहुव्रीहेराश्रयणे दोषं दृष्ट्वेतरयोः पक्षयोरन्यतरमाश्रित्याह—**जक्षित्ययं धातुरित्यादयश्चेत्यादि**। अत्रेतिशब्दोऽतिक्रान्तप्रत्यवमर्शी। जक्षित्ययं धातुरनन्तरमतिक्रान्त इति स एव तेन प्रत्यवमृश्यते। इति आदिर्येषां त इत्यादयः, जक्षादय इत्यर्थः। ते पुनर्जागृप्रभृतयो वेवीङ्पर्यन्ताः। **सेयं सप्तानां धातूनामभ्यस्तसंज्ञेति**। जक्षित्येतदुपलक्षितानां जागर्त्तिप्रभृतीनां षण्णां जक्षितिरित्येतस्य च सप्तमस्य तेभ्यः पृथग्निर्दिष्टस्य।

---

1. जक्षिजागृदरिद्राणां चकासेः शास एव च।
दीधीवेव्योश्च सप्तानां जक्षित्याद्युपग्रहः ॥

Indira Gandhi National Centre for the Arts

जनम्। दीध्यदिति च शतरि व्यत्ययेन सम्पादिते 'नाभ्यस्ताच्छतुः' इति नुमः प्रतिषेधः ॥

तुजादीनां दीर्घोऽभ्यासस्य ॥ ७ ॥

तुजादीनामिति प्रकारे आदिशब्दः। कश्च प्रकारः? तुजेर्दीर्घो-

पदमञ्जरी

भूयिष्ठानि परस्मैपदिषु, आत्मनेपदी चायम्। अभ्यस्तस्वरेऽपि नास्ति विशेषः, कथम्? अनभ्यस्तेऽपि तस्मिन्ननुदात्तेतः परं लसार्वधातुकमनुदात्तं धातुस्वरश्च, चर्करीतमभ्यस्तमेव, षसषस्ती छान्दसौ, वशिरपि, तस्यापि भाषायां न प्रयोगस्साधुः–भाष्यवार्त्तिककारौ चेत्प्रमाणम्। ह्नुङोऽपि ङित्त्वात्परस्मैपदासम्भवः। स्वरस्तर्हि प्राप्नोति, 'अह्न्विङोः' इति प्रतिषेधवचनसामर्थ्यान्न भविष्यति, यदि स्यात्, तर्ह्यपह्नुवत इत्यादावभ्यस्तस्वरे सति लसार्वधातुकस्य भवितव्यमेव निघातेनेति प्रतिषेधोऽनर्थकः स्यात्। तस्मात्प्रत्ययस्वरो यथा स्यात्, लसार्वधातुकानुदात्तत्वं मा भूदित्यह्न्विङोरिति प्रतिषेधोऽर्थवान् भवतीति प्रतिषेधसामर्थ्यात्प्रत्ययस्वरः एव भविष्यति, नाभ्यस्तस्वरः। ननु चाभ्यस्तस्वरोऽजादौ विधीयते, ततः किम्? अजादौ तस्मिन्प्रवृत्तेऽपि ह्नुते, षेह्नु, ह्नुवे–इत्यत्र तस्याप्रवृत्तौ यद्यह्न्विङोरिति प्रतिषेधो न क्रियेत, ततो धातुस्वरेणाद्युदात्तं पदं स्यात्। अन्तोदात्तं यथा स्यादिति प्रतिषेधः क्रियेत। तदेवं सति प्रयोजने न प्रतिषेधसामर्थ्यादभ्यस्तस्वरं बाधित्वा प्रत्ययस्वरः सिध्यति। एवं तर्हि 'अभ्यस्तानामादिः' इत्यत्राप्यह्न्विङोरित्यनुवर्त्तिष्यते, तदेवं नार्थः षड्ग्रहणेन। तदुक्तम्—अपरिगणनं वा गणान्तत्वात्॥

तुजादीनां दीर्घोऽभ्यासस्य ॥ अयं योगः शक्योऽवक्तुम्, कथम्? छान्द-

न्यासः

ननु च दीध्यते, वेव्यत इत्यत्रादादेशः 'आत्मनेपदेष्वनतः' इत्यनेनैव सिद्धः, शेषं चाभ्यस्तकार्यमाकारलोपादिकम्, तच्च दीधीवेव्योर्न सम्भवत्येव, तत्राकारलोपस्तावदाकारस्याभावान्न सम्भवति; जुस्भावोऽपि झेरभावात्, नुम्प्रतिषेधोऽपि ङित्वादात्मनेपदित्वाच्छतुः, तत् किमर्थमनयोरभ्यस्तसंज्ञा विधीयते? इत्याह—**दीध्यते वेव्यत इत्यादि**। **दीध्यदिति च शतरीत्यादिना** प्रयोजनान्तरमपि दर्शयति। आत्मनेपदित्वादनयोर्व्यत्ययेन विना शता न सम्भवतीति व्यत्ययग्रहणम्॥

तुजादीनां दीर्घोऽभ्यासस्य ॥ आदिशब्दोऽयमस्त्येव व्यवस्थायाम्, अस्ति च प्रकारे, तत्र यदि व्यवस्थायां वर्त्तमानो गृह्येत, तदा 'तुज पिज हिंसायाम्' इत्यत आरभ्य ये पठितास्तेषामेव ग्रहणं स्यात्; एवञ्च सौत्राणां गणान्तरपठितानाञ्च दीर्घो न स्यादित्येतदालोच्याह—**तुजादीनामित्यादि**। **प्रकार आदिशब्द इति**। स च प्रकारोऽनिर्दिष्टत्वान्न ज्ञायत इति पृच्छति—**कश्च प्रकार इति**। **तुजो दीर्घत्वमित्यादिना** प्रका-

Indira Gandhi National Centre for the Arts

भ्यासस्य न विहितः, दृश्यते च, ये तथाभूतास्ते तुजादयः, तेषामभ्यासस्य दीर्घः साधुर्भवति। तूतुजानः। मामहानः। अनड्वान् दाधार। स्वधां मीमाय। दाधार। स तूताव।

दीर्घश्चैषां छन्दसि प्रत्ययविशेषे एव दृश्यते, ततोऽन्यत्र न भवति—तुतोज शबलान्॥

लिटि धातोरनभ्यासस्य॥ ८॥

पदमञ्जरी

समेतद्दीर्घत्वं छन्दसि च दीर्घत्वं न शक्यं परिगणयितुम्, अन्येषामपि दर्शनात्–पूरुषः, नारक इति। अनेकाजङ्गत्वाच्च येषां चारभ्यते तेषामेव तस्मिन्प्रयोगे न दृश्यते–मामहानः, ममहान इति वा॥

लिटि धातोरनभ्यासस्य॥ धातोरिति किमिति। लिटि परतोऽन्यो न सम्भवति; तस्य धातोरेव विधानादिति प्रश्नः। *विशृण्विरे इति*। 'छन्दस्युभयथा'

न्यासः

रार्थत्वं दर्शयति। **ये तथाभूता इति।** अनन्तरोक्तप्रकारमापन्ना इत्यर्थः। **दीर्घः साधुर्भवतीति।** एतेन सत एव दीर्घस्य साधुत्वमात्रमनेन क्रियते। न त्वपूर्वो दीर्घ इति दर्शयति। **तूतुजान इति।** लिट्। एतच्च प्रकारवाचिन आदिशब्दस्य परिग्रहाल्लभ्यते, तस्य कानच्। **मामहान इति।** 'मह पूजायाम्', शेषं पूर्ववत्। **दाधान इति।** 'डुधाञ् धारणपोषणयोः'। **मीमायेति।** 'डुमिञ् प्रक्षेपणे', लिट्, णल्। **दाधारेति।** 'धृञ् धारणे'। **तूतावेति।** 'तु' इति सौत्रो धातुः; 'तुरुस्तुशम्यम' इत्यादिसूत्रे पठितत्वात्।

दीर्घश्चैषामित्यादिना यस्य सत एव साधुत्वमनेन क्रियते, स च दीर्घश्छन्दस्येव दृश्यते, न भाषायाम्। तत्रापि च्छन्दसि विषये प्रत्ययविशेषे कानजादौ, न प्रत्ययमात्रे। **ततोऽन्यत्र न भवतीति।** यथोक्ताद् विषयादन्यत्र न भवतीत्यर्थः। तुजेश्छन्दसि कानचि दृष्टः, ततोऽन्यत्र भाषायां छन्दस्यपि णलादौ प्रत्ययान्तरे न भवति। डुमिञ् छन्दसि णलि दृष्टः, ततोऽन्यत्र भाषायां छन्दस्यपि कानजादौ प्रत्ययान्तरे न भवति। यच्चैवं तेनास्यान्यत्राव्यापारः। सत एव दीर्घस्य साधुत्वमात्रमनेन विधीयते। न चान्यत्र दीर्घोऽस्ति यस्यानेन विधीयेत साधुत्वम्। एतच्च प्रकारवाचिन आदिशब्दाल्लभ्यत इति। **तुतोजेति।** भाषायां प्रयोगः। यदि तर्हि च्छन्दसि सत एव दीर्घस्य साधुत्वमनेन विधीयते, 'व्यत्ययो बहुलम्' इत्यनेन सुब्व्यत्ययस्य विहितत्वादपार्थकमेतत्? नापार्थकम्; तस्यैव प्रपञ्चार्थत्वात्॥

लिटि धातोरनभ्यासस्य॥ 'एकाचो द्वे प्रथमस्य' इति, 'अजादेर्द्वितीयस्य' इति चानुवर्त्तते। धातोरित्यवयवयोगा षष्ठी। सामानाधिकरण्ये हि प्रथमस्य, द्वितीयस्येति

लिटि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। पपाच। पपाठ। प्रोर्णुनाव। 'वाच्य ऊर्णोर्णुवद्भावः' इति वचनाद् ऊर्णोतेरिजादेरित्याम्न भवति।

लिटीति किम्? कर्त्ता। हर्त्ता। धातोरिति किम्? ससृवांसो विशृण्विरे। सोममिन्द्राय सुन्विरे। अनभ्यासस्येति किम्? कृष्णो नोनाव वृषभो यदीदम्। नोनूयतेर्नोनाव। सम्मान्या मरुतः सम्मिमिक्षुः। लिटि उसन्तः।

पदमञ्जरी

इति सार्वधातुकत्वात् 'श्रुवः शृ च' इति श्नुप्रत्ययः, शृभावश्च। अत्र विकरणान्तस्य समुदायस्य लिट्परस्याधातुत्वात्तदीयस्य प्रथमस्यैकाचो द्विर्वचनाभावः। ईक्षाञ्चक्रे इत्यादौ त्वामन्तस्य लिटपरत्वं नास्ति; 'आमः' इति लुका लुप्तत्वादिति द्विर्वचनाभावः सिद्धः। *अनभ्यासस्येति किमिति।* न तावद् नुनाव, पपाचेत्यादौ तत्रैव लिटि पुनर्द्विर्वचनप्रसङ्गः; सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्, अनवस्थापाताच्च। यस्तु प्रत्ययान्तरे सनादौ साभ्यासः, न तस्य लिटि सम्भवः; ततो हि 'कास्प्रत्ययाद्' इत्यामा भवितव्यमिति प्रश्नः। *नोनावेति।* 'अमन्त्रे' इति प्रतिषेधादत्रामभावः। *सम्मिमिक्षुरिति।* सम्पूर्वान्मिहेः सनि 'हो ढः', 'षढोः कः

न्यासः

च सम्बन्धो नोपपद्यते। 'अनभ्यासस्य' इति च प्रतिषेधाच्च। सामानाधिकरण्ये हि प्रतिषेधोऽनर्थकः स्यात्, न ह्यभ्यासवानेकाज् धातुः सम्भवति। **यथायोगमिति।** हलादेः प्रथमस्यैकाचोऽवयवस्य, अजादेस्तु द्वितीयस्येत्येष यथायोगार्थः। **प्रोर्णुनावेति।** 'ऊर्णुञ् आच्छादने' 'अजादेर्द्वितीयस्य' इति नुशब्दस्य द्विर्वचनम्। रेफस्य तु 'न न्द्राः' इति प्रतिषेधान्न भवति। ननु चोर्णोतेरिजादित्वात् 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि कृते 'आमः' इति लेर्लुक्, 'कृञ्चानुप्रयुज्यते लिटि' इति कृञो लिट्परस्यानुप्रयोगः, ततश्च प्रोर्णुवाञ्चकारेति भविष्यति, तत्कथं प्रोर्णुनावेति? अत आह—**वाच्य ऊर्णोरित्यादि।** नुवद्भावेन यथा नौतेराम् न भवति, तथोर्णोतेरपीति दर्शयति।

विशृण्विर इति। 'श्रु श्रवणे', 'लिटस्तझयोरेशिरेच्' इतीरेच्। 'छन्दस्युभयथा' इति लिटः सार्वधातुकत्वम्, ततः 'श्रुवः शृ च' इति श्नुः, शृभावश्च। 'हुश्नुवोः सार्वधातुके' इति यणादेशः। **सुन्विरे इति।** 'षुञ् अभिषवे'। धातुग्रहणादिह विकरणस्य द्विर्वचनं न भवति। यस्तत्र धातुस्तस्य विकरणेन व्यवहितत्वान्न भवतीत्येके। छान्दसत्वादित्यपरे, सर्वे विधयश्छन्दसि विकल्प्यन्त इति। एतच्च 'व्यत्ययो बहुलम्' इत्यस्माद् बहुलग्रहणाल्लभ्यते। एवञ्च कृत्वा 'द्विर्वचनप्रकरणे छन्दसि वा' इत्येतन्न

Indira Gandhi National Centre for the Arts

❀ द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ❀। यो जागार तमृचः कामयन्ते। दाति प्रियाणोति ॥

सन्यङोः ॥ ९ ॥

'धातोरनभ्यासस्य' इति वर्त्तते। 'सन्यङोः' इति च षष्ठयन्तमेतत्। सनन्तस्य यङन्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यै-

पदमञ्जरी

सि', लिट्, झेरुस्, अतोलोपः। *द्विवचनप्रकरण इति*। प्रकरणग्रहणान्न केवलं सर्वं द्विर्वचनं छन्दसि विकल्प्यते। एवं च 'धातोः', 'अनभ्यासस्य' इत्युभयमुत्तरार्थम्। एतस्मादेव विकल्पाद्विकरणान्तसाभ्यासयोर्न भविष्यति ॥

सन्यङोः ॥ *षष्ठ्यन्तमेतदिति*। तत्र प्रत्ययग्रहणपरिभाषया तदन्तस्य द्विर्वचनम्, न तु सन्यङोरेव, यदाह—*सनन्तस्य यङन्तस्य चेति*। सप्तमीपक्षे तु सन्यङोः

न्यासः

कर्त्तव्यं भवति। नोनावेति। 'णु स्तुतौ', यङ्, द्विर्वचनम्, 'गुणो यङ्लुकोः' इति गुणः, नोनूय इति स्थिते 'यङोऽचि च' इति यङो लुक्, लिट्। 'अमन्त्रे' इति निषेधादाम्न भवति। सम्मिमिक्षुरिति। 'मिह सेचने', अतः सम्पूर्वात् सन्, 'हो ढः' इति ढत्वम्, 'षढोः कः सि' इति कत्वम्, 'एकाचः' इत्यादिनेट्प्रतिषेधः, 'हलन्ताच्च' इति किल्वादगुणः, द्विर्वचनम्, षत्वम्; सम्मिमिक्ष इति स्थिते लिट्, 'अमन्त्रे' इति प्रतिषेधादाम् न भवति। झि, तस्य उस्, अतो लोपः।

जागारेति। लिट्। दातीति। श्लुः। वेति वचनात् पक्षे जजागार, ददातीत्यपि भवति ॥

सन्यङोः ॥ सन्यङोरिति सप्तम्यन्तमिदं वा स्यात्? षष्ठयन्तं वा? तत्र यदि सप्तम्यन्तं स्यात् तदायमर्थः स्यात्—सन्यङोः परत इति, ततश्चेटः सन्भक्तत्वात् सन्ग्रहणेन ग्रहणात्, सनश्चेह द्विर्वचननिमित्तत्वान् निमित्तस्य च कार्यिणोऽयोगादिटो द्विर्वचनं न स्यात्, ततश्चाटिटिषतीत्यादि न सिध्येत्। षष्ठयन्ते त्वस्मिन् प्रत्ययग्रहणपरिभाषया तदन्त उपस्थापिते सत्ययमर्थो जायते—सनन्तस्य यङन्तस्य च यः प्रथम एकाज् द्वितीयो वा तेनेटो द्विर्वचनं भवतीति। तथा चाटिटिषतीत्यादि सिध्यतीत्येतदालोच्याऽऽह—सन्यङोरिति षष्ठ्यन्तमेतदिति। अत्र च ज्ञापको योगविभाग इति। यदि हि 'सन्यङोः' इति सप्तम्यन्तं स्यात्, 'श्लुसन्यङः' इत्येकमेव योगं कुर्यात्। ननु चासत्यपि प्रयोजने ज्ञापकमस्ति, अस्ति चेह योगविभागस्य प्रयोजनम्, किं तत्? सामर्थ्याद् यथासंख्यं यथा स्यात्—सनि प्रथमस्य, यङि द्वितीयस्येति? नैतदस्ति; यदि ह्यत्र यथासंख्यमभिप्रेतं स्यात् तदा 'नीग्वञ्चु' इत्यादिना वञ्चुप्रभृतीनामभ्यासस्य

Indira Gandhi National Centre for the Arts

काचो द्वितीयस्य वा यथायोगं द्वे भवतः । पिपक्षति । पिपतिषति । अरिरिषति । उन्दिदिषति ।

यङन्तस्य—पापच्यते । अटाट्यते । यायज्यते । अरार्यते । प्रोर्णोनूयते ।

अनभ्यासस्येत्येव—जुगुप्सिषते । लोलूयिषते ॥

श्लौ ॥ १० ॥

श्लौ परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । जुहोति । बिभेति । जिह्रेति ॥

पदमञ्जरी

परतः पूर्वस्य धातोर्द्विर्वचनं भवतीत्ययमर्थः स्यात्, ततश्च सन्भक्तस्येटो द्विर्वचनं न स्यात्—अटिटिषति, अशिशिषतीत्यादौ; तथा प्रतीषिषतीत्यादौ सनो न स्यात् । एवमरार्यत इत्यादौ यङः, तथा सप्तम्यामिष्टायां पूर्वेणापरेण वा सहैकमेव योगं कुर्यात् ।

जुगुप्सिषत इति । गुपे 'गुप्तिज्किद्भ्यः सन्', तत्र सनि द्विर्वचनम्, पुनरिच्छासन, तत्राकृतत्वात्पुनर्द्विर्वचनप्रसङ्गः । *लोलूयिषते इति ।* अत्रापि यङि द्विर्वचनम्, न तु सनीति द्विर्वचनप्रसङ्गः ।

भागवृत्तिकारस्त्वाह—"पूर्वसूत्रे 'धातोरनभ्यासस्य' इति द्वयमपि प्रत्याख्याय *भाष्यकारेणोक्तम्*—'तिष्ठतु तावत्सांन्यासिकं धातुग्रहणम्' इति, उत्तरार्थमिति भावः । अनभ्यासग्रहणस्य तु न किञ्चित्प्रयोजनमुक्तम्, ततश्चोत्तरार्थमपि तन्न भवतीति *भाष्यकारस्याभिप्रायो* लक्ष्यते । तेनात्र भवितव्यमेव द्विर्वचनेन" इति ॥

श्लौ ॥ श्लौ परत इति । वर्णानामपि युगपदवस्थानाभावाद् बुद्धिपरिकल्पितं पौर्वापर्यम्, तच्चाभावरूपेण श्लुनाप्युपपद्यत इति भावः । *अनभ्यासस्येति ।*

न्यासः

यङ्लुको नीगागमविधानं नोपपद्यते । यथासंख्ये हि सति यद्येषां द्विर्वचनं नास्तीति नीगागमं न विदध्यात् । तस्माद् योगविभागात् षष्ठयन्तमेतदित्यवसीयते ।

अटाट्यत इति । यङ्विधौ 'सूचिसूत्रिमूत्र्यट्यत्यर्शूर्णोतीनामुपसंख्यानम्' इति यङ् । **प्रोर्णोनूयत इति** । 'अकृत्सार्वधातुकयोः' इति दीर्घः । **जुगुप्सिषत इति** । गुपेः 'गुप्तिज्किद्भ्यः सन्' इति सन्, तदन्ताद् 'धातोः कर्मणः समानकर्तृकात्' इत्यादिनेच्छायां पुनः सन् ।

लोलूयिषत इति । यङन्तात् सन् ॥

श्लौ ॥ श्लौ परत इति । ननु च प्रत्ययादर्शनं श्लुः, तच्चाभावरूपम्, न चाभावे

Indira Gandhi National Centre for the Arts

चङि ॥ ११ ॥

चङि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः । अपीपचत् । अपीपठत् । आटिटत् । आशिशत् । आर्दिदत् ।

पचादीनां ण्यन्तानां चङि कृते णिलोप उपधाह्रस्वत्वं द्विर्वचनम् इत्येषां कार्याणां प्रवृत्तिक्रमः । तथा च–'सन्वल्लघुनि चङ्परे' इति

पदमञ्जरी

अधिकारमात्रेणैतदुक्तम्, न तु श्लौ साभ्यासो भवति । एवं *द्वितीयस्य* चेत्यत्र द्रष्टव्यम् ॥

चङि ॥ एषां कार्याणां प्रवृत्तिक्रम इति । एतच्च 'अचः परस्मिन्' इत्यत्रोपपादितम्, तत एवावधातव्यम् । न केवलं न्याय्यत्वादयं क्रम आश्रीयते, किन्तु प्रयोजनमप्यनन्यथासिद्धमस्तीत्याह—*यथा हीति* । ह्रस्वस्य *स्थानिवद्भावात्र*

न्यासः

पौर्वापर्य्यमस्ति, तदयुक्तमुक्तम्—श्लौ परत इति ? स्थानिनः परत्वात्तस्यापि तद्द्वारेण पौर्वापर्यमौपचारिकं गृहीत्वैव युक्तमुक्तमित्यदोषः ॥

चङि ॥ अपीपचदित्यादि । पचादिभ्यो ण्यन्तेभ्यो लुङ्, अडागमः, च्लिः, 'णिश्रि' इत्यादिना च्लेश्चङ् । अत्रेदानीं द्विर्वचनं प्राप्नोति णिलोपश्च; द्वयोरपि कृताकृतप्रसङ्गित्वान्नित्यत्वम्, ततश्चोभयोस्तुल्यबलत्वात् परत्वाण्णिलोपः । **आटिटदिति** । अत्रापि णिलोपे कृते णिलोपस्य स्थानिवत्वाद् द्विर्वचनं भवत्येव । स्थानिवद्भावस्तु 'द्विर्वचनेऽचि' इत्यनेन ।

णिलोपोऽपि नित्यः, अकृतेऽपि द्विर्वचने तेन भवितव्यम्, कृतेऽपि । न च शब्दान्तरप्राप्तिः; द्विष्प्रयोगो द्विर्वचनं भवतीति कृत्वा । स्थाने द्विर्वचनं त्वत्र न स्वीक्रियते; लक्ष्यानुरोधात् । ततश्चोभयोस्तुल्यबलयोः परत्वाण्णिलोपः । तत्र कृते द्विर्वचनं प्राप्नोत्युपधाह्रस्वश्च; तयोरपि कृताकृतप्रसङ्गित्वान्नित्यत्वम् । द्विर्वचनमपि ह्यकृते ह्रस्वत्वे प्राप्नोति, कृतेऽपि । न च शब्दान्तरप्राप्तिः; 'एकदेशविकृतमनन्यवद्भवति' इति वचनात् । ह्रस्वत्वमपि कृते द्विर्वचने प्राप्नोत्यकृतेऽपि । न च शब्दान्तरप्राप्तिः, स एव शब्दो द्विरुच्यत इति कृत्वा । स्थाने द्विर्वचनं त्वत्र नाश्रीयते; लक्ष्यानुरोधात् । तत्रोभयोस्तुल्यबलयोः परत्वाद् ह्रस्वत्वम्, ततो द्विर्वचनेन 'सन्वल्लघुनि' इति सन्वद्भावादित्वम्, 'दीर्घो लघोः' इति दीर्घः—इत्येतानि कार्य्याणि कर्त्तव्यानि । अत एवाह वृत्तौ—**पचादीनामित्यादि** । किं पुनः कारणं तथा शास्त्रप्रवृत्तिः क्रियते, यथैषां कार्याणामयं प्रवृत्तिक्रमो भवति ? इत्याह—**तथा चेत्यादि** । **ह्रस्वस्य स्थानि-**

Indira Gandhi National Centre for the Arts

सन्वद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यते । यो ह्यनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवति । न चास्मिन् कार्याणां क्रमेणानादिष्टादचः पूर्वोऽभ्यासो भवतीति ।

पदमञ्जरी

प्रतिषिध्यत इति । 'ह्रस्वस्य स्थानिवद्भावात्प्रतिषिध्यते' इति यत्तन्न भवति, स्थानिवद्भावाभावादित्यर्थः । कथं पुनरस्मिन् कार्यक्रमे सति स्थानिवद्भावो न भवति ? इत्यत आह–*अनादिष्टादच इति* । [करणे हेतौ ?] । 'अचः परस्मिन्' इत्यत्र योऽनादिष्टादचः पूर्वस्तस्य विधिं प्रति स्थानिवद्भावो भवतीति सिद्धान्तः स्थापितः । न चास्मिन् क्रमे सत्यनादिष्टादचः पूर्वोऽभ्यासो भवति, किं तर्हि ? आदिष्टादेव; ह्रस्वत्वे कृतेऽभ्यासोपजननात् । तेन तस्य विधौ कर्त्तव्ये ह्रस्वस्य स्थानिवद्भावो न भवतीति लघुत्वानिवृत्तेः सन्वद्भावो न व्याहन्येत । यदि तु द्विर्वचने कृते ह्रस्वः क्रियते, तर्ह्यनादिष्टादचः पूर्वोऽभ्यासः स्यात्, ततश्च तस्य स्थानिवद्भावः स्यादेव विधौ, ततश्च दीर्घत्वाल्लघुसंज्ञाया अभावात्सन्वद्भावो न स्यात् । क्व तर्हि स्याद् ? अशीशमदित्यादौ । अत्र हि णावेव मितां ह्रस्वो विधीयते । यदि तर्ह्ययं कार्यक्रमः, आटिटदित्यादौ द्वितीयस्यैकाचष्टिशब्दस्य

न्यासः

वद्भावान् न प्रतिषिध्यत इति । तस्याभावादिति भावः । हेतौ चेयं पञ्चमी । यथा— 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति । अत्र हि 'सन्वल्लघुनि' इत्यादिना लघुनि धात्वक्षरे परे सन्वद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावाद्धेतोः प्रतिषिध्यते, तस्मिन् सति लघुता निवर्त्तेत इति कृत्वा । स चास्मिन् क्रमे सति स्थानिवद्भावो न सम्भवतीति सन्वद्भावो न प्रतिषिध्यते; प्रतिबन्धहेतोरभावात् ।

कथं पुनरस्मिन् क्रमे सति कार्याणां स्थानिवद्भावो न सम्भवतीत्याह—**यो ह्यनादिष्टादित्यादि** । 'अचः परस्मिन् पूर्वविधौ' इत्यत्र यो ह्यनादिष्टादचः पूर्वस्तस्य विधिम् प्रति स्थानिवद्भावो भवतीत्येष सूत्रार्थो व्यवस्थितः । न चास्मिन् क्रमे सत्यत्राभ्यासोऽनादिष्टादचः पूर्वो भवति, किं तर्हि ? आदिष्टादेव । तेन तस्य विधौ कर्त्तव्ये ह्रस्वस्य स्थानिवद्भावो न भवतीति लघुत्वं न निवर्त्तते । ततश्च 'सन्वत्' इत्यादिना लघुनिमित्तकः सन्वद्भावो विधीयमानो न व्याहन्यते । यदि पुनर्द्विर्वचनं कृत्वा ह्रस्वादि कार्यं विधीयते ततोऽनादिष्टादचः पूर्वोऽभ्यासः स्यात्, ततश्च तस्य विधौ कर्त्तव्ये ह्रस्वस्य स्थानिवद्भावः स्यादेव ! एवं 'दीर्घञ्च' इति लब्धस्वभावया गुरुसंज्ञया लघुसंज्ञायां निरस्तायां सन्वद्भावोऽन्यत्र सावकाश इह न स्यात् । कः पुनस्तस्यावकाशः ? अशीशमदित्यादि । अत्र हि णौ परभूते प्रागेव 'मितां ह्रस्वः' विधीयते ।

यदि तर्ह्ययं कार्यक्रमः, आटिटदित्यत्र णिलोपे कृते द्वितीयस्यैकाचष्टिशब्दस्य

Indira Gandhi National Centre for the Arts

आटिटदिति 'द्विर्वचनेऽचि' इति स्थानिवद्भावाद् द्वितीयस्यैकाचो द्विर्वचनं भवति ॥

दाश्वान् साह्वान् मीढ्वांश्च ॥ १२ ॥

दाश्वान्, साह्वान्, मीढ्वान्–इत्येते शब्दाश्छन्दसि भाषायां चाविशेषेण निपात्यन्ते । दाश्वानिति 'दाशृ दाने'–इत्येतस्य धातोः क्वसावद्विर्वचनमनिट्त्वं च निपात्येते । दाश्वांसो दाशुषः सुतमिति ।

साह्वानिति 'षह मर्षणे'–इत्येतस्य परस्मैपदम्, उपधादीर्घत्वम्, अद्विर्वचनम्, अनिट्त्वं च निपातनात् । साह्वान्बलाहकः ।

पदमञ्जरी

द्विर्वचनं न प्राप्नोति ? अत्राह—*आटिटदित्यादि* ।

'श्लुचङोः' इत्येकयोग एव कर्त्तव्ये योगविभागो वैचित्र्यार्थः ॥

दाश्वान्साह्वान्मीढ्वांश्च ॥ दाश्वादीनां प्राचुर्येण छन्दसि प्रयोगदर्शनाच्छान्दसमेतत्सूत्रमिति मन्यमानं प्रत्याह—*अविशेषेणेति* । विशेषानुपादानादिति भावः । *परस्मैपदमिति* । भौवादिकस्यात्मनेपदित्वात्, चौरादिकस्य तु 'आ धृषाद्वा' इति णिजभावपक्षे दीर्घत्वमनिट्त्वं च निपात्यत इत्यन्ये । *मीढ्वस्तोकायेति* । 'मतुवसोः' इति नुमो रुत्वम् ।

न्यासः

द्विर्वचनं न प्राप्नोति; तदभावात् ? इत्यत आह—**आटिटदित्यत्र द्विर्वचनेऽचीत्यादि** । **अथ किमर्थमेतानि** त्रीणि सूत्राणि पृथक् क्रियन्ते—'लिटि धातोरनभ्यासस्य', 'श्लौ', 'चङि' इति, न 'लिट्श्लुचङ्क्षु' इत्येक एव योगः क्रियताम्; तत्रायमप्यर्थः—पुनः पुनर्विभक्तिर्नोच्चारयितव्या, लिटि श्लौ च द्विर्वचनम् ? तदनित्यमिति ज्ञापनार्थम् पृथग्योगकरणम् । तेन 'यो जागार तमृचः कामयन्ते', 'दाति प्रियाणि', 'धाति प्रियाणि' इत्यत्र न भवति द्विर्वचनम्, ततश्च 'द्विर्वचनप्रकरणे छन्दसि वा' इत्येतन्न कर्त्तव्यं भवति ॥

दाश्वान् साह्वान् मीढ्वांश्च ॥ **अविशेषेण निपात्यन्त इति** । विशेषानुपादानात् । **अनिट्त्वं चेति** । 'वस्वेकाजाद्घसाम्' इतीट् प्राप्नोति, अतस्तदभावो निपात्यते । ननु च कृतद्विर्वचनानामेकाचामिड् विधास्यते, अयंचाकृतद्विर्वचनमेकाज् भवति; अकृतद्विर्वचनत्वात्, तदयुक्तमनिट्त्वनिपातनम् ? नैतदस्ति; लिटि हि श्रूयमाणैकाजुपलक्षणार्थं तत्र कृतद्विर्वचनग्रहणं कृतम् । अस्ति चात्र लिटि श्रूयमाणैकाच्त्वमिति कात्रायुक्तता ? **परस्मैपदमिति** । सहेरात्मनेपदित्वात् परस्मैपदं न प्राप्नोतीत्यतस्तन्निपात्यते ।

Indira Gandhi National Centre for the Arts

मीढ्वानिति 'मिह सेचने'-इत्येतस्याद्वित्वम्, अनिट्त्वम्, उपधादीर्घत्वं ढत्वं च निपातनात्। मीढ्वस्तोकाय तनयाय मृडय। एकवचनमतन्त्रम्।

❋ कृञादीनां के द्वे भवत इति वक्तव्यम् ❋। क्रियतेऽनेनेति चक्रम्। चिक्लिदम्। कृञः क्लिदेश्च 'घञर्थे कविधानम्' इति कप्रत्ययः।

❋ चरिचलिपतिवदीनां द्वित्वमच्याक्चाभ्यासस्य ❋। चरादीनां धातूनामपि प्रत्यये परतो द्वे भवतः। अभ्यासस्यागागमो भवति, आगागमविधानसामर्थ्याच्च हलादिशेषो न भवति। हलादिशेषे हि सत्यागमस्यादेशस्य च विशेषो नास्ति। चराचरः। चलाचलः। पतापतः। वदावदः।

❋ वेति वक्तव्यम् ❋। तेन चरः पुरुषः, चलो रथः, पतं यानम्, वदो मनुष्यः—इत्येवमाद्यपि सिद्धं भवति।

❋ हन्तेर्घत्वं च ❋। हन्तेरचि प्रत्यये परतो द्वे भवतोऽभ्यासस्य च हकारस्य च घत्वमाक् चागमो भवति। परस्य 'अभ्यासाच्च' इति कुत्वम्। घनाघनः क्षोभणश्चर्षणीनाम्।

❋ पाटेर्णिलुक् चोक् च दीर्घश्चाभ्यासस्य ❋। पाटेरचि परतो द्वे भवतः, णिलुक्च भवति। अभ्यासस्य चोगागमो दीर्घश्च भवति। पाटूपटः॥

पदमञ्जरी

किं पुनः सामर्थ्यम्? इत्याह–*हलादिशेषे हीति*। *चराचर इति*। दीर्घोच्चारणसामर्थ्याद् ह्रस्वो न भवति।

णिलुक्चेति। 'णेरनिटि' इति णिलोपे सिद्धे पुनर्वचनं प्रत्ययलक्षणेन पुनर्वृद्धिर्मा भूदिति। *पाटूपट इति*। पूर्ववद्धलादिशेषाभावो ह्रस्वत्वाभावश्च। दीर्घोच्चारणादेव 'अभ्यासस्यानचि' इति वचनाद्वा उभयत्रापि हलादिशेषाभावः। अभ्यासस्य यदुच्यते तदचि न भवतीत्यर्थः॥

न्यासः

किं पुनः सामर्थ्यमित्याह—**हलादिशेष इत्यादि**। यदि हलादिशेषः स्यात्, एवञ्च सत्यामाकारादेशमेव कुर्यात्, न हि हलादिशेषे सत्यागमस्यादेशस्य वा विशेषोऽस्ति।

णिलुक्चेति। 'णेरनिटि' इति णिलोपे सिद्धे लुग्वचनं प्रत्ययलक्षणेनोपधावृद्धिर्मा भूदित्येवमर्थम्। लोपे हि सति प्रत्ययलक्षणेनोपधावृद्धिः स्यात्, लुकि तु 'न लुमताङ्गस्य' इति प्रतिषेधान्न भवति॥

Indira Gandhi National Centre for the Arts

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ १३ ॥

पुत्र, पति—इत्येतयोरुत्तरपदयोस्तत्पुरुषे समासे ष्यङः सम्प्रसारणं भवति । यणः स्थाने इग्भवतीत्यर्थः । कारीषगन्धीपुत्रः, कारीषगन्धीपतिः । कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः । करीषस्येव गन्धोऽस्य, कुमुदस्येव गन्धोऽस्येति बहुव्रीहिः, तत्र 'उपमानाच्च' इति गन्धस्येदन्तादेशः, करीषगन्धेरपत्यमित्यण्, तदन्तात्स्त्रियाम् 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे' इति ष्यङ्, ततश्चापि विहिते षष्ठीसमासः, 'सम्प्रसारणस्य' इति दीर्घत्वम् ।

ष्यङ इति किम् ? इभ्यापुत्रः । क्षत्रियापुत्रः । पुत्रपत्योरिति किम् ? कारीषगन्ध्याकुलम् । कौमुदगन्ध्याकुलम् । तत्पुरुष इति किम् ? कारोषगन्ध्यापतिरस्य ग्रामस्य कारोषगन्ध्यापतिरयं ग्रामः ।

पदमञ्जरी

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ 'इग्यणः संप्रसारणम्' इत्यत्रोक्तम्—'वाक्यार्थः संज्ञी वर्णश्च' इति, तत्र विधौ वाक्यार्थ उपतिष्ठते इति तदाश्रयेणाऽऽह—*यणः स्थान इग्भवतीत्यर्थ इति* ।

तदन्तात् ष्यङिति । ष्यङ्विधावादेशपक्षस्य स्थित्वाल्ल्यब्लोप एषा पञ्चमी, तदन्तमाश्रित्येत्यर्थः । अतद्गुणसंविज्ञानेऽत्र बहुव्रीहिः, अण् प्रत्ययोऽन्तः समीपो यस्य कारीषगन्धेस्तस्मात्परः ष्यङित्यर्थः । प्रत्ययपक्ष एव *वामनाचार्यस्य* तत्राभिमतः । तथा च 'ये च तद्धिते' इत्यत्र वक्ष्यति[1]—'अणिञन्ताद्वा परः

न्यासः

ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ सम्प्रसारणमिति यण्स्थानिकस्येक एषा संज्ञा विहिता, वाक्यार्थस्य च । 'इग्यणः' इति योऽयं वाक्यार्थः स्थान्यादेशसम्बन्धलक्षणस्तस्य तत्र चेदमुक्तमनुवादे वर्ण उपतिष्ठते, विधौ तु वाक्यार्थ इति; विधिश्चायम्, अतो वाक्यार्थस्यैवोपस्थानमित्याह—**यणः स्थान इत्यादि** । **ततश्चापि विहित इति** । 'यङश्चाप्' इत्यनेन ।

इभ्यापुत्र इति । इभमर्हतीति 'दण्डादिभ्यो यः' । **क्षत्रियापुत्र इति** । क्षत्रस्यापत्यमिति 'क्षत्राद् घः' इति घः ।

'ष्यङः' इति प्रत्ययग्रहणमिदम्, तत्र प्रत्ययग्रहणपरिभाषाया उपस्थानाद् यस्मात् स विहितस्तदादेस्तदन्तस्येति तदादितदन्तग्रहणमिहैव स्यात्—कारीषगन्धीपुत्र इति, इह तु न स्यात्—परमकारीषगन्धीपुत्र इति; कारीषगन्धशब्दाद्धि ष्यङ् विहितः,

---

1. वस्तुतस्तु 'अचि शीर्षः' (६. १. ६२) इत्यत्र ।

ष्यङ इति स्त्रीप्रत्ययग्रहणम्, 'न स्त्रीप्रत्यये चानुपसर्जने' इति

पदमञ्जरी

ष्यङ् प्रत्यय एषितव्यः' इति ।

इभमर्हतीतीभ्या, 'दण्डादिभ्यो यः', इह कारीषगन्ध्यामतिक्रान्तस्य पुत्रोऽतिकारीषगन्ध्यापुत्र इति प्रत्ययग्रहणपरिभाषया समुदायस्याप्यङन्तत्वेऽपि योऽत्र ष्यङन्तस्तस्य प्रसङ्गः । तथा पुत्रस्य कुलं पुत्रकुलम्, कारीषगन्ध्यापुत्रकुलमिति वर्णग्रहणे तदादिविधिविज्ञानादिह च तदभावात्तदादिविध्यभावेऽपि पुत्रपत्यानन्तर्याश्रयं संप्रसारणं प्राप्नोति । नात्र तर्हीदानीमिदं भवति—कारीषगन्धीपुत्रकुलमिति । भवति च यदैतद्वाक्यं भवति—कारीषगन्धायाः पुत्रः कारीषगन्धीपुत्रस्तस्य कुलं कारीषगन्धीपुत्रकुलमिति । कः पुनरनयोरर्थभेदः ? न खलु कश्चित्, कारीषगन्ध्यापुत्रकुलमिति न सिध्यतीति चोद्यार्थः । तथा–अतिकारीषगन्ध्यापुत्रकुलमित्यादावपि सर्वत्र पुत्रपत्योः ष्यङन्तस्य चानन्तर्यमाश्रित्य सम्प्रसारणप्रसङ्गः ।

स्यादेतत्—यथा वृक्षे शाखेति वृक्षः शाखाया अवयवी प्रतीयते, तथेहापि ष्यङन्तस्य पुत्रपत्योश्च तत्पुरुषः, तत्र प्रत्यासत्त्या यस्य तत्पुरुषस्य ष्यङन्तोऽवयवस्तस्यैव पुत्रपती इति गम्यते, इह न तथेति ? एवमप्यवयवावयवस्य समुदायावयवत्वादस्त्येव प्रसङ्गः ? नैष दोषः; पुत्रपत्योरिति सप्तमीनिर्देशात् ष्यङन्तस्य पुत्रपत्योश्च पौर्वापर्यं प्रतीयते, पूर्वोक्तेन न्यायेन तत्पुरुषावयवत्वं च । तत्पुरुषश्च पौर्वापर्यावस्थितावयवद्वयात्मकः । तदिह तत्पुरुषावयवयोः पौर्वापर्येणावस्थितयोरिदं भवतीत्युक्ते ययोः स तत्पुरुषस्तावेताविति गम्यते, ष्यङन्तस्य पूर्वपदस्य पुत्रपत्योरुत्तरपदयोरित्यर्थः । समासे च यस्माच्च पूर्वं नास्ति तत्पूर्वपदम्, यस्माच्च परं नास्ति तदुत्तरपदम्, तदिदमुक्तम्—'पुत्रपत्योरुत्तरपदयोः' इति । पूर्वोदाहृतेषु च यत्पूर्वपदं न तत्ष्यङन्तम्, यत् ष्यङन्तं न तत्पूर्वपदम्, यच्चोत्तरपदं न तत्पुत्रपत्यात्मकम्, यच्च पुत्रपत्यात्मकं न तदुत्तरपदमिति नास्ति प्रसङ्गः । इहापि तर्हि न प्राप्नोति–परमकारीषगन्धीपुत्र इति ? तत्राह–*ष्यङ इति स्त्रीप्रत्ययग्रहणमिति* । 'स्त्रियाम्' इति प्रकृत्य विहितत्वात्स्थानिवद्भावेन स्वयमेव

न्यासः

न परमकारीषगन्धशब्दात् ? अत इदं द्वेष्यमपाकर्तुमाह—**ष्यङिति स्त्रीप्रत्ययग्रहणमिति** । 'स्त्रियाम्' इत्यधिकृत्य विहितत्वात् । स्त्रीत्वं स्थानिवद्भावेन च प्रत्ययत्वं ष्यङः, न हि तस्यान्यथा स्त्रीप्रत्ययत्वमुपपद्यते; आदेशपक्षस्य च तत्राश्रितत्वात् । यदि स्त्रीप्रत्ययग्रहणमेतत्; ततश्च किमिति ? तदादिनियमो न भवति; यतोऽधिकस्याप्यत्र ग्रहणं स्यात्, अतिप्रसङ्गो वा । असति हि नियमे यथेह भवति—परमकारीषगन्धीपुत्र इति, तथेहापि स्याद्—अतिकारीषगन्ध्यापुत्र इति, अत आह—**न स्त्रीप्रत्यये चेत्यादि** । प्रत्ययग्रहणपरिभाषाया 'न स्त्रीप्रत्यये चानुपसर्जने' इत्ययमपवादः कृतः । तेन यत्रानुप-

Indira Gandhi National Centre for the Arts

प्रत्ययग्रहणपरिभाषया 'यस्मात् स विहितस्तदादेः' इत्येष नियमो नास्ति; तेन परमकारीषगन्ध्यायाः पुत्रः परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिरित्यपि भवति।

उपसर्जने तु ष्यङि न भवति—अतिक्रान्ता कारीषगन्ध्यामतिकारीषगन्ध्या, तस्य पुत्रोऽतिकारीषगन्ध्यापुत्रः, अतिकारीषगन्ध्यापतिः।

पुत्रपत्योः केवलयोरुत्तरपदयोरिदं सम्प्रसारणम्, तदादौ तदन्ते च न भवति—कारीषगन्ध्यापुत्रकुलम्, कारीषगन्ध्यापरमपुत्र इति।

पदमञ्जरी

वा प्रत्ययत्वाच्च स्त्रीप्रत्ययत्वम्। यदि स्त्रीप्रत्ययग्रहणम्, ततः किम्? इत्यत आह–*तेनेति*।

अप्रधानम्=*उपसर्जनम्*। एतदुक्तं भवति–यत्रार्थे स्त्रीप्रत्ययो विहितः स यावति तदन्ते प्राधान्येनोच्यते तावान्समुदायस्तदन्ततया ग्राह्यः। अप्रधाने च यतो विहितस्तदादिके च तदन्ते च न भवति। यदा तत्पुरुषाक्षिप्तमुत्तरपदं पुत्रपतिभ्यां विशेष्यते तदा तदन्ते प्रसङ्गः, इह तूत्तरपदेन पुत्रपती विशेष्येते इति भावः।

न्यासः

सर्जनः स्त्रीप्रत्ययस्तत्रैषा प्रत्ययग्रहणपरिभाषा न प्रवर्त्तत इति तदादिनियमो नास्ति, तेन परमकारीषगन्धीपुत्र इत्यत्र भवत्येव। अत्र हि परमा चासौ कारीषगन्ध्या चेति 'सन्महत्' इत्यादिना समासः, स्त्रीप्रत्ययस्य प्राधान्यम्, 'स्त्रियाः पुंवत्' इत्यादिना पुंवद्भावः। यत्र तूपसर्जनं स्त्रीप्रत्ययस्तत्रानुपसर्जन इति वचनादुपतिष्ठत एवैषा परिभाषा। तेन भवत्येवात्र तदादिनियमः। तेनेह न भवति—अतिकारीषगन्ध्यापुत्र इति। अत्र हि कारीषगन्ध्यामतिक्रान्त इति प्रादिसमासः। अत्र योऽसावतिक्रान्तः स प्रधानम्, कारीषगन्ध्या तूपसर्जनम्। अत एव 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वो भवति। पुत्रपत्योः संप्रसारणे तदादावतिप्रसङ्गः। इहापि प्राप्नोति–कारीषगन्ध्यापुत्रकुलमिति। तथा हि—पुत्रपत्योरिति सप्तमी कार्यिण आनन्तर्यमाचष्टे, ततश्च शुद्धयोस्तदादौ चाविशिष्टम्। अथापि कथञ्चित् तदादौ न स्याद्, एवमपि 'येन विधिस्तदन्तस्य' इति तदन्तेऽतिप्रसङ्ग इहापि प्राप्नोति—कारीषगन्ध्यापरमपुत्र इति।

विधिविधानविधिभाजां त्रयाणां सन्निधाने तदन्तविधिर्भवति। ते चेह सन्ति—विधिः संप्रसारणम्, विधिभाक् ष्यङ्, विधानं पतिपुत्रशब्दौ। इह च तत्पुरुषेणाव्यभिचारात् सन्निधापितं यदुत्तरपदं तत् पुत्रपतिशब्दाभ्यां विशेष्यते, विशेषणेन च तदन्तविधिर्भवतीति पुत्रशब्दान्ते पतिशब्दान्ते चोत्तरपदे सम्प्रसारणं भवतीति कस्यचिद् भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह—पुत्रपत्योरित्यादि। एवं मन्यते—तत्पुरुषोऽत्र पुत्रपत्योः ष्यङश्चाधिकरणभूतो निर्दिश्यमानस्तत्पुरुषावयवत्वं पुत्रपत्योः ख्यापयति,

Indira Gandhi National Centre for the Arts

ष्यङन्ते च यद्यप्यन्ये यणः सन्ति; तथापि ष्यङ एव संप्रसारणम्, 'निर्दिश्यमानस्यादेशा भवन्ति' इति ।

सम्प्रसारणमिति चाधिक्रियते 'विभाषा परेः' इति यावत् ॥

पदमञ्जरी

निर्दिश्यमानस्येति । एतच्च 'षष्ठीस्थाने योगा' इत्यत्र व्याख्यातम् । 'अनन्त्यविकारेऽन्त्यसदेशस्य' इति तु परिभाषा प्रयोजनाभावान्नाश्रिता ।

सम्प्रसारणग्रहणमुत्तरार्थम् । इह त्वीशापि सिद्धम्, शकारः सर्वादेशार्थः । तत्रायमप्यर्थः—सम्प्रसारणस्येति योगविभागेन दीर्घत्वं न विधेयं भवति, तदेवोत्तरार्थत्वं दर्शयति—*सम्प्रसारणमिति* चेत्यादि ।

पूर्वं यत्र ष्यङन्तं पदमुपरितनं पुत्रपत्यात्मकं स्याद्
दृष्ट्वा तत्र ष्यङं तत्पुरुष इह यण स्थान इग्भावनीयः ।
यत्रार्थे ष्यङ् स यावत्यपि सति न गुणोऽसाविहेष्टस्तदन्ते
यत्रेत्यर्थः प्रधानो न भवति स यतः ष्यङ् तदाद्येव तत्र ॥

न्यासः

तद्यथा–वृक्षे शाखेति । वृक्षः शाखाया अधिकरणत्वेन निर्दिश्यमानः शाखाया वृक्षावयवत्वं बोधयति; तत्र प्रत्यासत्तेः । यत्र तत्पुरुषे ष्यङ् कार्यभागवयवः स्थितः, तस्यैव तत्पुरुषस्य याववयवौ पुत्रपती तयोरेव ग्रहणम्, न तु पुत्रपत्यादावुत्तरपदे यौ पुत्रपतिशब्दौ तौ तस्यैव ष्यङः पूर्वपदस्य तत्पुरुषस्यावयवौ । अपि तु तत्पुरुषस्यान्तरस्यापि पुत्रकुलशब्दस्य, पतिकुलशब्दस्य च । तस्मात् तदादौ तावन् न भवत्यतिप्रसङ्गः । तदन्तेऽपि न भवत्येव; यस्मादिह पुत्रपतिग्रहणं यच्च तत्पुरुषेण सन्निधापितमुत्तरपदं तयोर्विशेषणविशेष्यभावं प्रति कामचारः । तत्र यदीहोत्तरपदं पुत्रपतिशब्दाभ्यां विशिष्येत तदा स्यात् तदन्तविधिः, विशेषणेन तदन्तविधिर्भवतीति कृत्वा । न चेह ताभ्यां तद्विशिष्यते, अपि तु तावेव तेन; ततश्च तदन्तविधेरभावात् केवलयोरेवेदं विशेषणं भवतीति कुतस्तदन्तेऽतिप्रसङ्गः ? ननु च यद्युत्तरपदेन पुत्रपती विशिष्येते तेन तयोस्तदन्तता विज्ञायते, ततश्चोत्तरपदपदान्तयोरेव ग्रहणं स्यात्, न केवलयोः, एवञ्च तदादावतिप्रसङ्गः ? नैतदस्ति; न हि पुत्रपतिशब्दावुत्तरपदान्तौ सम्भवतः । यस्मादयमन्तशब्दोऽवयववचनः । न च पुत्रपतिशब्दयोरुत्तरपदमवयवः । किं तर्हि ? समासस्य, न च तौ समासौ । तस्मान्नैवं विज्ञायते–उत्तरपदान्तयोः पुत्रपतिशब्दयोरिति, किं तर्हि ? पुत्रपत्योरेवोत्तरपदयोः केवलयोरिति ।

'येन विधिस्तदन्तस्य' इति तदन्तविधिनात्र ष्यङन्तस्य सम्प्रसारणं विज्ञायते, ततश्च वाराहीपुत्र इत्यत्र वकारस्यापि सम्प्रसारणं प्राप्नोतीत्यत आह—**ष्यङन्ते चेत्यादि** । तत्रैव कारणमाह—**निर्दिश्यमानस्येत्यादि** । **सम्प्रसारणग्रहणमुत्तरार्थम्** । अतो हीकारग्रहणेनापि सिध्यत्येव । तां चोत्तरार्थतां तत्रैव दर्शयिष्यामः । तामेवोत्तरार्थतां सूचयन्नाह—**सम्प्रसारणमित्यादि** ॥

Indira Gandhi National Centre for the Arts

बन्धुनि बहुव्रीहौ ॥ १४ ॥

'ष्यङः सम्प्रसारणम्' इत्यनुवर्तते । बन्धुशब्द उत्तरपदे बहुव्रीहौ समासे ष्यङः सम्प्रसारणं भवति । कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः । कौमुदगन्धीबन्धुः ।

बहुव्रीहाविति किम् ? कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । अत्रापि पूर्ववदेव । परमकारीषगन्धीबन्धुरित्यत्र भवति । अतिकारीषगन्ध्याबन्धुरिति च न भवति, तथा कारीषगन्ध्याबन्धुधनः, कारीषगन्ध्यापरमबन्धुरित्यादौ न ।

बन्धुनीति नपुंसकलिङ्गनिर्देशः शब्दरूपापेक्षया, पुंल्लिङ्गाभिधेयोऽयं बन्धुशब्दः ।

❀ मातच्मातृकमातृषु ❀ । ष्यङः सम्प्रसारणं भवति विभाषया बहुव्रीहावेव । कारीषगन्ध्या माताऽस्य—इत्येवं बहुव्रीहौ कृते एतस्मादेवोपसंख्यानात् । पक्षे मातृशब्दस्य मातजादेशः, तत्र चित्करणसामर्थ्याद्बहुव्रीहिस्वरमन्तोदात्तत्वं बाधते ।

पदमञ्जरी

बन्धुनि बहुव्रीहौ ॥ *शब्दरूपापेक्षयेति* । 'बन्धु' इत्येतस्मिन् शब्दरूपमित्येवं शब्दरूपमपेक्ष्य नपुंसकनिर्देशः कृतः । किमर्थमेवं व्याख्यायते ? इत्यत आह—*पुंल्लिङ्गाभिधेयस्त्वयमिति* । योऽयमस्मिन्सूत्रे बन्धुशब्द उपात्तः स इत्यर्थः । कुत एतत् ? नपुंसकलिङ्गस्यापि विद्यमानत्वात्, बध्यतेऽस्मिन् जातिरिति बन्धु= द्रव्यम्, 'जात्यन्ताच्छ बन्धुनि' इति । यद्येवम्, तस्यैव ग्रहणं प्राप्नोति ? नैष दोषः; पतिपुत्रसाहचर्याज्जातिवचन एव ग्रहीष्यते ।

न्यासः

बन्धुनि बहुव्रीहौ ॥ बन्धुनीति नपुंसकनिर्देश इत्यादि । बन्धुनीति शब्दरूपापेक्षया नपुंसकलिङ्गेन निर्देशः कृत इत्यर्थः । किं पुनः कारणमेवं व्याख्यायते ? इत्याह—**पुंल्लिङ्गाभिधेयोऽयमित्यादि** । ननु बन्धाविति पुंल्लिङ्गेनैव निर्देशः कस्मान्न कृतः ? पर्यायेषु मा भूत् । एवं हि क्रियमाणेऽर्थप्रधानोऽयं निर्देश इत्यादिः स्यात्, ततश्च पर्यायेष्वपि प्रसज्येत । अर्थप्रधाने हि निर्देशे स्वरूपपरिभाषा नोपतिष्ठत इत्युक्तम् ।

मातजित्यादि । ननु च मातजिति शब्दरूप नास्त्येव, न ह्यस्य स्वतन्त्रस्य क्वचित् प्रयोगो लभ्यते, कथं तत्र सम्प्रसारणं कर्तुं शक्यम् ? इत्यत आह—**अस्मादेवेत्यादि** । **तत्रेत्यादि** । यदि च 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति बहुव्रीहिस्वरः स्यात्, चित्करण-

मातृमातृकशब्दयोश्च भेदेनोपादनाद् 'नद्यृतश्च' इति कबपि विकल्प्यते—कारीषगन्धीमातः, कारीषगन्ध्यामातः; कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः; कारीषगन्धीमाता, कारीषगन्ध्यामाता ॥

वचिस्वपियजादीनां किति ॥ १५ ॥

'सम्प्रसारणम्' इति वर्त्तते । 'ष्यङः' इति निवृत्तम् । वचि—'वच परिभाषणे', 'ब्रुवो वचिः' इति च । स्वपि–'ञिष्वप् शये' । यजादयः–'यज देवपूजासङ्गतिकरणदानेषु' इत्यतः प्रभृति आगणान्ताः, तेषां वचिस्वपियजादीनां किति प्रत्यये परतः सम्प्रसारणं भवति । वचि—उक्तः, उक्तवान् । स्वपि–सुप्तः, सुप्तवान् । यज–

पदमञ्जरी

वचिस्वपियजादीनां किति ॥ आदिशब्दोऽयं यजिनैव सम्बध्यते, न वच्यादिभिः प्रत्येकम्; स्वपिग्रहणात् । अन्यथा 'वच परिभाषणे', 'विद ज्ञाने', 'अस भुवि,' 'मृजूष् शुद्धौ', 'रुदिर् अश्रुविवचने,' 'ञिष्वप् शये'—इत्येवं गणपाठाद् वच्यादिग्रहणेनैव स्वपादीनामपि ग्रहणसिद्धेः पृथक् स्वपादिग्रहणं न कुर्यात् । *आगणान्ता इति ।* गणस्यान्तो गणान्तः, आगता गणान्तमागणन्ताः । उक्त

न्यासः

मनर्थकं स्यात् । तस्मान्मा भूत् तस्यानर्थक्यमिति चित्करणसामर्थ्याद् बहुव्रीहिस्वरम् 'चितः' इत्यन्तोदात्तत्वं विधीयमानं बाधते ।

ननु च मातृशब्दो बहुव्रीहावुत्तरपदं न सम्भवत्येव, 'नद्यृतश्च' इति नित्यं कपा भवितव्यम्, तत् कथं तत्रोत्तरपदे बहुव्रीहौ ष्यङः संप्रसारणमुपपद्यते ? इत्याह—**मातृमातृकयोश्चेत्यादि** । यदि च नित्यं कप् स्यात्, मातृमातृकयोर्भेदेनोपादनं न कुर्यात्, कृतञ्च । तस्माद् भेदेनोपादानात् कब् विकल्पेन क्रियते, न केवलं मातजादेश इत्यपिशब्दस्यार्थः ॥

वचिस्वपियजादीनां किति ॥ आदिशब्दोऽयं यजिनैव सम्बध्यत इति, न वच्यादिभिः प्रत्येकम् । यदि हि प्रत्येकमभिसम्बन्धोऽभिमतः स्याद् 'वच भाषणे' इत्यधीत्य 'ञिष्वप् शये' इत्यधीयताम्, तत्र वच्यादीनामित्येवं स्वपेरपि सिध्यतीति पृथगुपादानं न कर्त्तव्यं जायते । नन्वेवम्, 'रुदश्च पञ्चभ्यः' इत्यत्र स्वपेर्ग्रहणं न स्यात् ? नैष दोषः; शक्यते हि रुदादीनामादौ स्वपिमधीत्य 'स्वपश्च पञ्चभ्यः' इत्येवं सूत्रं प्रणेतुम् । तस्माद् युक्तमुक्तम्–यजिनैव सम्बध्यत इति । वचेः स्वपिना साहचर्य्याद् धातुनिर्देशार्थ इकारः, न विशेषणार्थः । तेन च ब्रूआदेशस्यैव ग्रहणं भवतीत्याह–**वच परिभाषणे, ब्रुवो वचिरिति चेति । उक्त इति ।** 'सम्प्रसारणाच्च' इति परपूर्वत्वम् ।

इष्टः, इष्टवान् । वप्–उप्तः, उप्तवान् । वह–ऊढः, ऊढवान् । वस–ऊषितः, ऊषितवान् । वेञ्–उतः, उतवान् । व्येञ्–संवीतः, संवीतवान् । ह्वेञ्–आहूतः, आहूतवान् । वद–उदितः, उदितवान् । टुओश्वि–शूनः, शूनवान् ।

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायते । तेनेह न भवति–वाच्यति, वाचिक इति ॥

पदमञ्जरी

इति । 'चोः कुः' । *इष्ट इति* । व्रश्चादित्वात्षः । *ऊढ इति* । 'हो ढः', 'झषस्थोर्धोऽधः,' ष्टुत्वम्, 'ढो ढे लोपः' 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' । *उषित इति* । 'वसतिक्षुधोरिट्,', शासिवसिघसीनां च' इति षत्वम् । *संवीतादौ* 'हलः' इति दीर्घः । *शून इति* । 'ओदितश्च' इति निष्ठानत्वम् ।

धातोः स्वरूपग्रहण इति । यत्र धातुः स्वरूपेणोपादीयते, न धातुशब्देन तत्र तत्प्रत्यये धातोरित्येवं यो विहितः प्रत्ययस्तत्रैव कार्यं विज्ञायते । एतच्च 'भ्रौणहत्य' इति तत्त्वनिपातनेन ज्ञापयिष्यते । *वाच्यति, वाचिकमिति* । अत्र तु यद्यपि क्विबन्ता धातुत्वं न जहति, तथापि धातोरित्येवं प्रत्ययस्याविधानात्सम्प्रसारणाभावः ॥

न्यासः

इष्ट इति । व्रश्चादिना षत्वम्, ततः ष्टुत्वम् । **ऊढ इति** । 'हो ढः' इति ढत्वम्, 'ष्टुना ष्टुः' इति ष्टुत्वम्, 'ढो ढे लोपः' इति ढकारलोपः, 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घत्वम् । **उषितमिति** । 'शासिवसिघसीनाञ्च' इति षत्वम् । **संवीत, आहूतः, शून इति** । 'हलः' इति दीर्घः । **शून** इत्यत्र 'ओदितश्च' इति निष्ठानत्वम् ।

अथेह कस्मान्न भवति—वाचमिच्छति वाचा तरतीति ठक्, वाच्यति वाचिक इति ? यद्यपि वचेः 'क्विब्वचिप्रच्छयायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च' इति वा दीर्घः कृतः, तथापि 'एकदेशविकृतमनन्यवद्भवति' इत्यस्ति प्राप्तिरित्याह—**धातोरित्यादि** । यत्र धातुः सामान्यवाचिना धातुशब्देन नोपादीयते, अपि तु स्वशब्देनैव, तत्र तत्प्रत्यये धातोरित्येवं यो विहितः प्रत्ययस्तत्रैव कार्यं विज्ञायते । एतच्च भ्रौणहत्येति निपातनं कुर्वन् ज्ञापयति—तद्धितत्वार्थं निपातनम् । यदि च धातोः स्वरूपग्रहणे तत्प्रत्यय एव कार्यं न विज्ञायेत, तत्वनिपातनमनर्थकं स्यात् । 'हनस्तोऽचिण्णलोः' इत्यनेनैव तत्वस्य सिद्धत्वात् । **वाच्यति वाचिक** इत्यत्र यद्यपि 'क्विबन्ता धातुत्वं न जहति' इति, तथापि धातोरित्येवं नासौ प्रत्ययो विहितः । तथा ह्येकत्र सुप इत्येवं प्रत्ययो विहितः—'सुप आत्मनः क्यच्' इति, इतरत्र च 'प्रातिपदिकात्'—इत्येवं ङ्याप्प्रातिपदिकाधिकारात् । तस्मादिह वचेः स्वरूपग्रहणात् तत्प्रत्यय एव कार्यसंविज्ञानं न भवति ॥

Indira Gandhi National Centre for the Arts

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छति-भृज्जतीनां ङिति च ॥ १६ ॥

'ग्रह उपादाने', 'ज्या वयोहानौ', 'वेञो वयिः', 'व्यध ताडने', 'वश कान्तौ', 'व्यच व्याजीकरणे', 'ओव्रश्चू छेदने', 'प्रच्छ ज्ञीप्सायाम्', 'भ्रस्ज पाके'—इत्येतेषां धातूनां ङिति प्रत्यये परतश्चकारात् किति च सम्प्रसारणं भवति। ग्रह—गृहीतः। गृहीतवान्। ङिति—गृह्णाति, जरीगृह्यते। ज्या—जीनः, जीनवान्। 'ल्वादिभ्यः' इति निष्ठानत्वम्। ङिति—जिनाति, जेजीयते। 'हलः' इति सम्प्रसारणदीर्घे कृते 'प्वादीनाम्' इति ह्रस्वः क्रियते।

वयिः—लिटि परतो वेञो वयिरादेशः, तस्य ङिद्भावात् किदेवोदाह्रियते—ऊयतुः, ऊयुः। यद्येवम्, वयिग्रहणमनर्थकम्, यजादिषु वेञ् पठ्यते? नैवं शक्यम्; लिटि तस्य वेञ इति प्रतिषेधो वक्ष्यते, तत्र

पदमञ्जरी

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ गृहीतः, यद्यपि प्रथमं ङिति प्रत्यये परतः सम्प्रसारणं चकारात्किति चेति क्रमो व्याख्यातः, तथाप्यनास्थया प्रथमं कित्युदाहृतम्। *विजादेशो गृह्यत इति*। पूर्वपरसाहचर्याद्यस्य वपेः परस्मैपदसंभवस्तस्य ग्रहणं न्याय्यम्, यस्तु 'अय वय गतौ' इति वयिः, सोऽनुदात्तेदात्मनेपदी। *यद्येवमिति*। वेञादेशस्य ग्रहणमित्यर्थः। *यजादिषु वेञ् पठ्यत इति*। ततश्च पूर्वेणैव सम्प्रसारणं सिद्धमिति भावः। नैवं

न्यासः

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ गृहीतमिति। 'ग्रहोऽलिटि' इति दीर्घः। **जरीगृह्यत इति**। यङि सम्प्रसारणं द्विर्वचनम्। 'रीगृदुपधस्य' इति रीगागमः।

वयिरयमस्त्येवात्मनेपदी—'अय वय गतौ', अस्ति च परस्मैपदी—'वेञो वयिः' इति; तत्र ग्रह्यादिभिरनात्मनेपदिभिः साहचर्य्यादनात्मनेपदी गृह्यते? इत्याह—**वयिर्लिटीत्यादि**। तस्माच्च परस्य लिटः 'असंयोगाल्लिट् कित्' इति कित्त्वेन भवितव्यम्? इत्यत आह—**तस्येत्यादि**। **यद्येवमिति**। यदि वेञादेशस्य वयेर्ग्रहणमित्यर्थः। **यजादिषु वेञ् पठ्यत इति**। ततश्च पूर्वसूत्रेणैव तस्य स्थानिवद्भावात् सम्प्रसारणं सिद्धमित्यभिप्रायः। **नैवं शक्यमिति**। विज्ञातुमिति शेषः। नानयोपपत्त्या वयिग्रहणमनर्थकं शक्यं विज्ञातुमित्यर्थः। किं कारणम्? इत्याह—**लिटि तस्येत्यादि**। स्यादे-

यथैव स्थानिवद्भावाद्वयेर्विधिः, एवं प्रतिषेधोऽपि प्राप्नोति ? नैष दोषः; 'लिटि वयो यः' इति यकारस्य सम्प्रसारणप्रतिषेधाद् वयेर्विधौ ग्रहणं प्रतिषेधे चाग्रहणमनुमास्यते ? सत्यमेतत्; एष एवार्थः साक्षान्निर्देशेन वयेः स्पष्टीक्रियते ।

व्यध–विद्धः, विद्धवान् । ङिति–विध्यति, वेविध्यते । वश–उशितः, उशितवान् । ङिति–उष्टः, उशन्ति ।

व्यच–विचितः । विचितवान् । ङिति—विचति, वेविच्यते । 'व्यचेः कुटादित्वमनसि' प्रतिपादितम्, तेन सर्वत्राञ्णिति प्रत्यये सम्प्रसारणं भवति—उद्विचिता, उद्विचितुम्, उद्विचितव्यमिति ।

व्रश्चेः–वृक्णः, वृक्णवान् । अथ कथमत्र कुत्वम्, 'व्रश्चभ्रस्ज'

पदमञ्जरी

शक्यमिति । विज्ञातुमिति शेषः । नानयोपपत्त्या वयिग्रहणमनर्थकं शक्यं विज्ञातुमित्यर्थः । *एवं प्रतिषेधोऽपि प्राप्नोतीति* । नात्रापिशब्देन समुच्चय उच्यते, किं तर्हि ? यथा स्थानिवद्भावाद्विधिः प्राप्यते, तथा प्रतिषेधोऽपि प्राप्नोति, तत्रापि स्थानिवद्भावस्य तुल्यत्वात् इति हेतोस्तुल्यत्वमपिशब्देन द्योत्यते, तेन प्रतिषेध एव भवेदित्यर्थः । *उष्ट इति* । तसन्तम् । व्यधिर्दिवादिः, व्यचिप्रभृतयस्तुदादयः । *वृक्ण इति* । 'स्कोः संयोगाद्योः' इति सलोपः, पूर्व-

न्यासः

तत्—विधिप्रतिषेधयोर्विरोधादेकत्र विधिरेव भविष्यति, न प्रतिषेध इति ? अत आह–**अत्र यथैवेत्यादि** । यदि विरोधादेकत्रासम्भवः, पर्यायोऽस्तु, न तु द्वयोरन्यत्र चरितार्थत्वादेकेनैव भवितव्यम् । नापरेणेत्येषोऽर्थो लभ्यत इति भावः । **नैष दोष इति** । कथं नैष दोषः ? इत्यत आह–लिटीत्यादि । 'लिटि वयो यः' इति यकारस्य सम्प्रसारणप्रतिषेधो लिङ्गम्–विधौ वेञोग्रहणेन वयिग्रहणं भवतीत्यस्यार्थस्य । असति विधौ ग्रहणे प्राप्तेरसम्भवात् प्रतिषेधोऽनर्थकः स्यात् । वेञ इत्यत्र प्रतिषेधे वयेर्ग्रहणं न भवतीति अत्राप्येतदेव प्रतिषेधवचनं लिङ्गम् । सति हि वेञ्ग्रहणे वेञ इत्यनेनैव प्रतिषेधस्य सिद्धत्वात्, पुनः 'लिटि वयो यः' इति प्रतिषेधोऽनर्थकः स्यात् । तदेतस्माल्लिङ्गाद् **वयेर्विधौग्रहणं प्रतिषेधे चाग्रहणमित्यनुमास्यते, सत्यमेतदिति** । अनन्तरोक्तमर्थमभ्यनुजानाति । यदि सत्यमेतत्, तर्हि किमर्थं वयिग्रहणम् ? इत्याह—**एष एवेत्यादि** । तेन स्पष्टीकरणार्थं वयिग्रहणमित्याचष्टे । **विध्यतीति** । दिवादित्वाच्छ्यन् । **उष्ट इति** । तसन्तमेतत्, अदादित्वाच्छपो लुक्, व्रश्चादिसूत्रेण षत्वम्, ष्टुत्वम् । **विचतीति** । तुदादित्वाच्छः ।

वृक्ण इति पूर्ववन्नत्वम्, 'स्कोः' इति सलोपः । झलादिर्निष्ठा न भवतीति तेनाश्र

इति हि षत्वेन भवितव्यम् ? ❀ निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः ❀ । तत्र षत्वं प्रति नत्वस्य सिद्धत्वाद् झलादिर्निष्ठा न भवति । कुत्वे तु कर्त्तव्ये तदसिद्धमेवेति प्रवर्तते कुत्वम् । ङिति—वृश्चति, वरीवृश्च्यते ।

प्रच्छ—पृष्टः, पृष्टवान् । ङिति—पृच्छति, परीपृच्छ्यते, प्रश्नः । नङि तु 'प्रश्ने चासन्नकाले' इति निपातनादसम्प्रसारणम् ।

भ्रस्ज—भृष्टः, भृष्टवान् । ङिति—भृज्जति, बरीभृज्ज्यते । सकारस्य 'झलां जश् झशि' इति जश्त्वेन दकारः, 'स्तोः श्चुना श्चुः' इति श्चुत्वेन जकारः ॥

लिट्यभ्यासस्योभयेषाम् ॥ १७ ॥

उभयेषां वच्यादीनां ग्रह्यादीनां च लिटि परतोऽभ्यासस्य सम्प्रसारणं भवति । वचि—उवाच, उवचिथ । स्वप्—सुष्वाप, सुष्वपिथ । यज—इयाज, इयजिथ । टुवप्—उवाप, उवपिथ ।

पदमञ्जरी

वश्निष्ठानत्वम् । *वरीवृश्च्यत इत्यादौ* 'रीगृत्वतः' इति रीग्भावः ॥

लिट्यभ्यासस्योभयेषाम् ॥ विव्यथेति । 'व्यचेः कुटादित्वमनसीति वक्तव्यम्' इत्यत्र पर्युदासवृत्त्यास्प्रत्ययसदृशस्य कृतो ग्रहणादिह ङित्वाभावाद्धातोः सम्प्रसारणाभावः ।

न्यासः

षत्वं न भवतीति भावः । झलादौ हि तद् विधीयते; 'झलो झलि' इत्यतो झल्ग्रहणानुवृत्तेः । **कुत्वे तु कर्त्तव्ये तदसिद्धमेवेति ।** न हि यथा षत्वादौ निष्ठादेशस्य सिद्धत्वमुच्यते, तथा कुत्वेऽपि, तेन तत् प्रवर्त्तत एव । **वृश्चतीति ।** पूर्ववच्छः । **वरीवृश्च्यत इति ।** 'रीगृत्वत इति वक्तव्यम्' इति रीगागमः । **पृष्ट इति ।** पूर्ववत् षत्वम् । 'यजयाच' इत्यादिना नङि विहिते प्रश्न इत्यत्र सम्प्रसारणं कस्मान्न भवति ? इत्यत आह—**नङित्यादि । भृष्ट इति ।** पूर्ववत् षत्वम् । **भृज्जतीति ।** पूर्ववच्छः । **बरीभृज्ज्यत इति ।** पूर्ववद् रीक् । **सकारस्येत्यादि ।** ननु 'स्कोः संयोगाद्योरन्ते च' इति तस्य लोपेन भवितव्यम् ? नैतदस्ति; झलि पदान्ते च स उच्यत इति ॥

लिट्यभ्यासस्योभयेषाम् ॥ उवपिथेति । क्रादिनियमादिट् प्राप्तः 'उपदेशेऽत्वतः' इति प्रतिषिद्धः 'ऋतो भारद्वाजस्य' इति नियमात् पुनर्भवति ।

Indira Gandhi National Centre for the Arts

ग्रह्यादीनाम्–तत्र ग्रहेरविशेषः । जग्राह, जग्रहिथ । ज्या–जिज्यौ, जिज्यिथ । वयि–उवाय, उवयिथ । व्यध–विव्याध, विव्यधिथ । वश–उवाश, उवशिथ । व्यच–विव्याच, विव्यचिथ ।

वृश्चतेः सत्यसति वा योगे नास्ति विशेषः । योगारम्भे तु सति यदि सम्प्रसारणमकृत्वा हलादिःशेषेण रेफो निवर्त्यते, तदा वकारस्य सम्प्रसारणं प्राप्नोति । अथ रेफस्य सम्प्रसारणं कृत्वा उरदत्वं रपरत्वं च क्रियते, तदानीमुरदत्वस्य स्थानिवद्भावात् 'न सम्प्रसारणे सम्प्रसारणम्' इति प्रतिषेधो भवतीत्यस्ति विशेषः । वव्रश्च, वव्रश्चिथ ।

पदमञ्जरी

'वृश्चतिपृच्छतिभृज्जतीनामविशेषः' इति वार्त्तिकम्, तद् वृश्चतिविषये *भाष्यकारेण* दूषितम्—'यदुच्यते वृश्चतेरविशेषः' इत्यादि । तत्र *वार्त्तिककारस्या*भिप्रायमाह—*वृश्चतेरिति* । असति सूत्रे यद्रूपं तदेव सतीत्यभिप्रायेण वार्त्तिककारेणैतदुक्तमित्यर्थः । *भाष्यकारस्याभिप्रायमाह—योगारम्भे सतीति* । रेफस्य

न्यासः

ग्रहेरविशेष इति । यस्मात् सति सम्प्रसारणे हलादिशेषेण रेफनिवृत्तौ जग्राहेति ग्रहेर्यद्रूपं भवति, सत्यपि सम्प्रसारण उरत्वरपरत्वहलादिशेषेष्वपि कृतेषु तदेव भवति । **जिज्याविति** । 'आत औ णलः' । **जिज्यिथेति** । 'आतो लोप इटि च' इत्याकारलोपः । **वृश्चतेः सत्यसति वा योगे नास्ति विशेष इति** । यद्यन्यार्थो योग आरभ्यते न वृश्चत्यर्थः, ततो वृश्चत्यर्थमेतद्वचनं न भवतीति सत्यप्येतस्मिन्नन्यार्थवचने वृश्चतेरभ्यासस्य नैव सम्प्रसारणेन भवितव्यम् । न ह्यसति तदर्थे वचने केनचित् प्रकारेण सम्प्रसारणमुपपद्यत इत्यभिप्रायः । ततश्चासत्यस्मिन् योगे वव्रश्चेति यद्रूपं भवति सत्यपि तदेवेति नास्ति वृश्चतेर्विशेषः । एतच्च वृत्तिकारमतेनोक्तम् । **भाष्यकारमतेन त्वाह—योगारम्भ इत्यादि** । तस्यायम्भावः—सति वचनेऽन्यार्थे क्रियमाणे तस्य वृश्चत्यर्थतापि भवति; वृश्चतेरपि ग्रह्यादिष्वन्तर्भावात् । ततश्च तदर्थोऽप्ययं योगारम्भ इति तदभ्यासस्यापि सम्प्रसारणेन भवितव्यमिति तुशब्दो वृत्तिकारमताद्विशेषं दर्शयति । **यदि सम्प्रसारणमकृत्वेत्यादि** । ननु चोभयग्रहणस्य प्रयोजनं वक्ष्यति—हलादिशेषं परमपि बाधित्वा सम्प्रसारणमेव यथा स्यादिति, तत् कुतोऽस्य पक्षस्य सम्भवः ? उभयग्रहणरहिते योगे सतीत्यभिप्रायः । **अथ रेफस्येत्यादि** । उभयग्रहणसहिते योगे सतीति भावः । **उरदत्वस्य स्थानिवद्भावादिति** । केन पुनः स्थानिवद्भावः ? 'अचः परस्मिन् पूर्वविधौ' इति । कः पुनरसौ ? प्रत्ययोऽचः परः, यन्निमित्तमोरत्वं स्यात् । अङ्गस्य योऽभ्यास इति

Indira Gandhi National Centre for the Arts

पृच्छतिभृज्जत्योरविशेषः । अकिदर्थं चेदमभ्यासस्य सम्प्रसारणं विधीयते । किति हि परत्वाद्धातोः सम्प्रसारणे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनम्—ऊचतुः, ऊचुरिति ।

अधिकारादेवोभयेषां ग्रहणे सिद्धे पुनरुभयेषामिति वचनम्—हलादिःशेषमपि बाधित्वा सम्प्रसारणमेव यथा स्यादिति—विव्याध ॥

स्वापेश्चङि ॥ १८ ॥

पदमञ्जरी

सम्प्रसारणे सत्यसति वा नास्ति विशेष इति वार्त्तिककारेणोक्तमित्यध्यारोप्य भाष्यकारेणोक्तमित्यर्थः । *अकिदर्थमिदमिति* । किति कथम् ? इत्यत आह—*किति हीति* ।

अधिकारादेवेति । नात्र शास्त्रीयोऽधिकारः, किं तर्हि ? अपेक्षालक्षणः, तेन पूर्वसूत्रे वच्यादेः सम्बन्धो नाशङ्कनीयः । योगविभागसामर्थ्याद्वा पूर्वसूत्रे तेषामसम्बन्धः ।

हलादिःशेषमपि बाधित्वेति । अन्यथा परत्वाद्धलादिःशेषः स्यात् । *सम्प्रसारणमेव यथा स्यादिति* । पुनर्विधानमुभयेषांग्रहणाद्भवति तद्बाधकबाधनार्थमिति भावः ॥

न्यासः

विज्ञायमाने सामर्थ्यात् प्रत्यय आश्रितो भवति; विना तेनाङ्गव्यपदेशाभावात् । वृत्तिकारमतं चेषितव्यम्; अन्यथा तत्रोभयग्रहणाभावाद् हलादिशेषेण प्रागेव सम्प्रसारणाद् रेफे निवर्त्तिते वकारस्य सम्प्रसारणं स्यात् । ततश्च उव्रश्चेत्यनिष्टं रूपं स्यात् ।

पृच्छतिभृज्जत्योरविशेष इति । ग्रहेरिव वेदितव्यः । **अकिदर्थमित्यादि** । किं पुनः कारणमकिदर्थमिदं व्याख्येयम् ? इत्यत आह—**कितीत्यादि** । यस्मात् किति परत्वात् सम्प्रसारणे कृते कृतसम्प्रसारणस्य पुनः प्रसङ्गविज्ञानाद् द्विर्वचने कृतेऽन्तरेणाप्येतद् वचनम्, ऊचतुरित्यादि सिद्ध्यत्येव ! तस्मान्नेदं किदर्थम्, अपि त्वकिदर्थमेवेति ।

अथ किमर्थमुभयेषामित्युच्यते, यावता स्वरितलिङ्गासङ्गादेवोभयेषामित्यस्यानुवृत्तिर्भविष्यति ? न चानुवृत्तौ सत्यां ङिति वच्यादीनामपि सम्प्रसारणं प्राप्नोतीत्येतच्च नाशङ्कनीयम्; यदि वच्यादीनामपि ङिति सम्प्रसारणं स्याद् योगविभागोऽनर्थकः स्यात्; मण्डूकप्लुतिन्यायेन वा वच्यादीनामनुवृत्तिर्भविष्यति, तत् कुतोऽस्य दोषस्यावसरः ? इत्याह—**अधिकारादेवेत्यादि** । अधिकारादेवोभयग्रहणे सिद्धे पुनरुभयेषांग्रहणात् पुनःश्रुतिर्भवति । तस्याश्चैतदेव प्रयोजनम्—यत्र सम्प्रसारणं चान्यच्च प्राप्नोति तत्र सम्प्रसारणमेव यथा स्यात्, मा भूदन्यदिति । तेन विव्याध, विव्यधिथ इत्यत्र हलादिशेषं परमपि बाधित्वा सम्प्रसारणमेव भवति; अन्यथात्र परत्वात् प्राक् प्रवर्त्तमानेन हलादिशेषेण यकारस्य निवृत्तौ कृतायां वकारस्य सम्प्रसारणमापद्येत, ततश्च—उव्याध, उव्यधिथेत्यनिष्टं रूपं स्यात् ॥

Indira Gandhi National Centre for the Arts

स्वापेरिति स्वपेर्ण्यन्तस्य ग्रहणम्, तस्य चङि परतः सम्प्रसारणं भवति। असूषुपत्, असूषुपन्। द्विर्वचनात्पूर्वमत्र सम्प्रसारणम्, तत्र कृते लघूपधगुणः, तस्य 'णौ चङ्युपधायाः' ह्रस्वत्वम्, ततो द्विर्वचनम्, 'दीर्घो लघोः' इति दीर्घत्वम्।

चङीति किम्? स्वाप्यते। स्वापितः।

'कितीति निवृत्तम्, ङितीति केवलमिहानुवर्त्तते'—इत्येतद् दुर्विज्ञानम्॥

स्वपिस्यमिव्येञां यङि॥ १९॥

'ञिष्वप् शये', 'स्यमु स्वन ध्वन शब्दे', 'व्येञ् संवरणे'—इत्येतेषां धातूनां यङि परतः सम्प्रसारणं भवति। सोषुप्यते। सेसिम्यते। वेवीयते।

पदमञ्जरी

स्वापेश्चङि॥ *स्वापेर्ण्यन्तस्य ग्रहणमिति*। आप्नोतेस्तु सुपूर्वस्य ग्रहणं न अण्यन्तस्य; चङोऽसम्भवात्। ण्यन्तस्यापि न भवति; 'धातोः' इत्यधिकारात्। *स्वाप्यत इति*। कर्मणि लट्, णिलोपः।

स्वापित इति। 'निष्ठायां सेटि' इति णिलोपः।

ननु च 'ग्रहिज्या' इत्यादिसूत्रान्ङितीत्यनुवर्त्तिष्यते, न चान्यः स्वापेर्ङिदस्ति, यङ् तावदनेकाच्त्वान्नास्ति, अपित्सार्वधातुकं तु विकरणैर्व्यवहितम्, अङादयस्त्वविहिता एव? तत्राह—*ङितीति केवलमित्यादि*। ननु कितीत्येतच्चानुकृष्टं पूर्वसूत्र इति नेहानुवर्तिष्यते, किमर्थं दुर्ज्ञानं ङिद्ग्रहणम्? ङिद्ग्रहणमपि तर्हि पूर्वसूत्रे नानुवर्तते; लिटो ङितोऽसम्भवादिति तस्येहानुवृत्तिर्दुर्विज्ञाना॥

न्यासः

स्वापेश्चङि॥ **स्वापेरिति**। 'आप्लृ व्याप्तौ' इत्यस्यापि सुपूर्वस्येका निर्देशः सम्भवति, अतस्तद्ग्रहणाशङ्कानिराकरणायाह—**स्वपेर्ण्यन्तस्य ग्रहणमिति**। ण्यन्तस्य ग्रहणं चङ्ग्रहणाद् विज्ञायते, न ह्यण्यन्ताच्चङ् सम्भवति। **असूषुपदिति**। 'हेतुमति च' इति णिच्। **द्विर्वचनात् पूर्वमत्र सम्प्रसारणमिति**। परत्वात्। **स्वाप्यत इति**। कर्मणि लकारः, 'सार्वधातुके यक्'। **स्वापितमिति**। 'निष्ठायां सेटि' इति णिलोपः। ननु च ग्रह्यादिसूत्रात् ङितीत्यनुवर्त्तते, न च स्वापेश्चङोऽन्यो ङिदस्ति, तत्र सामर्थ्याच्चङ्येव भविष्यतीति न कर्त्तव्यमेव चङ्ग्रहणम्? इत्यत आह—**ङितीति केवलमित्यादि**। ग्रह्यादिसूत्रे ह्युभयं सन्निहितम्—किद्ग्रहणम्, ङिद्ग्रहणञ्च, तत्रोभयोरविशेषेण सन्निधाने ङिद्ग्रहणमेवानुवर्त्तते, न किद्ग्रहणमिति मन्दधिया दुर्बोधम्। अतः सुखप्रतिपत्तये मन्दबुद्धेश्चङ्ग्रहणं क्रियत इति भावः॥

Indira Gandhi National Centre for the Arts

यङीति किम् ? स्वप्नक् ॥

न वशः ॥ २० ॥

'यङि' इति वर्त्तते । वशेर्धातोर्यङि परतः सम्प्रसारणं न भवति । वावश्यते, वावश्येते, वावश्यन्ते ।

यङीति[1] किम् ? उष्टः । उशन्ति[1] ॥

चायः की ॥ २१ ॥

'यङि' इति वर्त्तते । 'चायृ पूजानिशामनयोः'—इत्येतस्य धातोर्यङि परतः कीत्ययमादेशो भवति । चेकीयते, चेकीयेते, चेकीयन्ते ।

दीर्घोच्चारणं यङ्लुगर्थम् । चेकीतः ॥

स्फायः स्फी निष्ठायाम् ॥ २२ ॥

'स्फायी ओप्यायी वृद्धौ'—इत्यस्य धातोर्निष्ठायां परतः 'स्फी' इत्ययमादेशो भवति । स्फीतः । स्फीतवान् ।

पदमञ्जरी

स्वपिस्यमिव्येञां यङि ॥ *स्वप्नगिति* । 'स्वपितृषोर्नजिङ्' ॥

चायः की ॥ कीति दीर्घोच्चारणमनर्थकम्, ह्रस्वादेशेऽपि 'अकृत्सार्वधातुकयोः' इति दीर्घस्य सिद्धत्वात् ? तत्राह–*दीर्घोचारणमित्यादि* । कथं पुनर्यङुच्यमान आदेशो यङ्लुकि स्यात्? प्रत्ययलक्षणेन । 'न लुमताङ्गस्य' ? एवं तर्हि दीर्घोच्चारणसामर्थ्याल्लुक्यपि भविष्यति, पूर्वसूत्रविहितं तु प्रसारणं यङ्लुकि न भवत्येव । न च 'सम्प्रसारणाश्रयं च कार्यं बलवत्' इति प्रागेव लुकः सम्प्रसारणम्; प्रत्याख्यातत्वादस्याः परिभाषायाः । तथा च पूर्वत्रोभयेषां ग्रहणं कृतम्, अन्यथाऽनयैव परिभाषया हलादिशेषात्प्रागेव सम्प्रसारणं भविष्यतीत्यनर्थकं

न्यासः

स्वपिस्यमिव्येञां यङि ॥ **स्वप्नगिति** । 'स्वपितृषोर्नजिङ्' ॥

न वशः ॥ **चायः की** ॥ अथ किमर्थं दीर्घोच्चारणम्, यावता ह्रस्वादेशेऽपि अकृत्सार्वधातुकयोः' इति दीर्घत्वेन चेकीयत इति सिध्यत्येव ? इत्याह—**दीर्घोच्चारणमित्यादि** । कथं पुनः 'यङि च' इत्युच्यमाने आदेशो यङ्लुकि स्यात् ? प्रत्ययलक्षणेन स्यात् । अथापि 'न लुमताङ्गस्य' इति प्रत्ययलक्षणं प्रतिषिध्यते ? एवमप्यस्मादेव दीर्घोच्चारणाद् यङ्लुकि भवतीति विज्ञायते, अन्यथा तदपार्थकं स्यात् !

चेकीत इति । तसन्तमेतत् । 'यङोऽचि च' इति यङो लुक् ॥

१–१. पाठोऽयमेकस्मिन् पुस्तके नास्ति ।

Indira Gandhi National Centre for the Arts

निष्ठायामिति किम् ? स्फातिः । स्फातीभवतीत्येदपि क्तिन्नन्तस्यैव रूपम्, न निष्ठान्तस्य ।

'निष्ठायाम्' इत्येतदधिक्रियते 'लिड्यङोश्च' इति प्रागेतस्मात् सूत्रात् ॥

स्त्यः प्रपूर्वस्य ॥ २३ ॥

'निष्ठायाम्' इति वर्त्तते, 'सम्प्रसारणम्' इति च । 'स्फी' इत्येतन्न स्वर्यते । 'स्त्यै ष्टचै शब्दसङ्घातयोः'–द्वयोरप्येतयोर्द्धात्वोः स्त्यारूपमापन्नयोः सामान्येन ग्रहणम् । 'स्त्या' इत्येतस्य प्रपूर्वस्य धातोर्निष्ठायां परतः सम्प्रसारणं भवति । प्रस्तीतः । प्रस्तीतवान् । सम्प्रसारणे कृते यण्वत्त्वं विहतमिति निष्ठानत्वं न भवति । 'प्रस्त्योऽन्यतरस्याम्' इति तु पक्षे मकारः क्रियते––प्रस्तीमः, प्रस्तीमवान् ।

प्रपूर्वस्येति किम् ? संस्त्यानः, संस्त्यानवान् ।

पदमञ्जरी

तत्स्यात् । सास्वपीति, सास्वप्ति । सास्वप्तः, सास्वपीतः । वाव्येति, वाव्याति ॥

स्त्यः प्रपूर्वस्य ॥ द्वयोरप्येतयोरिति । द्वयोरपि स्त्यारूपस्य लाक्षणिकत्वात् । *सम्प्रसारणे कृते इति ।* तस्यासिद्धत्वात्प्रागेव सम्प्रसारणम् ।

न्यासः

स्फायः स्फी निष्ठायाम् ॥ स्फातिरिति । 'स्त्रियां क्तिन्', वलि यलोपः । **स्फातीभवतीति** । स्फायतेर्निष्ठान्ताच्च्वौ कृते 'अस्य च्वौ' इतीत्वे सतीदं रूपं भवतीति मन्यमानो यश्चोदयेद्–अथ कथं स्फातीभवतीत्येतद्रूपम्, यावताऽत्रापि निष्ठायामस्मिन्नादेशे स्फीतीभवतीत्येवं भवितव्यमिति ? तं प्रत्याह—**स्फातीभवतीत्येतदपीत्यादि** । एतदपि स्फातिशब्दात् क्तिन्नन्ताच्च्वौ कृते 'च्वौ च' इति दीर्घत्वे च क्तिन्नन्तस्यैव रूपम् । अतो न भवत्येष दोषप्रसङ्गः ॥

स्त्यः प्रपूर्वस्य ॥ सामान्येन ग्रहणमिति । द्वयोरप्यात्वे कृते पूर्वस्य 'धात्वादेः षः सः' इति सत्वे समानत्वाद् रूपस्य । लक्षणप्रतिपदोक्तपरिभाषा च नेहोपतिष्ठते; उभयोर्लाक्षणिकत्वात् । अथात्र 'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वं कस्मान्न भवति ? इत्यत आह–**सम्प्रसारण इत्यादि** । न त्वस्य पूर्वत्रासिद्धत्वात् पूर्वं संप्रसारणं क्रियत इति, तत्र कृते च यण्वत्ता नास्तीति नत्वं न भवति ।

Indira Gandhi National Centre for the Arts

'प्रस्त्यः' इत्येव सिद्धे पूर्वग्रहणमिहापि यथा स्यात्–प्रसंस्तीतः, प्रसंस्तीतवान् ।

तत्कथं प्रपूर्वस्येति षष्ठ्यर्थे बहुव्रीहिः ? प्रः पूर्वो यस्य धातूपसर्गसमुदायस्य स प्रपूर्वस्तदवयवस्य स्त्यः–इति व्यधिकरणे षष्ठ्यौ । तत्र प्रसंस्तीत इत्यत्रापि प्रपूर्वसमुदायावयवः स्त्याशब्दो भवति ॥

द्रवमूर्त्तिस्पर्शयोः श्यः ॥ २४ ॥

द्रवमूर्त्तौ=द्रवकाठिन्ये, स्पर्शे वर्त्तमानस्य 'श्यैङ् गतौ' इत्यस्य

पदमञ्जरी

प्रस्त्य इत्येव सिद्ध इति । यथा 'प्रस्त्योऽन्यतरस्याम्' इत्यत्र । न चैवमुच्यमाने प्रशब्दस्यापि यो रेफस्तस्यापि प्रसङ्गः; धातोरित्यधिकारात् । *प्रसंस्तीत इति* । 'प्रस्त्योऽन्यतरस्याम्' इति मत्वमत्र न भवत्येव । *तत्कथमिति* । कथमयमर्थः शब्देनाभिहितो भवतीति प्रश्नः । *षष्ठ्यर्थे बहुव्रीहिरिति* । पूर्वशब्दस्यावयववाचित्वात्, यथा–पूर्वं कायस्येति । *व्यधिकरणे षष्ठ्याविति* । प्रपूर्वस्येति स्त्याशब्दापेक्षयावयवषष्ठी, स्त्य इत्येषापि यणवयवापेक्षया षष्ठी । यथा पुनरयमर्थः प्रकृतोपयोगी तथा दर्शयति–*तत्रेति* ॥

द्रवमूर्तिस्पर्शयोः श्यः ॥ *द्रवकाठिन्य इति* । द्रवावस्थाया उत्तरावस्थाविशेषः=

न्यासः

प्रस्त्य इत्येवं सिद्ध इति । ननु चैवमुच्यमाने प्रशब्दस्यापि सम्प्रसारणं स्यात्, ततश्च प्रस्तीत इति रूपं स्यात्, तत् किमुच्यते—प्रस्त्य इत्येवं सिद्ध इति ? 'अनन्त्यविकारेऽन्त्यसदेशस्य' इति न भवत्येष दोष इति मन्यते । **इहापि यथा स्यादिति** । कस्मात् पुनर्न प्राप्नोति ? संशब्देन व्यवहितत्वात् ।

किं पूर्वग्रहणे क्रियमाणे शब्दार्थ एव तथाविधो भवति येनात्रापि भवति ? अथ ग्रन्थाधिक्यादर्थाधिक्यं सूचयति–इत्यभिप्रायेणाह—**तत् कथमिति** । प्रथमकल्पं दर्शयन्नाह–**प्रपूर्वस्येति** । **षष्ठ्यर्थे बहुव्रीहिरिति** । पूर्वशब्दोऽयमवयववचन इति षष्ठ्यर्थे बहुव्रीहिर्भवति । अवयववाचिनि पूर्वशब्दे धातुरन्यपदार्थो नोपपद्यते । न हि धातोः प्रशब्दोऽयमवयवो भवति, अपि तु धातूपसर्गसमुदायस्य । तस्मात् स एवान्यपदार्थो युक्त इत्याह–**प्रः पूर्वो यस्येत्यादि** । **तदवयवस्येति** । तस्यावयवस्तदवयव इति षष्ठीसमासः । तच्छब्देन धातूपसर्गसमुदायः परामृश्यते । **व्यधिकरणषष्ठ्याविति** । **प्रपूर्वस्येति** । स्त्यावयवापेक्षया योऽयमवयवावयविसम्बन्धस्तत्र षष्ठी, 'स्त्यः' इत्येषा तु यणवयवापेक्षया यः सम्बन्धस्तत्र । तेन भिन्नाभिधेयत्वात् 'स्त्यः', 'प्रपूर्वस्य' इति व्यधिकरणे षष्ठ्यौ । स्यादेवम्, प्रसंस्तीत इत्यत्र प्रपूर्वसमुदायावयवः स्त्याशब्दो न सम्भवति इत्यत आह–**तत्रेत्यादि** ॥

द्रवमूर्त्तिस्पर्शयोः श्यः ॥ **द्रवमूर्त्तौ द्रवकाठिन्य इति** । अनेन द्रवमूर्त्तिशब्दस्यार्थ-

Indira Gandhi National Centre for the Arts

धातोर्निष्ठायां परतः सम्प्रसारणं भवति । शीनं घृतम् । शीना वसा । शीनं मेदः । द्रवावस्थायाः काठिन्यं गतमित्यर्थः । 'श्योऽस्पर्शे' इति निष्ठानत्वम् ।

स्पर्शे च—शीतं वर्त्तते । शीतो वायुः । शीतमुदकम् । गुणमात्रे तद्वति चास्य शीतशब्दस्य वृत्तिर्द्रष्टव्या ।

द्रवमूर्त्तिस्पर्शयोरिति किम् ? संश्यानो वृश्चिकः ॥

प्रतेश्च ॥ २५ ॥

'श्यः' इति वर्त्तते । प्रतेरुत्तरस्य श्यायतेर्निष्ठायां परतः सम्प्रसारणं भवति । प्रतिशीनः, प्रतिशीनवान् ।

द्रवमूर्त्तिस्पर्शाभ्यामन्यत्रापि यथा स्यादिति सूत्रारम्भः ॥

विभाषाऽभ्यवपूर्वस्य ॥ २६ ॥

'श्यः' इति वर्त्तते । अभि, अव—इत्येवम्पूर्वस्य श्यायतेर्निष्ठायां विभाषा सम्प्रसारणं भवति । अभिशीनम्, अभिश्यानम् । अवशीनम्, अवश्यानम् । द्रवमूर्त्तिस्पर्शविवक्षायामपि विकल्पो भवति । अभिशीनं घृतम्, अभिश्यानं घृतम् । अवशीनं मेदः, अवश्यानं मेदः । अभिशीतो वायुः, अभिश्यानः । अवशीतमुदकम्, अवश्यानमुदकम् ।

पदमञ्जरी

काठिन्यम् । *स्पर्शे चेति* । रूपादिसहचरितो गुणः=स्पर्शः ।

शीतो वायुरिति । कथं पुनः स्पर्शमात्राभिधायिनः शीतशब्दस्य तद्वद्द्रव्यवाचिना वायुशब्देन सामानाधिकरण्यम् ? तत्राह—*गुणमात्र इत्यादि* । शुक्लादिशब्दवदिति भावः ॥

न्यासः

माचष्टे । द्रवावस्थाया उत्तरोऽवस्थाविशेषः काठिन्याख्योऽत्र द्रवमूर्त्तिशब्देनोच्यते ।

स्पर्शे चेति । रूपादिसहचरितो गुणः स्पर्श इत्युच्यते । **शीतो वायुः, शीतमुदकमिति** । कथं पुनरत्र सामानाधिकरण्यम्, यावता शीतशब्देन गुणविशेषोऽभिधीयते । वाय्वादिशब्देन तु द्रव्यविशेष इत्यत आह—**गुणमात्र इत्यादि** । यथा—शुक्लादिशब्दाः कदाचिद् गुणमात्रे वर्त्तन्ते, यथा—पटस्य शुक्ल इति; कदाचित्तु तद्वति द्रव्ये सोऽयमित्यभेदसम्बन्धत्वान् मतुब्लोपान् मत्वर्थीयाकारप्रत्ययान्तत्वाद्वा शुक्लः पट इति, तथा शीतशब्दोऽपि । तेन यदा तद्वति द्रव्ये वर्त्तते, तदोभयोरेकद्रव्ये निवेशितत्वादुपपद्यते सामानाधिकरण्यमिति भावः ।

संश्यान इति । 'संयोगादेः' इत्यादिना नत्वम् ॥

Indira Gandhi National Centre for the Arts

सेयमुभयत्रविभाषा द्रष्टव्या। पूर्वग्रहणस्य च प्रयोजनम्—समभिश्यानम्, समवश्यानमित्यत्र मा भूदिति केचिद् व्याचक्षते। न किलायमभ्यवपूर्वः समुदाय इति। योऽत्राभ्यवपूर्वः समुदायस्तदाश्रयो विकल्पः कस्मान्न भवति ! तस्मादत्र भवितव्यमेव। यदि तु नेष्यते, ततो यत्नान्तरमास्थेयमस्माद्विभाषाविज्ञानात्—व्यवस्थेयम्। पूर्वग्रहणस्य चान्यत् प्रयोजनं वक्तव्यम्[1]।

श्रृतं पाके ॥ २७ ॥

पदमञ्जरी

विभाषाभ्यवपूर्वस्य ॥ सेयमुभयत्र विभाषेति । द्रवमूर्तिविषये पूर्वेण प्राप्तेऽन्यत्राप्राप्ते। अथ पूर्वग्रहणं किमर्थम्, न 'विभाषाभ्यवाभ्याम्' इत्येवोच्येत, तत्राह—*पूर्वग्रहणस्येत्यादि*। क्रियमाणेऽपि पूर्वग्रहणे कस्मादेवात्र न भवति ? इत्याह—*न किलेति*। किलशब्दसूचितामरुचिं दर्शयति-*योऽत्रेति*। मा भून्महासमुदायोऽभ्यवपूर्वः, अवान्तरसमुदायस्त्वभ्यवपूर्वोऽप्यस्ति, तदाश्रयो विकल्पः प्राप्नोति। *यत्नान्तरमास्थेयमिति*। विभाषाग्रहणं व्यवस्थितविभाषार्थमाश्रयणीयमित्यर्थः। *पूर्वग्रहणस्य चान्यत्प्रयोजनं वक्तव्यमिति*। तत्पुनरभिसंशीनम्, अभिसंश्यानम्, अवसंशीनम्, अवसंश्यानमित्यत्रापि विकल्पप्रवृत्तिरेव। तच्च पूर्वग्रहणे क्रियमाणे यथा लभ्यते तथा 'स्त्यः प्रपूर्वस्य' इत्यत्र व्याख्यातम्॥

न्यासः

प्रतेश्च ॥ **विभाषाऽभ्यवपूर्वस्य** ॥ **सेयमुभयत्र विभाषेति**। द्रवमूर्त्तिस्पर्शविषये पूर्वेण प्राप्ते, अन्यत्राप्राप्ते। अथ पूर्वग्रहणं किमर्थम्, न 'विभाषाऽभ्यवाभ्याम्' इत्येवोच्येत ? अत आह—**पूर्वग्रहणस्येत्यादि**। क्रियमाणे पूर्वग्रहणे कस्मादेवात्र न भवतीत्याह—न **किलेत्यादि**। अयं हि द्विविधोऽपि समुदायो नाभिपूर्वः, नाप्यवपूर्वः, किं तर्हि ? सम्पूर्वः। तेन पूर्वग्रहणादत्र न भवति। क्रियमाणेऽपि पूर्वग्रहणे प्राप्नोत्येवेति मन्यमानः किलशब्दमरुचिसूचनार्थं प्रयुक्तवान्। तामेव प्राप्तिं दर्शयन्नाह—**योऽत्रेत्यादि**। सम्-शब्दात् परो यो धातूपसर्गसमुदायस्तदाश्रयो विकल्पः कस्मान्न भवति, भवति ह्यसावभ्यवपूर्व इत्यस्ति प्राप्तिः ? अत आह—**यत्नान्तरमास्थेयमिति**। विभाषाग्रहणमिह क्रियते, सा च व्यवस्थितविभाषा विज्ञायते, तेनेह न भवतीति यत्नान्तरम्।

---

1. इतोऽग्रे-"अभिसंशीनम्, अभिसंश्यानं वा। अवसंशीनम्, अवसंश्यानं वा। अत्र विकल्पो यथा स्याद् इति पूर्वग्रहणम् 'स्त्यः प्रपूर्वस्य' इतिवत्"—इति पाठो दृश्यते, स तु प्रक्षिप्तो वेदितव्यः; पदमञ्जर्याम्, न्यासे च तस्य व्याख्यानरूपेण दर्शनात्।

Indira Gandhi National Centre for the Arts

'विभाषा' इत्यनुवर्त्तते। 'श्रा पाके'—इत्येतस्य धातोर्ण्यन्तस्याण्यन्तस्य च पाकेऽभिधेये क्तप्रत्यये परतः श्रृभावो निपात्यते विभाषा। श्रृतं क्षीरम्। श्रृतं हविः।

व्यवस्थितविभाषा चेयम्, तेन क्षीरहविषोर्नित्यं श्रृभावो भवति। अन्यत्र न भवति—श्राणा यवागूः, श्रपिता यवागूरिति।

यदापि बाह्ये प्रयोजके द्वितीयो णिजुत्पद्यते, तदापि नेष्यते–

पदमञ्जरी

श्रृतं पाके॥ श्रा पाक इत्यस्य धातोरिति। 'श्रा पाके' इत्यदादौ पठ्यते, 'श्रै पाके' इति चुरादौ, घटादिष्वपि मित्त्वार्थः 'श्रा पाके' इति पठ्यते, तत्रेह सर्वेषां ग्रहणम्। श्रायतेरपि कृतात्वस्यैतद्रूपं भवति, निपातनसामर्थ्याच्च लक्षणप्रतिपदोक्तपरिभाषा नाश्रीयते। *ण्यन्तस्य चाण्यन्तस्य चेति*। तथा चोक्तम्–'श्राश्रप्योः श्रृभावो निपात्यते' इति। अत एव प्रकृतं सम्प्रसारणमेव न विहितम्, श्रपेरपि श्रृतमित्येव यथा स्यादिति।

यदि विभाषेत्यतदत्रानुवर्त्तते, क्षीरहविषोरन्यत्र च विकल्पः प्राप्नोति सर्वत्र, तत्राह—*व्यवस्थितविभाषा चेयमिति*। *यदा त्वित्यादि*। प्रयोजकव्यापारः प्रेषणादिलक्षण उपचारेण प्रयोजकशब्देनोक्तः, तस्य च बाह्यत्वं बहिर्भूतणिज्व्याप्यत्वात्। *तदापि नेष्यत इति*। तथा चोक्तम्—श्रपेः श्रृतमन्यत्र हेतोरिति। *श्रपितं क्षीरं देवदत्तेन*। प्रयोजकव्यापारेणाप्यमानस्यापि प्रयोज्यस्य कर्मसंज्ञा न

न्यासः

पूर्वग्रहणस्य चान्यत्प्रयोजनं वक्तव्यमिति। तत् पुनरभिसंशीनम्, अभिसंश्यानम्, अवसंशीनम्, अवसंश्यानम्–इत्यत्रापि विकल्पो यथा स्यादित्येवं तद् वेदितव्यम्। एतच्च पूर्वग्रहणे क्रियमाणे यथोपपद्यते तथा 'स्त्यः प्रपूर्वस्य' इत्यत्र 'प्रपूर्वस्येति षष्ठ्यर्थे बहुव्रीहिः' इत्यादिना व्याख्यातम्॥

श्रृतं पाके॥ श्रा पाक इत्यस्य धातोरिति। 'श्रा पाके' इत्यदादौ पठ्यते, घटादौ च मित्संज्ञार्थम्, कैश्चिच्चुरादावपि, 'श्रै पाके' इति भ्वादौ, तत्रेहाविशेषेण ग्रहणं प्राप्तम्। श्रायतेरपि हि कृतात्त्वस्यैतद्रूपं भवत्येव, निपातनाच्च। लक्षणप्रतिपदोक्तपरिभाषया प्रतिबन्धं न करोति। **ण्यन्तस्याण्यन्तस्य चेति**। विशेषानुपादानात्। तथा चोक्तम्—श्राश्रप्योः श्रृतमिति।

यदि विभाषेत्यनुवर्त्तते क्षीरहविषोरपि पक्षे—श्राणम्, श्रपितमिति स्यात्; ताभ्यामन्यत्रापि पक्षे श्रृतमिति प्रसज्येत? इत्यत आह—**व्यवस्थितविभाषेयमिति**।

यदापीत्यादि। प्रयोजकव्यापारः प्रेषणाध्येषणादिः कार्यं कारणोपचारं कृत्वा

श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति ।

श्रातिरयमकर्मकः कर्मकर्तृविषयस्य पचेरर्थे वर्त्तते, स ण्यन्तोऽपि प्राकृतं पच्यर्थमाह। तदत्र द्वयोरपि श्रृतमितीष्यते–श्रृतं क्षीरं स्वयमेव, श्रृतं क्षीरं देवदत्तेन ।

पदमञ्जरी

भवति, 'गतिबुद्धिप्रत्यवसान' इति नियमात्। कथं पुनर्ण्यन्तस्य निपातनं लभ्यते, यावता पाक इत्युच्यते, ण्यन्तेन च पाचनाभिधीयते, न पाकः; अथ पाचनायामपि गुणभूतः पाकः प्रतीयते, तदाश्रयं निपातनं स्यात्? यद्येवम्, द्वितीयेऽपि णिचि प्रसङ्गः। न हि तत्र पाको गुणभूतो न गम्यते।

अथ तत्र गुणभूतत्वादेव प्रधानभूते पाके चरितार्थं निपातनं न भविष्यतीत्युच्येत? प्रथमेऽपि न स्याद्, वक्तव्यो वा विशेषः। तमाह–*श्रातिरयमित्यादि*। अयमभिप्रायः–द्विविधः पाकः–विक्लित्तिलक्षणः, विक्लेदनालक्षणश्च; उभयत्रापि पचेः प्रयोगदर्शनात्, पच्यते ओदनः स्वयमेव, पचत्योदनं देवदत्त इति। श्रातिश्चायं यद्यपि 'पाके' इत्यविशेषेण पठ्यते, तथापि कर्मकर्तृविषयस्य पचेरर्थे वर्त्तते। स *ण्यन्तोऽपि प्राकृतं* प्रकृतौ भवं णिजहितपचिवाच्यं *पच्यर्थमाह*। सोऽपि पाक एव, न पाचयतेरर्थः, यथा—सिद्ध्यत्योदनः, साधयत्योदनमिति। तत्र यदा श्रातेः क्त उत्पद्यते, तदाऽकर्मकत्वात्कर्त्तरि भवति—श्रृतं क्षीरमिति, श्रपेस्तु

न्यासः

प्रयोजकशब्देनोक्तः। स हि प्राकृतादर्थाद् बाह्यो भवति, तत्र तस्यानन्तर्भावात्। तत्र यदा 'हेतुमति च' इति द्वितीयो णिजुत्पद्यते, तदापि क्षीरहविषोरपि निपातनमेतन्नेष्यते; व्यवस्थितविभाषाविज्ञानादेव। तथा चोक्तम्—श्रपेः श्रृतमन्यत्र हेतोरिति। हेतुमण्णिचोऽन्यत्रेत्यर्थः। द्वितीयग्रहणं यदैकमेव भवति, तदेष्टत्वाच् श्रपितं क्षीरं देवदत्तेन यज्ञदत्तेनेति 'तत्प्रयोजको हेतुश्च' इति चकाराद् देवदत्तयज्ञदत्तयोः कर्तृसंज्ञाविधानादुभयत्रापि कर्त्तरि तृतीया। श्रपितमिति। श्रातेर्णिचि कृते 'अर्त्तिह्री' इत्यादिना पुक्, 'मितां ह्रस्वः' क्षीरं स्वयमेव श्राति स्म—तद् यदा देवदत्तेन प्रयुज्यते स्म तदा 'हेतुमति च' इति प्रथमो णिच्। सोऽपि श्रपयन् यदा यज्ञदत्तेन प्रयुज्यते स्म तदा द्वितीयः। 'णेरनिटि' इति पूर्वस्य णेर्लोपः, ततः क्षीरे प्रयोज्ये कर्मणि निष्ठा—श्रृतमिति।

'ण्यन्तस्याण्यन्तस्य चेति निपात्यते' इति प्रतिज्ञाते सति युक्तं ण्यन्तस्याप्येतन्निपातनम्—येषां श्रातिश्चुरादावपि पठ्यते इत्यभ्युपगमः। ये तु चुरादावस्य पाठं न प्रतिजानते तेषां कथं ण्यन्तस्येतन्निपातनं युज्यते, न च शक्यते वक्तुम्–तेषामपि हेतुमण्ण्यन्तस्यैतन्निपातनं युज्यते; 'श्रपेः श्रृतमन्यत्र हेतोः' इति भाष्यकारवचनादिति यश्चोदयेत्, तं प्रत्याह–श्रातिरयमित्यादि। कर्मभावापन्नेऽपि योऽर्थः सौकर्यात्

Indira Gandhi National Centre for the Arts

पाकग्रहणं निपातनविषयप्रदर्शनार्थम्, तेन क्षीरहविषोरेव ॥

पदमञ्जरी

कर्मणि—शृतं क्षीरं देवदत्तेन। द्वितीये तु णिचि पाचयितृव्यापारः पाचनालक्षणः प्राधान्येनाभिधीयते, न तु पाक इति निपातनाभाव इति। 'श्रपेः शृत्वमन्यत्र हेतोः' इति वार्त्तिके 'श्राश्रप्योः शृभावो निपात्यते' इति पूर्वमुक्तत्वादाद्यप्रकृतलक्षणप्रयोजकव्यापाराङ्गीकरणसामर्थ्यात्पाचयितृलक्षणप्रयोजकव्यापारनिषेधो विज्ञेयः॥

पाकोऽयं पाक्यपक्त्योर्द्विविध इह स विक्लित्तिविक्लेदनात्मा
श्रातिर्वक्त्येकमन्यं श्रपयतिरुभयत्रोभयोक्तेः शृभावः।
स्वे स्वे वाच्ये श्रपेस्तु प्रसजति सति वा पाचने न द्वितीये
नित्यं क्षीरे शृभावो हविषि च न तु पाक्येषु चार्थान्तरेषु॥

न्यासः

स्वातन्त्र्येण विवक्ष्यते स कर्मकर्त्ता, कर्म कर्त्ता भवतीति कृत्वा। कर्म चासौ कर्त्ता चेति विशेषणसमासः, स यस्य विषयः स कर्मकर्तृविषयः। अर्थद्वारकं चेदं विशेषणं पचेः कर्मकर्तृविषयत्वं वेदितव्यम्। तस्य योऽर्थः पच्यमानकर्तृकत्वं विक्लेदनमात्रं तत्रायमकर्मकः श्रातिर्वर्त्तते। यदा तु स ण्यन्तो भवति तदा प्राकृतं पच्यर्थमाह। प्रकृतौ भवः प्राकृतः, स पुनर्यः प्रकृत्यन्तस्य पचेरर्थः पक्तृकर्तृको विक्लेदनोपसंहारादिः स इह वेदितव्यः। देवदत्तादिपक्तृकर्तृकं प्राकृतं पाकाख्यं पच्यर्थमाहेत्यर्थः। तत्र द्वयोरपि शृतमिष्यत इति योऽण्यन्तः श्रातिः कर्मकर्तृविषयेण पचिना समानार्थस्तत्रापीष्यते। योऽपि ण्यन्तः प्राकृतं पच्यर्थमाह तत्रापीष्यते। तत्र शृतं क्षीरं स्वयमेवेति प्रथमस्योदाहरणम्, शृतं क्षीरं देवदत्तेनेति द्वितीयस्य। ननु च 'श्रपेः शृतमन्यत्र हेतोः' इति भाष्ये उक्तम्, तत् कथं द्वयोरपीष्यते ? एवं मन्यते—यदिदं भाष्ये उक्तम्—'श्रपेः शृतमन्यत्र हेतोः' इति, तत्र 'अन्यत्र हेतोः' इत्यनेन सर्वस्य हेतुमण्णिचः पर्युदासो न विधित्सितः; अन्यथा विप्रतिषिद्धमिदं स्यात्, असति हि श्रातेश्चुरादौ पाठे यदि श्रपेः शृतमिति निपात्यते, कथमन्यत्र हेतोरिति पर्युदासः! अथान्यत्र हेतोरिति पर्युदासो न तर्हि श्रपेः शृतमिति निपातनमुपपद्यते। न हि श्रातेश्चुरादावसति पाठे श्रातेर्हेतुमण्णिचं त्यक्त्वाऽन्यस्ततो णिजस्ति। तस्माद् यस्य हेतुमण्णिचो न केनचित् प्रकारेण स्वार्थिकत्वमुपपद्यते, स एव भाष्यकारस्य पर्युदासविषयत्वेनाभीष्टः। स पुनर्यो बाह्ये प्रयोजके द्वितीयो णिजुत्पद्यते स विज्ञेयः। यस्य तु केनचित् प्रकारेण स्वार्थिकत्वमुपपद्यते, स एव भाष्यकारस्य पर्युदासविषयत्वेन न प्रकल्प्यते, तस्यैतन्निपातनमिष्टमेव। स पुनर्यस्मिन्नुत्पन्ने श्रातिः प्राकृतं पच्यर्थमाह स विज्ञेयः, शक्यते हि तस्य पचिना प्रकृत्यर्थेन समानार्थत्वात् स्वार्थिकत्वमुपचारेणाभिधातुमिति। तदेवमिह पाठेऽपि चुरादौ श्रातेर्ण्यन्तस्याप्येतन्निपातनं युज्यत एवेति॥

Indira Gandhi National Centre for the Arts

प्यायः पी ॥ २८ ॥

'विभाषा' इत्येव । 'ओप्यायी वृद्धौ'–इत्यस्य धातोर्निष्ठायां विभाषा पीत्ययमादेशो भवति । पीनं मुखम् । पीनौ बाहू । पीनमुरः ।

इयमपि व्यवस्थितविभाषैव, तेनानुपसर्गस्य नित्यं भवति । सोपसर्गस्य तु नैव भवति । आप्यानश्चन्द्रमाः ।

आङ्पूर्वस्यान्धूधसोर्भवत्येव–आपीनोऽन्धुः । आपीनमूध इति ॥

लिड्यङोश्च ॥ २९ ॥

'विभाषा' इति निवृत्तम् । 'प्यायः पी' इत्येतच्चशब्देनानुकृष्यते । लिटि यङि च परतः प्यायः 'पी' इत्ययमादेशो भवति । आपिप्ये । आपिप्यिरे । परत्वात् पीभावे कृते पुनःप्रसङ्गविज्ञानाद् द्विर्वचनम्, 'एरनेकाचः' इति यणादेशः ।

पदमञ्जरी

प्यायः पी ॥ अन्धुः कूपः ॥

लिड्यङोश्च ॥ *विभाषेति निवृत्तमिति* । उत्तरसूत्रे पुनर्विभाषाग्रहणात् । *प्यायः पीत्येतच्चकारेणानुकृष्यते इति* । असति चकारे प्रकरणिनः सम्प्रसारणस्यैवानुवृत्तिः स्याद्, यथोत्तरत्र । *परत्वात्पीभावे कृते इति* । ननु द्वयोः सावकाशयोः परत्वं भवति, अनवकाशश्च पीभावः, एवं तर्हि परत्वादुत्कृष्टत्वादनवकाशत्वादिति भावः । *पुनः प्रसङ्गविज्ञानादिति* । अत्रापि 'विप्रतिषेधे परम्' इत्यत्र यदुक्तं न तद्विवक्षितम्, किं तर्हि ? द्विर्वचनस्य पुनः प्रसङ्गोऽस्तीति कृत्वेत्यर्थः । यदि तर्ह्यनवकाशः पीभावो नाप्राप्ते द्विर्वचन आरभ्यमाणेन तेन द्विर्वचनस्य बाधः प्राप्नोति ? नैष

न्यासः

प्यायः पी ॥ पीनमिति । 'ओदितश्च' इति निष्ठानत्वम् ।

इयमपीत्यादि । अपिशब्देन न केवलं पूर्वसूत्रे या विभाषा सैव व्यवस्थितविभाषा, अपि त्वेषापीति दर्शयति । तेन किं सिद्धं भवति ? इत्याह–**तेनेत्यादि** ।

सोपसर्गस्य तु नैव भवतीत्यस्यापवादमाह–**आङ्पूर्वस्येत्यादि** । नित्यश्चायमन्धूधसोः पीभावः । व्यवस्थितविभाषैव ॥

लिड्यङोश्च ।। **विभाषेति निवृत्तमिति** । उत्तरसूत्रे पुनर्विभाषाग्रहणात् । अन्यथापीदमेव तत्रानुवर्त्तिष्यत इति तन्न कुर्यात् । अत एवोच्यते—द्वयोर्विभाषयोर्मध्ये ये विधयस्ते नित्या भवन्तीति । **प्यायः पीत्येतच्चशब्देनानुकृष्यत इति** । इतरथा हि सम्प्रसारणस्य प्रकृतत्वाल्लिड्यङो प्यायः सम्प्रसारणं विज्ञायेत । चशब्दे तु सत्यनन्तरेणैव

Indira Gandhi National Centre for the Arts

यङि—आपेपीयते । आपेपीयन्ते ॥

विभाषा श्वेः ॥ ३० ॥

'लिड्यङोः' इति वर्त्तते, 'सम्प्रसारणम्' इति च । लिटि यङि च श्वयतेर्धातोर्विभाषा सम्प्रसारणं भवति। शुशाव, शिश्वाय। शुशुवतुः, शिश्वियतुः । यङि–शोशूयते, शेश्वीयते । तदत्र यङि सम्प्रसारणमप्राप्तविभाषा विधीयते । लिटि तु किति यजादित्वाद् नित्यं प्राप्तम्, तत्र सर्वत्र विकल्पो भवतीत्येषोभयत्र विभाषा ।

पदमञ्जरी

दोषः; उत्सर्गापवादयोः परस्परसन्निधौ बाध्यबाधकभावः । इह तु सम्प्रसारण-प्रकरणेन द्विर्वचनप्रकरणं विच्छिन्नम् । अत एव वक्ष्यते–'दिग्यादेशेन द्वित्वबाध-नमिष्यते' इति ॥

विभाषा श्वेः ॥ शुशावेति । परावपि वृद्धयायादेशौ बाधित्वा नित्यत्वात् सम्प्रसारणमन्तरङ्गत्वात्पूर्वत्वम् । *शुशुवतुरिति* । अत्रापि परत्वात्प्राप्तमियङं बाधित्वा नित्यत्वात्सम्प्रसारणम् । तत्र कृते परमपि 'एरनेकाचः' इति यणं बाधित्वान्तरङ्गत्वात्पूर्वत्वम्, पश्चादुवङादेशः । *अन्यत्रेति* । पित्सु वचनेषु । *तत्र सर्वत्र विकल्प इति* । पित्सु तावद्विकल्प्यते; प्रतिषेधकाभावात् । कित्स्वपि परत्वा-दयं विकल्पः । यजादिलक्षणस्यावकाशः–शूनः, शूनवान्, अस्यावकाशः पिद्वच-नानि; किति लिटयुभयप्रसंगे परत्वादयं विकल्पः । *अभ्यासस्यापि न भवतीति* । किमिति न भवति ? न तावत् परत्वादनेन विकल्पेन बाधः, धातोरयं

न्यासः

पीभावेन सम्बन्धः सुखमवसीयते । नाप्राप्ते द्विर्वचने पीभावो विधीयते । तेन तस्य बाधकं प्राप्नोतीति कस्यचिदाशङ्का स्यात् । अतस्तां निराकर्तुमाह–परत्वादित्यादि । विरोधे हि सति बाधा स्यात्, इह तु विरोधो नास्ति । अतः परत्वात् पीभावे कृते पुनः प्रसङ्गविज्ञानात् सिद्धमिति द्विर्वचनं भवतीति ॥

विभाषा श्वेः ॥ शुशावेति । लिटि णलि सम्प्रसारणे कृते वृद्धयावादेशौ । शिश्वा-येति । यदा न सम्प्रसारणं तदा वृद्धयायादेशौ । **शुशुवतुः, शिश्वियतुरिति** । यदा सम्प्रसारणं तदोवङ् , अन्यदेयङ् । अप्राप्तमिति । केनचिदविहितत्वात् ।

'लिट्यभ्यासस्योभयेषाम्' इत्यत्रोभयग्रहणादन्यत् कार्यं प्रवर्त्तमानमपास्याभ्यासस्य सम्प्रसारणमेव यथा स्यादित्येतदुभयेषांग्रहणस्य प्रयोजनमुक्तम् । ततश्चेममपि विकल्पं बाधित्वा नित्यं सम्प्रसारणमेव स्यादिति कस्यचिद् भ्रान्तिः स्यात्, अतस्तां निरा-

Indira Gandhi National Centre for the Arts

यदा च धातोर्न भवति, तदा 'लिटयभ्यासस्योभयेषाम्' इत्यभ्यासस्यापि न भवति ॥

णौ च संश्चङोः ॥ ३१ ॥

'विभाषा श्वेः' इति वर्त्तते। सन्परे चङ्परे च णौ परतः श्वयतेर्धातोर्विभाषा सम्प्रसारणं भवति। शुशावयिषति। चङि–अशूशवत्, अशिश्वयत्। 'सम्प्रसारणं सम्प्रसारणाश्रयं च बलीयो भवति' इति वचनादन्तरङ्गमपि वृद्धयादिकं सम्प्रारणेन बाध्यते। कृते तु सम्प्रसारणे

पदमञ्जरी

विकल्पः, नाभ्यासस्य। किञ्च–उभयेषांग्रहणस्य स एव विधिर्यथा स्यादिति। तस्माद्वचनमेवात्र शरणम्। यदाह—'श्वेर्लिट्यभ्यासलक्षणप्रतिषेधः' इति ॥

णौ च संश्चङोः ॥ 'णौ' इति श्वयत्यपेक्षया परसप्तमी, 'संश्चङोः' इति ण्यपेक्षया। तदाह—*सन्परे चङ्परे च णौ परत इति*। *अन्तरङ्गमपीति*। अन्तरङ्गत्वं तु णिज्मात्रापेक्षत्वात्। *वृद्धयादिकमिति*। आदिशब्देनायादेशो गृह्यते, यदा तु 'संप्रसारणं संप्रसारणाश्रयं च कार्यं बलीयः' इति परिभाषा प्रयोजनाभावात्प्रत्याख्याता, तदा 'णौ च संश्चङोर्विषयभूतयोः' इति। *ओः पुयण्जीत्यादि*।

न्यासः

कर्तुमाह–यदा चेत्यादि। अत्र श्वयतेर्विभाषा सम्प्रसारणमुच्यते, यदि कदाचिद् धातोर्न सम्प्रसारणं भवति तदाभ्यासस्य स्यात्, ततश्च श्वयतेः सम्प्रसारणं पाक्षिकं न कृतं स्यात्। स्यादेतत्—लिट्परस्य श्वयतेरिदं विकल्पेन कार्यं विधीयते, तस्य च तदस्त्येवेति? असम्यगेतत्; द्विष्प्रयोगे हि द्विर्वचने क्रियामात्रम् भिद्यते, न धातुरूपम् इति कुतः पूर्वपरयोः कार्यसम्बन्धं प्रति भेदः! तस्माद् यदा धातोर्न भवति तदाभ्यासस्यापि न भवत्येव ॥

णौ च संश्चङोः ॥ **णौ च संश्चङोरिति** भिन्नाधिकरणे सप्तम्यौ—संश्चङोः परतो यो णिस्तस्मिंण्णौ परतो यः श्वयतिरिति। **शुशावयिषतीति**। श्वयतेर्णिच्, सन्, सम्प्रसारणम्, वृद्धिरावादेशः, 'शु' इत्येतस्य द्विर्वचनम्। **अशूशवदिति**। लुङ्, च्लेश्चङ्, सम्प्रसारणादिकम्, पूर्ववण्णिलोपः, 'णौ चङि' इति ह्रस्वः, द्विर्वचनम्, 'दीर्घो लघोः' इति दीर्घः। ननु च श्वयतेर्णिचि तदन्ताच्च सनि कृते चङि चान्तरङ्गत्वात् पूर्वं वृद्धयायादेशाभ्यां भवितव्यम्, ततः सम्प्रसारणेन। तथा च सति शुशुययिषतीति सन्परे णौ भवितव्यम्, चङ्परे तु–अशूशुयदिति, तत् कथं शुशावयिषति, अशूशवदिति चोदाहृतम्? इत्याह—**सम्प्रसारणमित्यादि**। आदिशब्देनायादेशः परिगृह्यते। सम्प्रसारणाश्रयं पुनरत्र 'सम्प्रसारणाच्च' इति परपूर्वत्वम्। **तेनापि वृद्धयादिकं**

Indira Gandhi National Centre for the Arts

वृद्धिः, आवादेशश्च । ततः 'ओः पुयण्ज्यपरे' इत्येतद्वचनं ज्ञापकम्—णौ कृतस्थानिवद्भावस्य, इति स्थानिवद्भावात् शुशब्दो द्विरुच्यते ॥

ह्वः सम्प्रसारणम् ॥ ३२ ॥

'णौ च संश्चङोः' इति वर्त्तते । सन्परे चङ्परे च णौ परतो ह्वः सम्प्रसारणं भवति । जुहावयिषति, जुहावयिषतः, जुहावयिषन्ति । अजूहवत्, अजूहवताम्, अजूहवन् । सम्प्रसारणस्य बलीयस्त्वात् 'शाच्छासाह्वाव्यावेपां युक्' इति प्रागेव युग्न भवति ।

'सम्प्रसारणम्' इति वर्त्तमाने पुनः सम्प्रसारणमित्युक्तं विभाषेत्यस्य निवृत्त्यर्थम् ।

'ह्वः सम्प्रसारणमभ्यस्तस्य' इत्येकयोगेन सिद्धे पृथग्योगकरणम-

पदमञ्जरी

यथा चैतज्ज्ञापकं तथा 'द्विर्वचनेऽचि' इत्यत्र प्रतिपादितम् । अत्र *स्थानिवद्भावादित्यतः* पूर्वम् 'द्वितीयोऽपि' इतिशब्दः पाठ्यः । 'तेन' इति वा पठितव्यम् ॥

ह्वः संप्रसारणम् ॥ *संप्रसारणस्य बलीयस्त्वादिति* । बलीयस्त्वं च पूर्ववत् ।

एकयोगेनैव सिद्ध इति । उत्तरसूत्रे कस्यचिन्निमित्तस्य सप्तमीनिर्दिष्टस्या-

न्यासः

बाध्यत इति । नन्वेवमपि वृद्ध्यावादेशयोः कृतयोः शावित्यस्य द्विर्वचनं प्राप्नोति, न हि केनचित् णौ स्थानिवद्भावो विहितः ? इत्यत आह—**ओः पुयण्ज्यपर इत्यादि** । यत्र चैतज्ज्ञापकं तथा तस्यैव वृत्तावुपपादयिष्यामः ॥

ह्वः सम्प्रसारणम् ॥ **जुहावयिषतीति** । अत्रापि पूर्ववद् बलीयस्त्वाद् वृद्ध्यादेः प्राक् संप्रसारणं भवति, अभ्यासस्य 'कुहोः श्चुः' इति चुत्वम्—हकारस्य झकारः । तस्य 'अभ्यासे चर्च' इति जश्त्वम्—जकारः । अथात्र कस्मात् 'साच्छाशाह्वा' इत्यादिना प्रागेव सम्प्रसारणाद् युगागमो न भवति ? इत्याह—**सम्प्रसारणस्येत्यादि** ।

ननु च सम्प्रसारणग्रहणमनुवर्त्तत एव, तत् किमर्थं पुनः सम्प्रसारणमित्युच्यते ? इत्याह—**सम्प्रसारणमितीत्यादि** । पूर्वकं हि सम्प्रसारणग्रहणं विभाषेत्यनेन सम्बद्धम्, अतस्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात् । तस्माद् विभाषेत्यस्य निवृत्तये पुनः सम्प्रसारणमित्युक्तम् ।

अथ कस्माद् योगविभागः क्रियते, यावता 'ह्वः सम्प्रसारणमभ्यस्तस्य च' इत्येकयोगेऽपि जुहावयिषतीत्यादि सिध्यत्येव, अत्रापि ह्वयतिरभ्यस्तस्य कारणत्वेन सम्बन्धी भवत्येव, तथा च 'एकाचो द्वे प्रथमस्य' इति स एव द्विरुच्यमानोऽभ्यासस्य कारणं भवत्येव ? इत्याह—**ह्वः संप्रसारणमित्यादि** । एकयोगेनैव सिद्धे पृथग्योगकरणम्—अभ्यस्तस्य निमित्तं यः प्रत्ययो न भवति, तेन व्यवधाने सम्प्रसारणं न भवतीत्यस्यार्थस्य

Indira Gandhi National Centre for the Arts

नभ्यस्तनिमित्तप्रत्ययेन व्यवधाने सम्प्रसारणाभावज्ञापनार्थम् । ह्वायकमिच्छति ह्वायकीयति । ह्वायकीयतेः सन्–जिह्वायकीयिषति ॥

अभ्यस्तस्य च ॥ ३३ ॥

'ह्वः' इति वर्त्तते, तद् 'अभ्यस्तस्य' इत्यनेन व्यधिकरणम्–अभ्यस्तस्य यो ह्वयतिः । कश्चाभ्यस्तस्य ह्वयतिः ? कारणम् । तेनाभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात्सम्प्रसारणं भवति । जुहाव । जुहूयते । जुहूषति ॥

पदमञ्जरी

भ्यस्तं प्रत्यश्रवणाण्णावपि संश्चङ्परे ह्वेरभ्यस्तकारणस्य सिद्धमेव सम्प्रसारणमिति भावः । *अनभ्यस्तनिमित्तप्रत्ययेनेति ।* अभ्यस्तस्य यन्निमित्तं न भवति तेन । *व्यवधाने इति ।* यद्युत्तरसूत्रं प्रवर्तेत, तदा योगविभागोऽनर्थकः स्यादिति ज्ञापकत्वम् ॥

अभ्यस्तस्य च ॥ अत्र 'ह्वः' इत्यनुवर्त्तमानस्य यद्यभ्यस्तस्येत्यनेन सामानाधिकरण्यं स्यात्, तदा कृते द्विर्वचनेऽभ्यस्तसंज्ञायामुपजातायां सम्प्रसारणेन भवितव्यम्, ततश्चाभ्यासस्य सम्प्रसारणं न स्यात्; 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात् । आकारहकाराभ्यां व्यवहितत्वादप्रतिषेध इति चेत्? न; समानाङ्गे सम्प्रसारणप्रतिषेधात् । समानाङ्गग्रहणं तत्र चोदयिष्यति, एतच्च तत्रैव व्यक्तं व्याख्यास्यते । तमिमं सामानाधिकरण्ये दोषं पश्यन्नाह–*तदभ्यस्त-*

न्यासः

ज्ञापनार्थम् । तेन जिह्वायकीयिषतीत्यत्र ण्वुला क्यचा च व्यवधाने न भवति । यदि पुनः पृथग्योगकरणेनायमर्थो न ज्ञाप्येत, तदा स्यादेवात्र सम्प्रसारणम् । भवति ह्यत्रापि ह्वयतिरभ्यस्तस्य निमित्तम् । ह्वायकशब्दाण्ण्वुलन्तात् क्यच्, 'क्यचि च' इतीत्वम्, क्यजन्तात् सन्, इट्, 'अतो लोपः' द्विर्वचनम् ॥

अभ्यस्तस्य च ॥ चकारः 'ह्वः' इत्यनुकर्षणार्थः, अत एवाह–**ह्व इत्यनुवर्त्तत इति ।** यदि 'ह्वः' इत्येतन्नानुवर्त्तते ततोऽभ्यस्तमात्रस्य स्यात् । तत्र 'ह्वः' इत्यनुवर्त्तमानस्याभ्यस्तस्येत्यनेन यदि सामानाधिकरण्यं स्यात्, तदा द्विर्वचने कृतेऽभ्यस्तसंज्ञायामुपजातायां सम्प्रसारणं स्यात् । एवञ्च 'न सम्प्रसारणे सम्प्रसारणम्' इत्यभ्यासस्य सम्प्रसारणं न स्यात् । यद्यपि परेण हरूपेण व्यवधानम्, तथापि समानाङ्गग्रहणात् तस्य व्यवधानेऽपि प्राप्नोत्येवात्र प्रतिषेधः, यथा यूनेत्यत्र–इतीमं पक्षे सामानाधिकरण्ये दोषं पश्यन्नाह—**तदभ्यस्तस्येत्यनेन व्यधिकरणमिति ।** भिन्नाभिधेयमित्यर्थः । **अभ्यस्तस्य यो ह्वयतिरित्यादिना** सम्बन्धलक्षणां षष्ठीं ख्यापयंस्तदेव वैयधिकरण्यं दर्शयति । तेन

Indira Gandhi National Centre for the Arts

बहुलं छन्दसि ॥ ३४ ॥

'ह्वः' इति वर्त्तते। छन्दसि विषये ह्वयतेर्धातोर्बहुलं सम्प्रसारणं भवति। इन्द्राग्नी हुवे। देवीं सरस्वतीं हुवे। ह्वेञो लट्यात्मनेपदोत्तमैकवचने 'बहुलं छन्दसि' इति शपो लुकि कृते सम्प्रसारणमुवङादेशश्च।

न च भवति—ह्वयामि मरुतः शिवान्। ह्वयामि विश्वान्देवान्॥

चायः की ॥ ३५ ॥

'बहुलं छन्दसि' इति वर्त्तते। चायतेर्धातोश्छन्दसि विषये बहुलं कीत्ययमादेशो भवति। विधुना निचिक्युः। नान्यं चिक्युर्न निचिक्युरन्यम्। लिट्युसि रूपम्।

न भवति—अग्निर्ज्योतिर्निचायः॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः ॥ ३६ ॥

'छन्दसि' इति वर्त्तते। अपस्पृधेथामिति—'स्पर्ध सङ्घर्षे' इत्यस्य लङि आथामि द्विर्वचनं रेफस्य सम्प्रसारणमकारलोपश्च निपातनात्।

पदमञ्जरी

स्येत्यनेन व्यधिकरणमिति। एतदेव स्फोरयति—*अभ्यस्तस्य यो ह्वयतिरिति*। तेन किं सिद्धं भवति? इत्याह-*तेनेति*॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः॥ *अपर आहेति*। कस्याञ्चिच्छाखायामपस्पृधेथामित्याद्युदात्तं पठ्यते, अन्यस्यां तु पदद्वयम्, उभयमप्यनेन निपातनेन संगृह्यते। तत्रैकपद्ये 'तिङ्ङतिङः' इति निघातः

न्यासः

किं सिद्धं भवति? इत्याह—तेनेत्यादि। जुहावेति। सम्प्रसारणे वृद्ध्यावादेशयोः स्थानिवद्भावेन हु इत्यस्य द्विर्वचनम्॥

बहुलं छन्दसि॥ **चायः की**॥ निचिक्युरिति। 'एरनेकाचः' इत्यादिना यणादेशः। निचाय्येति। ल्यबन्तमेतत्। दीर्घोच्चारणं चिकीवानित्यत्र दीर्घस्य श्रवणार्थम्। इदं क्वसौ रूपम्॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताः श्रितमाशीराशीर्त्ताः॥ अकारलोपश्चेति। धातोरवयवो योऽकारस्तस्य निपातनाल्लोपः। अपास्पर्द्धेथामिति। अपाकारस्य 'आटश्च' इति सवर्णदीर्घत्वम्।

Indira Gandhi National Centre for the Arts

इन्द्रश्च विष्णो यदपस्पृधेथाम् । अस्पर्धेथामिति भाषायाम् । अपर आह—स्पर्धेरपपूर्वस्य लङ्याथामि सम्प्रसारणमकारलोपश्च निपातनात् । 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडागमाभावः । अत्र प्रत्युदाहरणमपास्पर्द्धेथामिति भाषायाम् ।

आनृचुः, आनृहुरिति । 'अर्च पूजायाम्', 'अर्ह पूजायाम्' इत्यनयोर्धात्वोर्लिट्युसि सम्प्रसारणमकारलोपश्च निपातनात् । ततो द्विर्वचनम्, उरदत्वम्, 'अत आदेः' इति दीर्घत्वम् । 'तस्मान्नुड् द्विहलः' इति नुडागमः । यन्म्रा अर्कमानृचुः । न वसून्यानृहुः । आनर्चुः, आनर्हुरिति भाषायाम् ।

चिच्युषे । 'च्युङ् गतौ' इत्यस्य धातोर्लिटि सेशब्देऽभ्यासस्यसम्प्रसारणमनिट् च निपातनात् । चिच्युषे । चुच्युविष इति भाषायाम् ॥

तित्याज । 'त्यज हानौ'–इत्यस्य धातोर्लिटयभ्यासस्य सम्प्रसारणं निपात्यते । तित्याज । तत्याजेति भाषायाम् ।

श्राता इति । 'श्रीञ् पाके' इत्येतस्य धातोर्निष्ठायां श्राभावः । श्रातास्त इन्द्रसोमाः ।

श्रितमिति । तस्यैव श्रीणातेर्ह्रस्वत्वम् । सोमो गौरी अधिश्रितः । श्रिता नो गृहाः । अनयोः श्राभावश्रिभावयोर्विषयविभागमिच्छन्ति । सोमेषु बहुषु श्राभाव एव । अन्यत्र श्रिभाव इति । सोमादन्यत्र क्वचिदेकस्मिन्नपि श्राभावो दृश्यते । यदि श्रातो जुहोतन । तस्य श्राता इति बहुवचनस्याविवक्षितत्वादुपसंग्रहो द्रष्टव्यः ।

पदमञ्जरी

प्राप्तः, 'यद्वृत्तान्नित्यम्' इति प्रतिषिद्धः । तत्राट्स्वरेणाद्युदात्तं पदं भवति । यदा तु द्वे पदे, तदा निघातप्रतिषेधे 'तास्यनुदात्तेत्' इति लसार्वधातुकानुदात्तत्वे धातुस्वरेण स्पृधेथामिति पदमाद्युदात्तम्, 'तिङि चोदात्तवति' इत्यपशब्दस्य निघातः ।

बहुवचनस्याविवक्षितत्वादिति । सोमस्यैव बहुत्वे श्राभाव इति नियमाना-

न्यासः

विषयविभागमिच्छन्तीति । स च निपातनसामर्थ्याल्लभ्यत इति वेदितव्यम् । यदि क्वचिदप्येकस्मिन् श्राभावो दृश्यते, तदर्थं तर्हि यत्नान्तरमास्थेयम् । न हि श्राता इत्यनेनैतदपि सिध्यति; सूत्रे बहुवचननिर्देशात् । अत आह—तस्येत्यादि ॥

Indira Gandhi National Centre for the Arts

आशीराशीर्त्त इति । तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठायां च शीरादेशः, निष्ठायाश्च नत्वाभावो निपातनात् । तामाशीरा दुह्न्ति । आशीर्त्त ऊर्जम् । क्षीरैर्मध्यत आशीर्त्तः ॥

न सम्प्रसारणे सम्प्रसारणम् ॥ ३७ ॥

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति । व्यधः । विद्धः । व्यच–विचितः । व्येञ्–संवीतः ।

पदमञ्जरी

श्रयणाच्च, अन्यथा बहुत्वाविवक्षायामपि सोमादन्यत्र श्राभावो न स्याद् विषयविभागवादिनाम् ॥

न सम्प्रसारणे सम्प्रसारणम् ॥ येषां सम्प्रसारणं विहितं तेषां यावन्तो यणस्तेषां सर्वेषां सम्प्रसारणे प्राप्ते प्रतिषेधोऽयमुच्यते । ननु चालोन्त्यपरिभाषयान्त्यस्यैव भविष्यति ? नानया परिभाषया शक्यमिहोपस्थातुम्, वच्यादीनामन्त्यस्य यणोऽसम्भवात् । 'अनन्त्यविकारेऽन्त्यसदेशस्य' इत्यनया परिभाषया तर्हि अन्त्यसदेशस्यैव भविष्यति, नेतरस्य ? नैषास्ति परिभाषा; प्रयोजनाभावात् । एतच्चास्माभिः *परिभाषाप्रकरणाख्ये* ग्रन्थे उपपादितम् ।

एवं तर्हि ज्ञापकात्सिद्धम्, यदयं प्यायः पीभावं शास्ति, तज्ज्ञापयति–न सर्वस्य यणः सम्प्रसारणं भवतीति । यदि स्यात्, प्यायः सम्प्रसारणमेव विदध्यात् । द्वयोर्यकारयोः सम्प्रसारणे पूर्वत्वे च 'हलः' इति दीर्घत्वे च सिद्धं स्यात्–पीनं मुखमिति । ननु च प्यायोऽन्त्य यणः सम्भवात्तस्यैव स्यात् ? स्यादेवं यदि 'प्यायः' इति स्थानषष्ठी विज्ञायेत, अवयवषष्ठी चैषा विज्ञास्यते–प्यायो यो यण् तस्येति । एवमप्येतावदेवानेन ज्ञाप्यते–न सर्वस्य यणः सम्प्रसारणं भवतीति, तत्र कुत एतत्—परस्यैव भवति न पूर्वस्येति, न च विध्यतीत्यादिनिर्देशात्परस्यैवेति शक्यमवगन्तुम् ? पर्यायेण प्रवृत्तावपि तदुपपत्तेः । तस्मादारभ्यमेवैतत् ।

न्यासः

न सम्प्रसारणे सम्प्रसारणम् ॥ येषां सम्प्रसारणमुक्तं तेषां यावन्तो यणः सम्भवन्ति तेषां सर्वेषां सम्प्रसारणं प्राप्तमिति प्रतिषेधोऽयमारभ्यते । ननु चालोऽन्त्यपरिभाषयाऽन्त्यस्यैव भविष्यति, नानन्त्यस्य ? नैतदस्ति; न ह्यनया परिभाषया शक्यमिहोपस्थातुम् । वचिस्वपियजादीनामन्त्यस्य यणोऽसम्भवात् । एवं तर्हि 'अनन्त्यविकारेऽन्त्यसदेशस्य' इत्यन्त्यसदेशस्य कार्यं भविष्यति—अन्त्यसदेशो यो यण् तस्यैव कार्यं भविष्यति, नेतरस्य ? नैषास्ति परिभाषा; प्रयोजनाभावात् । यदाह–तस्याः परिभाषाया न सन्ति प्रयोजनानीति । तस्मात् कर्त्तव्यमेतत् सूत्रम् ।

Indira Gandhi National Centre for the Arts

एकयोगलक्षणमपि सम्प्रसारणमत एव वचनात्प्रथमं परस्य यणः क्रियते। पूर्वस्य च प्रसक्तं प्रतिषिध्यते।

सम्प्रसारणमिति वर्त्तमाने पुनः सम्प्रसारणग्रहणं विदेशस्थस्यापि सम्प्रसारणस्य प्रतिषेधो यथा स्यादिति, 'श्वयुवमघोनामतद्धिते'—यूनः, यूना।

पदमञ्जरी

ननु पूर्वपरयोर्यणोरेकयोगलक्षणं सम्प्रसारणं तद्यदि परस्याभिनिर्वृत्तं पूर्वस्याप्यभिनिर्वृत्तमेव, न चाभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या विज्ञातुम्, यो हि भुक्तवन्तं ब्रूयाद् मा भुंक्था इति, किं तेन कृतं स्यात्! अथ पूर्वस्यानभिनिर्वृत्तं परस्याप्यनभिनिर्वृत्तमेव, तत्र निमित्तत्वेनाश्रयणमनुपपन्नम्? इत्यत आह—*एकयोगलक्षणमपीति*। अपरः कल्पः—अस्तु द्वयोरप्यभिनिर्वृत्तम्, कथं तर्हि प्रतिषिद्ध्यते? न सम्प्रसारणं प्रतिषिद्ध्यते, किं तर्हि? तदाश्रयं पूर्वत्वम्। तदेव त्वत्र सम्प्रसारणशब्देनोपचारादुच्यते, तस्मिन्प्रतिषिद्धे यणादेशेन सिद्धमिष्टम्। अस्तु वा द्वयोरप्यनभिनिर्वृत्तम्। कथं तर्हि निमित्तत्वम्? नैवात्र सम्प्रसारणनिमित्तम्, किं तर्हि? तद्भावी यो यण् स एव च सप्तम्यन्तेन सम्प्रसारणशब्देनोच्यत इति।

पुनः सम्प्रसारणग्रहणमिति। असति तस्मिन्, 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति पूर्वप्रकरणविहितस्यैव सम्प्रसारणस्य प्रतिषेधः स्यान्न विदेशस्थस्य। विभिन्नो देशः=विदेशः।

न्यासः

ननु च पूर्वपरयोरेकयोगलक्षणं सम्प्रसारणम्, ततो यदि तत् परस्याभिनिर्वृत्तं तदा पूर्वस्याप्यभिनिर्वृत्तमेव[1], न चाभिनिर्वृत्तस्य निवृत्तिः शक्यते कर्तुम्, नाप्यनभिनिर्वृत्तस्य निमित्तत्वेनाश्रयणं युज्यते, ततोऽस्मादेव प्रतिषेधवचनात् तत् परस्य तावत् क्रियते; तत्र कृते तु पूर्वस्यापि प्राप्तं प्रतिषिध्यते। अथ सम्प्रसारणमित्यनुवर्त्तमाने पुनः सम्प्रसारणग्रहणं किमर्थम्? इत्याह—**सम्प्रसारणमित्यादि**। असति पुनः संप्रसारणग्रहणे 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति प्रकृतस्यैव सम्प्रसारणस्य प्रतिषेधः स्यात्, न विदेशस्थस्य। तस्माद् विदेशस्थस्यापि भिन्नप्रकरणविहितस्य प्रतिषेधो

---

१. अतः परम्—"न चाभिनिर्वृत्तस्य प्रतिषेधः शक्यते कर्तुम्, यो हि भुक्तवन्तं ब्रूयान् मा भुंक्था इति किं तेन कृतं स्यात्! अथ पूर्वस्याभिनिर्वृत्तम् परस्याप्यभिनिर्वृत्तमेव। एवं सत्यसतः प्रतिषेधं प्रति निमित्तत्वेनाश्रयो नोपपद्यत इत्याह—एकयोगलक्षणेत्यादि। यदि युगपद् द्वयोरपि स्यादिदं वचनमनर्थकं स्यात्"—इत्यधिको महीशूरसंस्करणे पाठः।

Indira Gandhi National Centre for the Arts

आशोराशीर्त्त इति । तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठायां च शीरादेशः, निष्ठायाश्च नत्वाभावो निपातनात् । तामाशीरा दुह्न्ति । आशीर्त्तं ऊर्जम् । क्षीरैर्मध्यत आशीर्त्तः ॥

न सम्प्रसारणे सम्प्रसारणम् ॥ ३७ ॥

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न भवति । व्यधः । विद्धः । व्यच–विचितः । व्येञ्–संवीतः ।

पदमञ्जरी

श्रयणाच्च, अन्यथा बहुत्वाविवक्षायामपि सोमादन्यत्र श्राभावो न स्याद् विषयविभागवादिनाम् ॥

न सम्प्रसारणे सम्प्रसारणम् ॥ येषां सम्प्रसारणं विहितं तेषां यावन्तो यणस्तेषां सर्वेषां सम्प्रसारणे प्राप्ते प्रतिषेधोऽयमुच्यते । ननु चालोन्त्यपरिभाषयान्त्यस्यैव भविष्यति ? नानया परिभाषया शक्यमिहोपस्थातुम्, वच्यादीनामन्त्यस्य यणोऽसम्भवात् । 'अनन्त्यविकारेऽन्त्यसदेशस्य' इत्यनया परिभाषया तर्हि अन्त्यसदेशस्यैव भविष्यति, नेतरस्य ? नैषास्ति परिभाषा; प्रयोजनाभावात् । एतच्चास्माभिः *परिभाषाप्रकरणाख्ये* ग्रन्थे उपपादितम् ।

एवं तर्हि ज्ञापकात्सिद्धम्, यदयं प्यायः पीभावं शास्ति, तज्ज्ञापयति-न सर्वस्य यणः सम्प्रसारणं भवतीति । यदि स्यात्, प्यायः सम्प्रसारणमेव विदध्यात् । द्वयोर्यकारयोः सम्प्रसारणे पूर्वत्वे च 'हलः' इति दीर्घत्वे च सिद्धं स्यात्–पीनं मुखमिति । ननु च प्यायोऽन्त्य यणः सम्भवात्तस्यैव स्यात् ? स्यादेवं यदि 'प्यायः' इति स्थानषष्ठी विज्ञायेत, अवयवषष्ठी चैषा विज्ञास्यते–प्यायो यो यण् तस्येति । एवमप्येतावदेवानेन ज्ञाप्यते–न सर्वस्य यणः सम्प्रसारणं भवतीति, तत्र कुत एतत्—परस्यैव भवति न पूर्वस्येति, न च विध्यतीत्यादिनिर्देशात्परस्यैवेति शक्यमवगन्तुम् ? पर्यायेण प्रवृत्तावपि तदुपपत्तेः । तस्मादारभ्यमेवैतत् ।

न्यासः

न सम्प्रसारणे सम्प्रसारणम् ॥ येषां सम्प्रसारणमुक्तं तेषां यावन्तो यणः सम्भवन्ति तेषां सर्वेषां सम्प्रसारणं प्राप्तमिति प्रतिषेधोऽयमारभ्यते । ननु चालोऽन्त्यपरिभाषयाऽन्त्यस्यैव भविष्यति, नानन्त्यस्य ? नैतदस्ति; न ह्यनया परिभाषया शक्यमिहोपस्थातुम् । वचिस्वपियजादीनामन्त्यस्य यणोऽसम्भवात् । एवं तर्हि 'अनन्त्यविकारेऽन्त्यसदेशस्य' इत्यन्त्यसदेशस्य कार्यं भविष्यति—अन्त्यसदेशो यो यण् तस्यैव कार्यं भविष्यति, नेतरस्य ? नैषास्ति परिभाषा; प्रयोजनाभावात् । यदाह–तस्याः परिभाषाया न सन्ति प्रयोजनानीति । तस्मात् कर्त्तव्यमेतत् सूत्रम् ।

Indira Gandhi National Centre for the Arts

एकयोगलक्षणमपि सम्प्रसारणमत एव वचनात्प्रथमं परस्य यणः क्रियते। पूर्वस्य च प्रसक्तं प्रतिषिध्यते।

सम्प्रसारणमिति वर्त्तमाने पुनः सम्प्रसारणग्रहणं विदेशस्थस्यापि सम्प्रसारणस्य प्रतिषेधो यथा स्यादिति, 'श्वयुवमघोनामतद्धिते'— यूनः, यूना।

पदमञ्जरी

ननु पूर्वपरयोर्यणोरेकयोगलक्षणं सम्प्रसारणं तद्यदि परस्याभिनिर्वृत्तं पूर्वस्याप्यभिनिर्वृत्तमेव, न चाभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः शक्या विज्ञातुम्, यो हि भुक्तवन्तं ब्रूयाद् मा भुंक्था इति, किं तेन कृतं स्यात्! अथ पूर्वस्यानभिनिर्वृत्तं परस्याप्यनभिनिर्वृत्तमेव, तत्र निमित्तत्वेनाश्रयणमनुपपन्नम्? इत्यत आह–*एकयोगलक्षणमपीति*। अपरः कल्पः—अस्तु द्वयोरप्यभिनिर्वृत्तम्, कथं तर्हि प्रतिषिद्धयते? न सम्प्रसारणं प्रतिषिद्धयते, किं तर्हि? तदाश्रयं पूर्वत्वम्। तदेव त्वत्र सम्प्रसारणशब्देनोपचाराढुच्यते, तस्मिन्प्रतिषिद्धे यणादेशेन सिद्धमिष्टम्। अस्तु वा द्वयोरप्यनभिनिर्वृत्तम्। कथं तर्हि निमित्तत्वम्? नैवात्र सम्प्रसारणनिमित्तम्, किं तर्हि? तद्भावी यो यण् स एव च सप्तम्यन्तेन सम्प्रसारणशब्देनोच्यत इति।

पुनः सम्प्रसारणग्रहणमिति। असति तस्मिन्, 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति पूर्वप्रकरणविहितस्यैव सम्प्रसारणस्य प्रतिषेधः स्यान्न विदेशस्थस्य। विभिन्नो देशः=विदेशः।

न्यासः

ननु च पूर्वपरयोरेकयोगलक्षणं सम्प्रसारणम्, ततो यदि तत् परस्याभिनिर्वृत्तं तदा पूर्वस्याप्यभिनिर्वृत्तमेव[1], न चाभिनिर्वृत्तस्य निवृत्तिः शक्यते कर्तुम्, नाप्यनभिनिर्वृत्तस्य निमित्तत्वेनाश्रयणं युज्यते, ततोऽस्मादेव प्रतिषेधवचनात् तत् परस्य तावत् क्रियते; तत्र कृते तु पूर्वस्यापि प्राप्तं प्रतिषिध्यते। अथ सम्प्रसारणमित्यनुवर्त्तमाने पुनः सम्प्रसारणग्रहणं किमर्थम्? इत्याह–सम्प्रसारणमित्यादि। असति पुनः संप्रसारणग्रहणे 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति प्रकृतस्यैव सम्प्रसारणस्य प्रतिषेधः स्यात्, न विदेशस्थस्य। तस्माद् विदेशस्थस्यापि भिन्नप्रकरणविहितस्य प्रतिषेधो

1. अतः परम्—"न चाभिनिर्वृत्तस्य प्रतिषेधः शक्यते कर्तुम्, यो हि भुक्तवन्तं ब्रूयान् मा भुंक्था इति किं तेन कृतं स्यात्! अथ पूर्वस्याभिनिर्वृत्तम् परस्याप्यभिनिर्वृत्तमेव। एवं सत्यसतः प्रतिषेधं प्रति निमित्तत्वेनाश्रयो नोपपद्यत इत्याह–एकयोगलक्षणेत्यादि। यदि युगपद् द्वयोरपि स्यादिदं वचनमनर्थकं स्यात्"–इत्यधिको महीशूरसंस्करणे पाठः।

Indira Gandhi National Centre for the Arts

सम्प्रसारणग्रहणसामर्थ्यादेव पूर्वस्य प्रतिषेधे वक्तव्ये सवर्णदीर्घत्वमेकादेशो न स्थानिवद्भवति। सति वा स्थानिवत्वे व्यवधानमेतावदाश्रयिष्यते ॥

❀ ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि ❀। ऋचि परतस्त्रेः सम्प्रसारणं भवति, उत्तरपदादिलोपश्च छन्दसि विषये। तिस्र ऋचो यस्मिन् तत् तृचं सूक्तम्, तृचं साम। 'ऋक्पूरब्धूःपथामानक्षे' इति समासान्तः। छन्दसीति किम्? त्र्यृचं कर्म ॥

पदमञ्जरी

सम्प्रसारणग्रहणादेवेति। इह तु 'व्यथो लिटि' विव्यथे इति हलादिःशेषापवादः सम्प्रसारणम्, प्रकरणादुत्सर्गदेशश्चापवादो भवतीति परस्यैव संप्रसारणात्सिद्धम्। अत एव पुनः संप्रसारणाद्विदेशस्थेपि संप्रसारणे प्रतिषेध इतीष्टव्यम्, अन्यथा तत्रेति वाच्यं स्यात्। *व्यवधानमेतावदाश्रयिष्यत इति।* तेनोपपूर्वाद्वसेः 'भाषायां सदवसश्रुवः' इति लिटः क्वसौ विभक्तौ च परतो वसोस्सम्प्रसारणे उपेयुषेत्यादौ धातोः प्राप्तस्य यजादिलक्षणस्य संप्रसारणस्य प्रतिषेधो न भवति, प्रत्यक्षेण षकारेण व्यवधानादिति भावः। यदि तु व्यवधानमात्रे स्यात्, तदा समानाङ्गग्रहणं कर्त्तव्यम्। निमित्तनिमित्तिनौ यत्रैकस्मिन्नेवाङ्गे भवतः, तत्र प्रतिषेधो भवतीति वक्तव्यम्। उपेयुषीत्यत्र क्वसौ धातुरङ्गम्, क्वस्वन्तं च विभक्ताविति प्रतिषेधाभावः। अन्तरङ्गत्वाद्वाऽत्र पूर्वमेव धातोः सम्प्रसारणम्।

ऋचि त्रेरिति। *कल्पसूत्रकारास्तु* द्विशब्दस्यापि सम्प्रसारणं प्रयुञ्जते—'तृचाः प्रतिपदनुचराः', 'द्व्र्चाः प्रगाथाः' इति ॥

न्यासः

यथा स्यादित्येवमर्थं पुनः सम्प्रसारणग्रहणम्। यूनो यूनेति। सम्प्रसारणे कृते परपूर्वत्वे कृते च 'अकः सवर्णे दीर्घः'। ननु च क्रियमाणेऽपि पुनः सम्प्रसारणग्रहणे तत्र प्रतिषेधो न स्यात्, सवर्णदीर्घत्वस्य पूर्वविधौ स्थानिवद्भावे सत्युकारव्यवहितत्वात्? अत आह—**सम्प्रसारणग्रहणसामर्थ्यादेवेत्यादि**। यदि स्थानिवद्भावः स्यात्, अनर्थकं पुनः सम्प्रसारणग्रहणं स्यादित्यभिप्रायः। अभ्युपेत्य पुनः परिहारान्तरमाह—**सति वेत्यादि**। सम्प्रसारणग्रहणसामर्थ्यादेवात्राश्रूयमाणोऽपि शास्त्रान्तरेण स्थानिवद्भावमापन्नो योऽज् व्यवधानं करोति, तन्मात्रेण व्यवधानं नाश्रयिष्यते—मा भूत् सम्प्रसारणग्रहणमनर्थकमिति। ननु च 'यूनश्च कुत्सायाम्', 'वृद्धो यूना' इति निपातनादेव यूनः, यूनेत्यत्र सम्प्रसारणं न भविष्यति, तत् किमेतन्निवृत्त्यर्थेन पुनः संप्रसारणग्रहणेन? नैतदस्ति; अबाधकान्यपि निपातनानि भवन्तीत्युक्तम्। अपि चैतद्विषयमेव निपातनं विज्ञायते,

Indira Gandhi National Centre for the Arts

❀ रयेर्मतौ बहुलम् ❀। रयिशब्दस्य छन्दसि विषये मतौ परतो बहुलं सम्प्रसारणं भवति। आ रेवानेतु नो विशः। न च भवति—रयिमान्पुष्टिवर्धनः॥

लिटि वयो यः॥ ३८॥

'न सम्प्रसारणम्' इत्यनुवर्तते। लिटि परतो वयो यकारस्य सम्प्रसारणं न भवति। उवाय। ऊयतुः। ऊयुः।

लिड्ग्रहणमुत्तरार्थम्॥

वश्चास्यान्यतरस्यां किति॥ ३९॥

अस्य वयो यकारस्य किति लिटि परतो वकारादेशो भवत्यन्यतरस्याम्। ऊवतुः। ऊवुः। ऊयतुः। ऊयुः।

पदमञ्जरी

लिटि वयो यः॥ लिड्ग्रहणमुत्तरार्थमिति। नेहार्थं लिटः; अन्यत्र वयादेशस्यासम्भवात्॥

वश्चास्यान्यतरस्यां किति॥ अस्यग्रहणेन वयो यकारः प्रतिनिर्दिश्यते, अन्यथादेशाकारस्योच्चारणार्थत्वे प्रमाणाभावाद्वय एवायं सर्वादेशः सम्भाव्येत। अस्यग्रहणे तु सति यद्यप्यकारवानादेशः, तथाप्यतो लोपेन सिद्धमिष्टम्।

वश्चास्यग्रहणं शक्यमकर्त्तुम्। कथम्? 'अन्यतरस्यां किति वेञः' इति सूत्रं कर्तव्यम्, लिटीत्येव, किति लिटि परतो वेञः सम्प्रसारणं न भवत्यन्यतरस्याम्—ववतुः, ववुः; सम्प्रसारणपक्षे उवङादेशे सति द्विर्वचनम्, सवर्णदीर्घ-

न्यासः

तथा च—यूनः, यूना, यूनीत्यत्र सम्प्रसारणं स्यादेवेति। आरेवानिति। रयिरस्यास्तीति मतुप्। सम्प्रसारणे कृते 'आद्गुणः', 'छन्दसीरः' इति वत्वम्॥

लिटि वयो यः॥ वयेर्द्वौ यणौ, तत्र पूर्वेण वकारस्य सम्प्रसारणप्रतिषेधे प्राप्ते यकारस्यानेन सम्प्रसारणं लिटि प्रतिषिध्यते। तत्र प्रतिषिद्धे यकारः सम्प्रसारणभाग् न भवतीति वकारस्य सम्प्रसारणं भवति, धातोरभ्यासस्य च; तत्र धातोर्ग्रह्यादिसूत्रेण[1], अभ्यासस्य 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन। अथ किमर्थं लिड्ग्रहणम्, यावता वयेरादेशस्य लिटोऽन्यत्र सम्भवो नास्ति, तद्विधौ 'लिट्यन्यतरस्याम्' इत्यतो लिड्ग्रहणानुवृत्तेः, तत्सामर्थ्यादेव लिटि भविष्यति? इत्यत आह—लिड्ग्रहणमुत्तरार्थमिति। 'वेञः' इति प्रतिषेधो लिटि यथा स्यादित्येवमर्थं लिड्ग्रहणम्॥

---

१. 'वच्यादिसूत्रेण'—इति महीशूरसंस्करणे पाठः।

Indira Gandhi National Centre for the Arts

कितीति किम् ? उवाय । उवयिथ ॥

वेञः ॥ ४० ॥

'लिटि' इत्यनुवर्तते । 'वेञ् तन्तुसन्ताने' इत्यस्य धातोर्लिटि परतः सम्प्रसारणं न भवति । ववौ । ववतुः । ववुः । किति यजादित्वाद् धातोः प्राप्तमकित्यपि 'लिटचभ्यासस्योभयेषाम्' इत्यभ्यासस्यात उभयं प्रतिषिध्यते ॥

ल्यपि च ॥ ४१ ॥

'वेञः' इत्यनुवर्तते । ल्यपि च परतो व्येञः सम्प्रसारणं न भवति । प्रवाय । उपवाय ।

पृथग्योगकरणमुत्तरार्थम् ॥

ज्यश्च ॥ ४२ ॥

'ल्यपि' इत्येव । 'ज्या वयोहानौ' इत्यस्य धातोर्ल्यपि परतः सम्प्रसारणं न भवति । प्रज्याय । उपज्याय ॥

व्यश्च ॥ ४३ ॥

'ल्यपि' इत्येव । 'व्येञ् संवरणे' इत्येतस्य धातोर्ल्यपि परतः सम्प्रसारणं न भवति । प्रव्याय । उपव्याय । योगविभाग उत्तरार्थः ॥

विभाषा परेः ॥ ४४ ॥

'ल्यपि च', 'व्यश्च' इत्यनुवर्तते । परेरुत्तरस्य व्येञित्येतस्य धातोर्ल्यपि परतो विभाषा सम्प्रसारणं न भवति । परिवीय यूपम् । परिव्याय । सम्प्रसारणे कृते परपूर्वत्वे च 'ह्रस्वस्य' इति तुक् प्राप्नोति, स 'हलः' इति दीर्घत्वेन परत्वाद्बाध्यते ॥

पदमञ्जरी

त्वम्—ऊचतुः, ऊचुः; 'वेञो वयिः'—ऊयतुः, ऊयुरिति । कथं ववौ, वविथ ? 'ल्यपि च' इति चकारेण लिडनुकृष्यते, तत्पिति नित्यनिषेधार्थं भविष्यति ॥

ल्यपि च ॥ पूर्वं वश्चास्यग्रहणे क्रियमाणे 'ल्यपि व्यो ज्यश्च' इति एकयोग एव कर्त्तव्यः, एवं हि द्विश्चकारोऽपि न कर्त्तव्यो भवति ॥

न्यासः

वश्चास्यान्यतरस्यां किति ॥ वेञः ॥ ल्यपि च ॥ ज्यश्च ॥ व्यश्च ॥ योगविभाग उत्तरार्थ इति । उत्तरत्र व्येञ एव विभाषा सम्प्रसारणं यथा स्यात्, 'ज्या' इत्यस्य मा भूदित्येवमर्थो योगविभागः ॥

Indira Gandhi National Centre for the Arts

आदेच उपदेशेऽशिति ॥ ४५ ॥

'धातोः' इति वर्तते । एजन्तो यो धातुरुपदेशे तस्याकारादेशो भवति, शिति तु प्रत्यये न भवति । ग्लै–ग्लाता, ग्लातुम्, ग्लातव्यम् । शो–निशाता, निशातुम्, निशातव्यम् ।

एच इति किम् ? कर्त्ता, हर्त्ता । उपदेश इति किम् ? चेता, स्तोता । अशितीति किम् ? ग्लायति, म्लायति ।

पदमञ्जरी

आदेच उपदेशेऽशिति ॥ अत्र यदि 'धातोः' इति नानुवर्त्तेत, ततो विशेष्याभावादेव नास्ति तदन्तविधिरित्युपदेशे य एच् तस्यात्त्वमित्यर्थो भवति; ततश्च ढौकिता, त्रौकिता इत्यत्रापि प्राप्नोति । ननु चाशितीत्युच्यते, न चात्राशितं पश्यामः; न च ककार एवाशित्, किं कारणम् ? नञिवयुक्तन्यायेन शित्सदृशस्य प्रत्ययस्यैव ग्रहणात् ? स्यादेवं यद्यशितीति पर्युदासः स्यात्, प्रसज्यप्रतिषेधस्त्वयमिति वक्ष्यते । तस्माद्धातोरित्यनुवर्त्त्यमित्याह—*धातोरिति वर्त्तत इति* । तस्य चैचो विशेषणात्तदन्तविधिरित्याह—*एजन्तो यो धातुरिति* । *उपदेश इति* । अनिर्ज्ञातस्वरूपस्य स्वरूपज्ञापनार्थमाद्यमुच्चारणम्=उपदेशः ।

चेता, स्तोतेति । आर्धधातुके गुणविधानं त्वात्त्वार्थमेव स्यात्; यं विधिं प्रत्युपदेश इति न्यायात् । कर्त्ता, हर्त्ता इत्यादौ च गुणविधिश्चरितार्थः । एवमपि लाक्षणिकत्वादेवात्र न भविष्यति ? ज्ञापकाच्च; यदयं क्रीङ्जीनां णावात्त्वं शास्ति, तज्ज्ञापयति–न परनिमित्तस्यैच आत्त्वं भवतीति । नैतदस्ति ज्ञापकम्, नियमार्थमेतत् स्यात्—क्रीङ्जीनां णावेवेति । तर्त्तार्हि 'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्त्वं शास्ति ? एवं तर्ह्युत्तरार्थमवश्यं कर्त्तव्यमुपदेशग्रहणम्, तदिहैव क्रियते मन्दधियामनुग्रहाय ।

न्यासः

विभाषा परेः ॥ **आदेच उपदेशेऽशिति** ॥ **धातोरिति वर्त्तत इति** । 'लिटि धातोरनभ्यासस्य' इत्यतः, तस्य च धातोरेवैच इति विशेषणम्, विशेषणेन च तदन्तविधिर्भवतीत्याह–**एजन्तो यो धातुरिति** । **उपदेश इति** । आद्युच्चारणे गणपाठ इत्यर्थः । **चेता, स्तोतेति** । ननु च लक्षणप्रतिपदोक्तपरिभाषयैवात्र न भविष्यति, तत् किमुपदेशग्रहणेन ? एवं तर्हि उपदेशग्रहणमेतज् ज्ञापयति—अनित्यैषा परिभाषेति । एतेन 'अर्त्तिह्री' इत्यादिसूत्रे लाक्षणिकस्याप्याकारस्य ग्रहणे सति क्षापयतीत्यादावपि पुक् सिद्धो भवति । **श इद् यस्य सोऽयं शिदिति** । यश्च 'लिटस्तझयोरेशिरेच्' इत्येशादेशः स शिद् भवति, ततश्च शिति प्रतिषेधे क्रियमाण एश्यप्यात्त्वं न प्राप्नोति । अत्राया-

Indira Gandhi National Centre for the Arts

कथं जग्ले, मम्ले ? नैवं विज्ञायते—शकार इद्यस्य सोऽयं शिदिति, किं तर्हि ? श एव इत् शित्। तत्र 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति शिदादौ प्रत्यये प्रतिषेधः। एश् शकारान्तो भवति।

पदमञ्जरी

कथमिति। अशिदित्ययं बहुव्रीहिः, तत्र शिति प्रतिषेधे क्रियमाणे शिन्मात्रस्य प्राप्नोति, ततश्च जग्लाये इति भवितव्यमिति प्रश्नः। भावे लकारः, तत्पुरुषाश्रयेणोत्तरम्। कः पुनस्तत्पुरुषे सति गुणः ? इत्यत आह—*तत्रेति*। तत्पुरुषे हि वर्णग्रहणमिदं भवति, वर्णग्रहणे च तदादौ कार्यं भवति। स्तनन्धय इत्यत्र तु 'नासिकास्तनयोः' इति खशि कृते मध्यपातिनं शपमाश्रित्य प्रतिषेधः। प्रयोजनाभावादेवात्र न शपा भवितव्यमिति चेत् ? नन्विदमेव प्रयोजनं यदुतात्त्वनिवृत्तिः। *अशितीति*। यद्ययं पर्युदासः स्यात्—शितोऽन्योऽशित्, तस्मिन्नशितीति, ततो ग्लायन्ति, म्लायन्तीत्यत्र शबकारस्यान्त्याकारस्य चैकादेशे कृते तस्य परं प्रत्यादिवद्भावादस्ति शितोऽन्य इति कृत्वाऽऽत्त्वमत्र प्राप्नोति। प्रसज्यप्रतिषेधे तु न दोषः; एकादेशस्य पूर्वं प्रत्यन्तवद्भावात् शिद्ग्रहणेन ग्रहणात् शिति प्रतिषेध एव भवति। किं पुनः कारणमेकादेशविषय एव आत्त्वप्राप्तिश्चोद्यते, न पुनर्ग्लायतीत्यादावपि लकार एवाशिति परत आत्त्वं प्राप्नोतीति ? नैवं शक्यं चोदयितुम्; एवं ह्यशितीति प्रतिषेधो निर्विषयः स्यात्, न च 'पाघ्राध्माधेट्दृशः' इति धेटः शप्रत्ययोऽनन्यपूर्वो विषयः। न ह्येकमुदाहरणं शित्प्रतिषेधं प्रयोजयति। यद्येतावत् प्रयोजनं स्याद् 'अशे' इत्येव ब्रूयात्। यद्वा—अन्तरङ्गत्वान्नित्यत्वाच्च पूर्वं लस्य तिबादयः, पश्चाच्छप्, अनित्यं चात्त्वम्, तस्मादेकादेशविषय एव चोद्यते ? नैष दोषः; एकादेशस्य पूर्वविधौ स्थानिवद्भावेनादिशितोऽन्यस्य प्रत्ययस्याभवात्। इह तर्हि—सुग्लः, सुग्ला, सुग्लानमित्याकारान्तलक्षणाः काङ्चुचो न स्युः ? एषोऽप्यदोषः;

आत्त्वभाविन एजन्तादाकारान्तनिमित्तकः।
प्रत्ययो ज्ञाप्यते सर्वो ह्यामश्चेत्यणा पुनः॥

न्यासः

देशे कृते स्थानिवद्भावेन 'ग्लै' इत्यस्य द्विर्वचने 'जग्लाय' इत्यनिष्टं रूपं स्यात्—इति मन्यमान आह—कथमित्यादि। ग्लै इत्यादौ 'आतो लोप इटि च' इत्याकारलोपः। नैवमित्यादिना परिहारः। श एव इत् शिदिति विज्ञायमाने सत्यल्ग्रहणमेव भवति। तत्र 'यस्मिन् विधिस्तदादावल्ग्रहणे'—परिभाषया शिदादौ प्रत्यये प्रतिषेधेन भवितव्यम्, न चेश् शिदादिः, किं तर्हि ? शिदन्तः; शिदन्तस्यैवोच्चारणात्। तस्मादत्रेशि प्रतिषेधो न भवति। अशितीति पर्युदासो वा ? प्रसज्यप्रतिषेधो वा ? तत्र यदि

Indira Gandhi National Centre for the Arts

अशितीति प्रसज्यप्रतिषेधोऽयम्, तेनैतदात्त्वमनैमित्तिकं प्रागेव प्रत्ययोत्पत्तेर्भवतीति । सुग्लः, सुम्ल इति—'आतश्चोपसर्गे' इति कप्रत्ययः । सुग्लानः, सुम्लान इति—'आतो युच्' इत्येवमादि सिद्धं भवतीति ।

पदमञ्जरी

इह तर्हि ग्लै—ग्लानीयम्, पै—पानीयम्, अनीयरि कृते आत्त्वं च प्राप्नोति, आयादयश्च, परत्वादायादयः स्युः ? सत्यम्; कृतेषु तेष्वलोन्त्यस्यात्वे सवर्णदीर्घत्वे ग्लानीयमित्यादि सिद्धम् । नन्वायादिषु कृतेषु नायमेजन्तः, न च स्थानिवद्भावोऽलाश्रयत्वात् ? स्यादेतदेवं यदि सम्प्रति यदेजन्तं तस्यात्त्वं भवतीत्युच्येत, इह तूपदेशगतमेजन्तत्वं न सम्प्रतितनमिति नास्ति स्थानिवद्भावापेक्षा । नन्वेवमपि जग्लतुरित्यादौ यकारस्यात्वे कृते जग्ला+आ + अतुसिति स्थितेऽन्तरङ्गमप्याकारयोरेकादेशं बाधित्वा 'आतो लोप इटि च' इत्यातो लोपः स्यात्, न च पूर्वस्याकारस्य पुनर्लोपो लभ्यते, यकाराकारलोपस्य पूर्वविधौ स्थानिवद्भावात् 'असिद्धवदत्राभात्' इत्यसिद्धत्वाच्च ? नैष दोषः; समानाश्रये 'वार्णादाङ्गं बलीयः', इह तु व्याश्रयत्वादन्तरङ्ग एकादेशे सति पश्चादाल्लोप इति सिद्धमिष्टम् । एवमपि 'द्विर्वचनेऽचि' इत्यायादीनां स्थानिवत्वात् ग्लैशब्दस्य द्विर्वचनेऽभ्यासस्यैवर्णान्तता प्राप्नोति, पक्षान्तरे त्वनैमित्तिकत्वादात्वस्य द्विर्वचननिमित्तेऽच्यविहितत्वान्न दोषः ? पर्युदासपक्षेऽपि न दोषः, लिटि वयो यः' इति द्विलकारकोऽयं निर्देशः, तथानिर्देशस्य च तत्र प्रयोजनाभावादिहानुवृत्तं वाक्यभेदेन सम्बद्ध्यते—अशित्येच आत्वं भवति, लिटि तु लकारादौ लावस्थायामेवेति । ततश्चात्त्वस्य द्विर्वचननिमित्ताज्निमित्तत्वाभावात्तस्य तावन्न स्थानिवद्भावः । आयादयस्तु लिट्यप्राप्ता एव । तदेवं पर्युदासपक्षस्य बहुप्रतिविधेयत्वात्प्रसज्यप्रतिषेधोऽयमित्याह—*अशितीति प्रसज्यप्रतिषेधोऽयमिति* । तेन किं सिद्धं भवति ? इत्याह—*तेनैतदित्यादि* । *एवमादि सिद्धं भवतीति* । आदिशब्देन सुग्लेत्यत्र 'आतश्चोपसर्गे' इत्यङो ग्रहणम् । अन्यानि बहूनि प्रयोजनानि प्रागेवास्माभिर्दर्शितानि ।

इह कस्मान्न भवति–गोभ्याम्, नौभ्यामिति ? ज्ञापकात् । यदयम् 'रायो हलि' इत्यात्त्वं शास्ति, तज्ज्ञापयति–न प्रातिपदिकस्यात्त्वं भवतीति । नैतदस्ति ज्ञापकम्, नियमार्थमेतत्स्यात्—रायो हल्येव; 'औतोम्शसोः' इत्येत्तु गां पश्येत्यत्र, 'गोतो णित्' इति णित्त्वाद्वृद्धिः प्राप्नोति, गाः पश्येत्यत्र त्वशितीति

न्यासः

पर्युदासः, तदा शितोऽन्यदात्त्वनिमित्तमाश्रितं स्यात् । एवञ्च यावदात्त्वस्य निमित्तं न भवति, तावदात्त्वेन न भवितव्यमिति; अनाकारान्तत्वात् । 'सुग्लः' इत्यादावाकारान्तलक्षणः कप्रत्ययो न स्यादित्येतच्चेतसि कृत्वाऽऽह-अशितीत्यादि । तेन किं सिद्धं

Indira Gandhi National Centre for the Arts

आकाराधिकारस्त्वयम् 'नित्यं स्मयतेः' इति यावत् ॥

न व्यो लिटि ॥ ४६ ॥

'व्येञ्' इत्येतस्य धातोर्लिटि परत आकारादेशो न भवति। संविव्याय। संविव्ययिथ। 'लिटयभ्यासस्योभयेषाम्' इत्यभ्यासस्य सम्प्रसारणम्। णलि 'अचो ञ्णिति' इति वृद्धिः ॥

स्फुरतिस्फुलत्योर्घञि ॥ ४७ ॥

'आदेचः' इति वर्तते। 'स्फुर स्फुल चलने'–इत्येतयोर्धात्वोरेचः स्थाने घञि परत आकारादेशो भवति। विस्फारः। विस्फालः। विष्फारः। विष्फालः। 'स्फुरतिस्फुलत्योर्निर्निविभ्यः' इति वा षत्वम् ॥

पदमञ्जरी

प्रतिषेधः प्राप्नोतीति कृतं भवेदित्यज्ञापकम्? एवं तर्ह्युपदेश इत्युच्यते, न च गोनौशब्दयोरुपदेशोऽस्ति, यः 'गोपयसोर्यत्', 'नौवयोधर्म' इत्यादौ उच्चारणं नासावुपदेशः, किं तर्हि? उद्देशः, सिद्धवदुपादानात्। मा भूद् गौनौशब्दयोरुपदेशः, एचस्तूपदेशोऽस्ति—'गमेर्डोः', 'ग्लानुदिभ्यां डौः' इति, न च डोडावोर्विधानवैयर्थ्यम्, शसि चरितार्थत्वात्? एवं तर्हि 'धातोरिति वर्त्तते'—इत्युक्तत्वान्न भविष्यति ॥

न व्यो *लिटि* ॥ कित्त्वात्त्वे सत्यसति वा विशेषाभावात्पित्युदाहरणमेतस्य वृत्तिकारेण दर्शितम्। थलि 'इडत्यर्तिव्ययतीनाम्' इतीट ॥

न्यासः

भवति? इत्याह—तेनेत्यादि। प्रसज्यप्रतिषेधे ह्यात्त्वस्य शिति प्रतिषेधः क्रियते, न तु किञ्चिन्निमित्तमाश्रीयत इति तदनैमित्तिकं भवति। अतः प्रागेव प्रत्ययोत्पत्तेरात्त्वं भवतीत्याकारान्तलक्षणः प्रत्ययः सिध्यति, तेन 'सुम्लः' इत्यादि सिद्धं भवति। आदिशब्देन सुग्लः, सुग्ला—इत्यादेर्ग्रहणम्। तत्र हि स्त्रियाम् 'आतश्चोपसर्गे' इत्यङ् ॥

न व्यो लिटि ॥ 'व्येञ् संवरणे'। अथालिटीति कस्मान्न ज्ञायते, तुल्या हि संहिता? नैतदस्ति; यदि ह्येवं स्यात्, 'लिटि व्यः' इति नियम एव कृतः स्यात्—लिट्येवात्त्वम्, नान्यत्रेति। लक्ष्यस्थित्या च विपरीतनियमो भविष्यति। द्विवचनबहुवचनयोः सम्प्रसारणे पूर्वरूपत्व आत्त्वे च सत्यसति वा नास्ति विशेष इत्येकवचनान्तमुदाहृतम्। संविव्ययिथेति। थलि वलादिलक्षणस्येटः 'एकाचः' इत्यादिना प्रतिषेधः। पुनरपि क्रादिनियमार्थः प्राप्तः, सोऽपि 'अचस्तास्वत्' इत्यादिना प्रतिषिद्धः, पुनः 'ऋतो भारद्वाजस्य' इति नियमाद्विकल्पे प्राप्ते 'इडर्त्तिव्ययतीनाम्' इति नित्यं क्रियते ॥

स्फुरतिस्फुलत्योर्घञि ॥ विस्फारः, विस्फाल इति। भावे घञ्, 'हलश्च' इति करणाधिकरणयोर्वा ॥

Indira Gandhi National Centre for the Arts

क्रीङ्जीनां णौ ॥ ४७ ॥

'डुक्रीञ् द्रव्यविनिमये', इङ् अध्ययने', 'जि जये'—इत्येतेषां धातूनामेचः स्थाने णौ परत आकारादेशो भवति । क्रापयति । अध्यापयति । जापयति ॥

सिध्यतेरपारलौकिके ॥ ४६ ॥

'णौ' इति वर्तते । 'षिधु हिंसासंराद्धयोः'—इत्यस्य धातोरपारलौकिकेऽर्थे वर्तमानस्यैचः स्थानं णौ परत आकारादेशो भवति । अन्नं साधयति । ग्रामं साधयति ।

अपारलौकिक इति किम् ? तपस्तापसं सेधयति । स्वान्येवैनं कर्माणि सेधयन्ति । अत्र हि सिध्यतिः पारलौकिके ज्ञानविशेषे

पदमञ्जरी

क्रीङ्जीनां णौ ॥ यद्यपि करोतेः 'ईङ् गतौ' इत्येतस्य यणादेशे ङिति रूपं सम्भवति, तथापि 'एचः' इत्यधिकारात्करोतेस्तावद् ग्रहणं न सम्भवति । तथा ईङोऽपि ग्रहणं न भवति, ह्रस्वान्तेन परेण जयतिना साहचर्यात् ॥

सिध्यतेरपारलौकिके ॥ परलोकः प्रयोजनमस्य तत्पारलौकिकम् 'प्रयोजनम्'

न्यासः

क्रीङ्जीनां णौ ॥ 'डुक्रीञ् द्रव्यविनिमये', 'इङ् अध्ययने', 'जि जये' । अनुपदेशार्थ आरम्भः । क्रापयतीत्यादावात्त्वे कृते 'अर्त्तिह्री' इत्यादिना पुक् । किमर्थमिदमुच्यते, न 'क्नप कुत्सायां गतौ', 'जप जल्प व्यक्तायां वाचि', 'आप्लृ व्याप्तौ' इत्यस्य चाधिपूर्वस्य णिचि कृते क्रापयतीत्यादिकं रूपं सिद्धम्, अनेकार्थत्वाद् धातूनां क्रीणात्याद्यर्थे क्नपादयो वर्त्तिष्यन्ते ? उच्यते; क्रीणात्यादीनां णिचि प्रयोगान्तरनिवृत्त्यर्थम् । अथ करोतेः 'ईङ् गतौ' इत्यस्य ग्रहणं कस्मान्न विज्ञायते ? उच्यते; करोतेस्तावन्न सम्भवति, एच इत्यधिकारात् । अत एव वृत्तिकृता 'एचः' इत्यनुवर्त्तितम् । वचनसामर्थ्याद्वा तस्य हि वृद्धैयवात्त्वं सिद्धम् ? नैतदस्ति; नियमार्थं हि स्यात्—आत्त्वमेव, न पुना रपरत्वमिति ? नैतदस्ति; 'विधिनियमसम्भवे विधिरेव ज्यायान्' इति क्रीणातेरेव ग्रहणम्, न करोतेः; तस्य नियमार्थत्वात् । क्रीणातेस्तु विध्यर्थत्वात् । 'ईङ् गतौ' इत्यस्यापि ग्रहणं न सम्भवति; जयतिना ह्रस्वान्तेन साहचर्य्यात् । इङ् ह्रस्वान्तो ग्रहीष्यते, न दीर्घान्तः; शब्दपरविप्रतिषेधात् । जयतिना साहचर्य्यम्, न क्रीणातिना । व्याख्यानतो वा विशेषोऽवसेयः ॥

सिध्यतेरपारलौकिके ॥ अन्नं साधयतीति । अन्नं निष्पादयतीत्यर्थः । अत्र हि

Indira Gandhi National Centre for the Arts

वर्तते । तापसः सिध्यति=ज्ञानविशेषमासादयति, तं तपः प्रयुङ्क्ते । स च ज्ञानविशेष उत्पन्नः परलोके=जन्मान्तरे फलमभ्युदयलक्षणमुपसंहरन् परलोकप्रयोजनो भवति ।

इह कस्मान्न भवति ? अन्नं साधयति ब्राह्मणेभ्यो दास्यामीति । सिध्यतेरत्रार्थो निष्पत्तिः, तस्याः प्रयोजनमन्नम्, तस्य यद्दानं तत्पार-

पदमञ्जरी

इति ठक्, अनुशतिकादित्वादुभयपदवृद्धिः । *ज्ञानविशेषे वर्त्तत इति ।* हेयोपादेयतत्त्वावबोधः=ज्ञानविशेषः । *तापसः सिध्यतीति ।* हेयमुपादेयं च तत्त्वतो ज्ञातुकामः प्रवर्त्तत इत्यर्थः । तदाह—*ज्ञानविशेषमासादयतीति । तपः प्रयुङ्क्ते इति ।* ज्ञानविशेषवन्तं करोतीत्यर्थः । परलोक इत्यस्य विवरणम्—*जन्मान्तर इति ।* इह वा भवतु, स्वर्गादौ वा, शरीरान्तरोपलक्षणार्थं पारलौकिकग्रहणमिति । *उपसंहरन्निति ।* हेतौ शतृप्रत्ययः ।

इह कस्मादिति । ब्राह्मणेभ्यो दास्यामीत्यनेनाभिप्रायेणानुष्ठितो धात्वर्थः परलोकप्रयोजनो भवतीति प्रश्नः । *सिद्धयतेरर्थ इत्यादिना* ऐहलौकिकत्वं धात्वर्थस्य दर्शयति । *तस्य प्रयोजनमिति ।* तदुद्दिश्य प्रवृत्तत्वात् । *पुनः सिद्धिरेवेति ।* पारलौकिकीति लिङ्गविपरिणामेन सम्बन्धनीयम् । सिद्धिः=निष्पत्तिः । यस्यां सिद्धौ धातुर्वर्त्तते सा च पारलौकिकी न भवति, तस्मादात्त्वं

न्यासः

सिधिः पारलौकिकेऽर्थे ज्ञानविशेषे वर्त्तत इति । अस्यार्थम्—**तापसः सिध्यतीत्यादिना** स्पष्टीकरोति । **उपसंहरन्निति** । निष्पादयन्नित्यर्थः ।

इह कस्मान्न भवतीत्यादि । एवं मन्यते—ब्राह्मणेभ्यो दास्यामीत्यनेनाभिप्रायेण योऽन्नं साधयति स जन्मान्तरे भवन् फलमभ्युदयलक्षणं प्राप्नोति, तस्मात् पारलौकिकेऽर्थे सिधिरत्र वर्त्तत इति पर्युदासेन भवितव्यमिति । सिध्यतेरत्रार्थो निष्पत्तिरित्यादिनेहलोकार्थतां त्वस्य दर्शयति । **तस्याः प्रयोजनमन्नमिति** । अन्नमुद्दिश्य प्रवृत्तत्वात् । **तस्येति** अन्नस्य । **न पुनः सिद्धिरेवेतीति** । अर्थाल्लिङ्गविपरिणामं कृत्वा न पुनः सिद्धिरेव पारलौकिकीति सम्बन्धनीयम् । सिद्धिर्निष्पत्तिरित्यर्थः । इतिकरणो हेतौ । यस्मात् सिद्धौ धातुर्वर्त्तते । अत्र सिद्धिः पारलौकिकी न भवति, तस्मान्नात्रात्त्वं पर्युदस्यते । स्यादेतत्—यद्यपि साक्षाद् धातुः परलोकार्थो न भवति, पारम्पर्य्येण तु भवत्येव, तस्माद् भवितव्यमेव प्रतिषेधेन ? इत्याह—**साक्षादित्यादि** । यदि साक्षाद्व्यवधानेन परलोकार्थो यः सिध्यतेरर्थः, तत्रापि पारलौकिक इतीदं वचनं न कृतार्थं स्यात्, तदा पारम्पर्येणापि यः परलोकार्थस्तत्र व्याप्रियेत—मा भूद् वचनवैयर्थ्यमिति । इदं तु

लौकिकम्; न पुनः सिद्धिरेवेति न आत्वं पर्युदस्यते । साक्षात्परलोकप्रयोजने च सिध्यर्थे कृतावकाशं वचनमेवंविषयं नावगाहते ।

सिध्यतेरिति श्यना निर्देशः 'षिधु गत्याम्' इत्यस्य भौवादिकस्य निवृत्त्यर्थः ॥

मीनातिमिनोतिदीङां ल्यपि च ॥ ५० ॥

'आदेच उपदेशे' इति वर्तते । 'मीञ् हिंसायाम्', 'डुमिञ् प्रक्षेपणे', 'दीङ् क्षये'—इत्येतेषां धातूनां ल्यपि विषये चकारादेचश्च विषये उपदेश एव प्राक्प्रत्ययोत्पत्तेरलोऽन्त्यस्य स्थाने आकारादेशो भवति । प्रमाता, प्रमातव्यम्, प्रमातुम्, प्रमाय । निमाता, निमातुम्, निमातव्यम्, निमाय । उपदाता, उपदातव्यम्, उपदातुम्, उपदाय ।

पदमञ्जरी

न पर्युदस्यते । *साक्षादिति* । यदि साक्षादव्यवधानेन पारलौकिको यः सिद्धयतेरर्थस्तत्र पर्युदासो न चरितार्थः स्यात्तदा पारम्पर्याश्रयणम् । इदं तु साक्षात्परलोकार्थे ज्ञानविशेषे चरितार्थम्, अतो नैवंविधे विषये प्रवर्त्तते इत्यर्थः ॥

मीनातिमिनोतिदीङां ल्यपि च ॥ उपदेश एवात्त्वविधानाल्ल्यपः परत्वासम्भवाल्ल्यपीति विषयसप्तमीत्याह—*ल्यपि विषय इति* । *एचश्च इति* । यद्यपि प्रकृतिविशेषणं प्रागासीत्, तथापीहोपदेशाधिकारान्मीनात्यादीनां चोपदेश एजन्तत्वासम्भवात्सामर्थ्यादेव इत्येतदपि विषयविशेषणं विज्ञायत इत्याह—*एचश्च विषय इति* । यत्र प्रत्यये एज्भावी तस्मिन्बुद्धिस्थ इत्यर्थः । उपदेश एवेत्यस्य विवरणम्—*प्राक् प्रत्ययोत्पत्तेरिति* ।

न्यासः

ज्ञानविशेषे साक्षात् परलोकार्थे सिध्यत्यर्थे चरितार्थम्, ततो नोत्सहत एवंविधविषयमवगाहितुम् । न शक्नोत्येवम्प्रकारे विषये निषेधः प्रवर्त्तितुमित्यर्थः ।

अथ सिध्यतेः श्यना निर्देशः किमर्थः, न सिधेरित्येवोच्येत, एवं हि लघु सूत्रं भवति ? इत्याह–सिध्यतेरित्यादि ॥

मीनातिमिनोतिदीङां ल्यपि च ॥ उपदेश इत्यनुवृत्तेः प्रागेव प्रत्ययोत्पत्तेरात्त्वेन भवितव्यमिति, अत आत्त्वविधानकाले ल्यपः परत्वं न सम्भवतीति तस्माल्ल्यपीति विषयसप्तमीयं विज्ञायत इत्याह—**ल्यपि विषय इति** । एच इति यद्यपि प्रकृतविशेषणं प्रागासीत्, तथापीहोपदेशाधिकारान्मीनातिप्रभृतीनां चोपदेशावस्थायामेचोऽसम्भवात् सामर्थ्याद्विषयविशेषणं विज्ञायत इत्याह–**एचश्च विषय इति** । **उपदेश इत्यस्य प्रागित्यादिनार्थमाचष्टे** । **प्रमायेति** । 'समासेऽनञ्' इति ल्यप् ।

कः पुनरुपदेशावस्थायामेवात्त्वविधानेऽर्थः सम्पद्यते, यदर्थमुपदेशावस्थायामात्त्वं

Indira Gandhi National Centre for the Arts

उपदेश एवात्त्वविधानादिवर्णान्तलक्षणः प्रत्ययो न भवति, आकारान्तलक्षणश्च भवति—उपदायो वर्तते । ईषदुपदानमिति घञ्युचौ भावतः ॥

विभाषा लीयतेः ॥ ५१ ॥

'ल्यपि' इति वर्तते, 'आदेच उपदेशे' इति च । 'लीङ् श्लेषणे'—इति दिवादिः, 'लि श्लेषणे'—इति क्र्यादिः; तयोरुभयोरपि यका निर्देशः स्मर्यते । लीयतेर्धातोर्ल्यपि च एचश्च विषये उपदेश एवालोऽन्त्यस्य स्थाने विभाषा आकारादेशो भवति । विलाता, विलातुम्, विलाय, विलातव्यम् । विलेता, विलेतुम्, विलेतव्यम्, विलीय ।

पदमञ्जरी

उपदेश एवात्त्वविधाने योऽर्थः सम्पद्यते तं दर्शयति—*उपदेश एवात्त्वविधानादिति* । इवर्णान्तलक्षणः प्रत्यय एरच्, आकारान्तलक्षणस्तु घञ् । यद्यपि घञाकारान्तादिति नोच्यते, तथाप्यत्रात्त्वे सति भवति, असति तु न भवतीत्येतावता घञ आकारान्तलक्षणत्वम् । *उपदायो वर्त्तत इति* । घञि 'आतो युक् चिण्कृतोः' इति युक् । *ईषदुपदानमिति* खलर्थे 'आतो युच्' । मीनातिमिनोत्योस्तु खलघावेव भवतः; 'निमीमिलियां खलचोः प्रतिषेधः' इति वक्ष्यमाणत्वात् । अतो दीङेवोदाहृतः ॥

विभाषा लीयतेः ॥ तयोरुभयोरपि यकाऽयं निर्देशः क्रियते इति । यदि तु दैवादिकस्यैव श्यना निर्देशः क्रियेत, 'लीङः' इत्येव ब्रूयादिति भावः । श्तिपः शित्करणसामर्थ्याच्चाभावकर्मवाचित्वेऽपि यग् भवति, यथा—अकर्तृवाचित्व-

न्यासः

क्रियते ? इत्याह—**उपदेश एवेत्यादि** । इवर्णान्तलक्षणः 'एरच्' इत्यच्, आकारान्तलक्षणः 'आतो युच्' । **उपदाय इति** । उपदेश एवात्त्वे कृते सत्यचो निमित्तं विहतमित्युत्सर्ग एव 'भावे' इति घञ् सिद्धो भवति । 'आतो युक् चिण्कृतोः' इति युक् । **ईषदुपदानमिति** । उपदेशावस्थायामात्त्वे खलपवादो युच् सिद्धो भवति ॥

विभाषा लीयतेः ॥ तयोरुभयोरपि यका निर्देशः स्मर्यत इति । आचार्यैः । अथ दैवादिकस्यायं श्यना निर्देशः कस्मान्न विज्ञायते ? अत एव निर्देशात् । यदि दैवादिक एवात्र निर्देष्टुमभीष्टः स्यात्, अनुबन्धेन लीङ इति निर्देशं कुर्यात् । तस्मात् साधारणेनागन्तुकेन यकायमुभयोर्निर्देशः । **ईषत्प्रमय इति** । 'ईषद्दुःसुषु' इत्यादिना खल् । **निमयो वर्त्तत इति** । 'एरच्' इत्यच् ।

Indira Gandhi National Centre for the Arts

❀ निमीमिलियां खलचोः प्रतिषेधो वक्तव्यः ❀ । ईषत्प्रमयः । प्रमयो वर्तते । ईषन्निमयः निमयो वर्तते । ईषद्विलयः विलयो वर्तते । अत्र तु लियो व्यवस्थितविभाषाविज्ञानात्सिद्धम् ।

एवं च प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्वं भवति–कस्त्वामुल्लापयते, श्येनो वर्त्तिकामुल्लापयते ॥

खिदेश्छन्दसि ॥ ५२ ॥

'विभाषा' इति वर्त्तते । 'खिद दैन्ये' इत्यस्य धातोरेचः स्थाने छन्दसि विषये विभाषा आकार आदेशो भवति । चित्तं चिखाद । चित्तं चिखेद ।

छन्दसीति किम् ? चित्तं खेदयति ॥

अपगुरो णमुलि ॥ ५३ ॥

पदमञ्जरी

शबादयः—'भवतेरः' इत्यादौ । *खलचोरिति* । पचाद्यच एरचश्च सामान्येन ग्रहणम् । *एवं चेति* । व्यवस्थितविभाषाविज्ञानादेवेत्यर्थः । *उल्लापयत इति* । 'लियः सम्माननशालीनीकरणयोश्च' इत्यात्मनेपदम् ॥

खिदेश्छन्दसि ॥ *चखादेति* । व्यत्ययेन परस्मैपदम्, आत्त्वस्यानैमित्तिकत्वाद् 'द्विर्वचनेऽचि' इति स्थानिवत्त्वाभावादभ्यासस्येवर्णान्तता न भवति ।

अयं योगः शक्योऽवक्तुम् । कथम् ? खादेः–चखाद, खिदेः–चिखेदेति, अनेकार्थत्वाद्धातूनामर्थभेदोऽप्यकिञ्चित्करः ॥

अपगुरो णमुलि ॥ यदि गिरतिर्गुरेरर्थे वर्तते, तदायं योगः शक्योऽवक्तुम् । कथम् ? गिरेः–अपगारमपगारम्, गुरोः—अपगोरमपगोरम् ॥

न्यासः

अत्र तु लियो व्यवस्थितविभाषया विज्ञानात् सिद्धमिति । 'लियः' इत्युपलक्षणमात्रम्, इतरयोरपि सिद्ध एव; विभाषाग्रहणस्य पूर्वेणापि सूत्रेण सम्बन्धात् । व्यवस्थितविभाषाविज्ञानात् प्रलम्भनशालीनीकरणयोश्च णौ नित्यमात्त्वं भवति । व्यवस्थितविभाषाविज्ञानादेव । उल्लापयते, अपलापयत इति । 'लियः सम्माननशालीनीकरणयोः' इत्यात्मनेपदम् ॥

खिदेश्छन्दसि ॥ चिखादेति । 'पुगन्तलघूपधस्य' इति गुणे कृत आकारः ।

यदि खादिरपि खिदेरर्थे वर्त्तते, ततोऽयं योगः शक्योऽकर्तुम् ; खादेस्तु–चखादेति भविष्यति, खिदेस्तु–चिखेदेति ॥

अपगुरो णमुलि ॥ अपगारमपगारमिति । 'आभीक्ष्ण्ये द्वे भवतः' इति द्वित्वम् ॥

Indira Gandhi National Centre for the Arts

'गुरी उद्यमने'-इत्यस्य धातोरपपूर्वस्य णमुलि परत एचः स्थाने विभाषा आकार आदेशो भवति। अपगारमपगारम्। अपगोरमपगोरम्। 'आभीक्ष्ण्ये णमुल्च' इति णमुल्। अस्यपगारं युध्यन्ते, अस्यपगोरं युध्यन्त इत्यत्र 'द्वितीयायां च' इति णमुल्॥

चिस्फुरोर्णौ॥ ५४॥

'चिञ्', 'स्फुर'-इत्येतयोर्द्धात्वोर्णौ परत एचः स्थाने विभाषा आकारादेशो भवति। चापयति, चाययति। स्फारयति, स्फोरयति॥

प्रजने वीयतेः॥ ५५॥

'णौ' इति वर्तते। 'वी गतिप्रजनकान्त्यसनखादनेषु'-इत्यस्य धातोः प्रजने वर्तमानस्य णौ परतो विभाषा आकारादेशो भवति। पुरोवातो गाः प्रवापयति। पुरोवातो गाः प्रवाययति। गर्भं ग्राहयतीत्यर्थः।

प्रजनो हि जन्मन उपक्रमो गर्भग्रहणम्॥

बिभेतेर्हेतुभये॥ ५६॥

'णौ' इति वर्तते, 'विभाषा' इति च। हेतुरिह पारिभाषिकः स्वतन्त्रस्य प्रयोजकः, ततो यद्भयम्, स यस्य भयस्य साक्षाद्धेतुः,

पदमञ्जरी

प्रजने वियतेः॥ यदि वातिरप्रजनेऽपि वर्तते, तदा योगोऽयं शक्योऽकर्तुम्। कथम्? वातेः-प्रवापयति, वीयतेः-प्रवाययतीति। वीयतेरित्ययमपि यका निर्देशः स्मर्यते, वेतेरादादिकत्वेन श्यनोऽसम्भवात्। प्रयोजनं हि यका निर्देशस्य चिन्त्यम्। *जन्मन उपक्रम इति।* जनेर्भवे घञ्, प्रशब्द आदिकर्मणि। *गर्भग्रहणमिति।* गृहीतो हि गर्भो जायते, ततो गर्भग्रहणं जन्मन उपक्रमः।

बिभेतेर्हेतुभये॥ हेतुभयमिति। 'पञ्चमी भयेन' इति समासः, तदाह-*हेतोर्भयमिति।* किं पुनस्तत्? इत्याह-*स यस्य भयस्येति। स चात्त्वपक्षे न भवतीति।* एक-

न्यासः

चिस्फुरोर्णौ॥ 'क्रीङ्जीनां णौ' इत्यत्र प्रदेश इदं नोक्तम्; नित्यं मा भूदित्येवमर्थम्॥

प्रजने वीयतेः॥ यदि 'वा गतिगन्धनयोः' इत्ययं धातुः प्रजने वर्त्तते, ततः शक्यतेऽपि योगोऽवक्तुम्; वातेर्हि-वापयतीति भविष्यति, वीयतेस्तु-वाययतीति॥

बिभेतेर्हेतुभये॥ हेतुभय इति। 'पञ्चमी भयेन' इति पञ्चमीसमासोऽयमित्याह-**ततो यद्भयमिति।** किं पुनस्ततो भयम्? इत्याह-**स यस्य भयस्येत्यादि।** अथात्त्वपक्षे

Indira Gandhi National Centre for the Arts

तद्भयं हेतुभयम् । तत्र वर्तमानस्य 'ञिभी भये' इत्यस्य धातोर्णौ परतो विभाषा आकारादेशो भवति । मुण्डो भापयते, मुण्डो भीषयते । जटिलो भापयते, जटिलो भीषयते । 'भीस्म्योर्हेतुभये' इत्यात्मनेपदम्, 'भियो हेतुभये षुक्' । स चात्त्वपक्षे न भवति । लिभियोरीकारप्रश्लेषनिर्देशादीकारान्तस्य भियः षुग्विधीयते ।

हेतुभय इति किम् ? कुञ्चिकयैनं भाययति । अत्र हि कुञ्चिकातो भयं करणात्, न हेतोर्देवदत्तात् ॥

नित्यं स्मयतेः ॥ ५७ ॥

'णौ' इति वर्तते, 'हेतुभये' इति च । नित्यग्रहणात् 'विभाषा' इति निवृत्तम् । 'स्मिङ् ईषद्धसने'–इत्यस्य धातोर्हेतुभयेऽर्थे णौ परतो नित्यमाकारादेशो भवति । मुण्डो विस्मापयते । जटिलो विस्मापयते ।

भय इति किम् ? कुञ्चिकयैनं विस्मापयति । भयशब्देन हेत्वर्थसामान्यादिह स्मयतेरर्थोऽभिधीयते । न हि मुख्ये भये स्मयतेर्वृत्तिरस्ति ॥

पदमञ्जरी

देशविकृतस्यानन्यत्वात्प्राप्नोति, कुतो न भवति ? इत्याह–*लीभियोरीकारप्रश्लेषनिर्देशादिति* । 'लीलोर्नुग्लुकौ' इति लियो नुग्विधीयते, यश्च 'भियः षुक्'–तावुभावप्याकारान्तयोर्न भवतः, कुतः ? ली + ई भी + ई इति ईकारप्रश्लेषेणेकारान्तयोर्विधानात् । लीभियोः प्रश्लेषनिर्देशादिति वार्त्तिके सह पाठादिह लियो ग्रहणम् ॥

नित्यं स्मयतेः ॥ धात्वर्थसामान्यादिति । सामान्यम्=सादृश्यम्, धात्वर्थयोः

न्यासः

षुगागमः कस्मान्न भवति ? अस्ति ह्यत्रापि प्राप्तिः—'एकदेशविकृतमनन्यवद् भवति' इत्यत आह–**स चेत्यादि** । 'भियो हेतुभये षुक्' इत्यत्र हि भी + ई इति ईकारेण प्रश्लिष्टस्य निर्देशः कृतः–ईकारान्तस्यैव षुग् यथा स्यात्, आकारान्तस्य मा भूदिति । तथा लियो ग्रहणम्, तस्याप्यात्त्वपक्षे 'लीलोर्नुक्लुकावन्यतरस्यां स्नेहविपातने' इति नुग्न भवति । ईकारप्रश्लेषनिर्देशादेवेति प्रसङ्गेन व्युत्पादितम् ॥

नित्यं स्मयतेः ॥ भयशब्देन धात्वर्थसाम्यादित्यादि । यश्च बिभेतेरर्थो यश्च स्मयतेः, तौ द्वावपि सदृशौ; चित्तविकारस्वभावतया । द्वावपि तौ चित्तसंक्षोभलक्षणौ, अतो द्वयोरपि यत् सामान्यं तत् सादृश्यम् । तस्माद् भयशब्देनात्र स्मयतेरर्थोऽभिधीयते । दृश्यते हि सादृश्यादर्थान्तरेऽपि शब्दानां वृत्तिः, यथा–सिंहो माणवक इति । किं पुनः कारणमेवं व्याख्यायते ? इत्याह–**न हीत्यादि** । 'हेतुभये' इत्यनुवर्त्तते । उच्यते चेदं

Indira Gandhi National Centre for the Arts

सृजिदृशोर्झल्यमकिति ॥ ५८ ॥

'सृज विसर्गे', 'दृशिर् प्रेक्षणे'–इत्येतयोर्धात्वोर्झलादावकिति प्रत्यये परतोऽमागमो भवति। स्रष्टा, स्रष्टुम्, स्रष्टव्यम्। द्रष्टा, द्रष्टुम्, द्रष्टव्यम्। लघूपधगुणापवादोऽयममागमः। अस्राक्षीत्। अद्राक्षीत्। सिचि वृद्धिरमि कृते भवति, पूर्वं तु बाध्यते।

झलीति किम्? सर्जनम्। दर्शनम्। अकितीति किम्? सृष्टः। दृष्टः।

पदमञ्जरी

सामान्यं धात्वर्थसामान्यम्, द्वयोरपि धात्वोरर्थौ चित्तविकारस्वभावौ, तेन भयशब्देन स्मयतेरर्थोऽभिधीयते, 'क्रीङ्जीनां णौ' इत्यत्र स्मयतिर्नोक्तः, 'हेतुभये' इत्युपाधिं वक्ष्यामीति॥

सृजिदृशोर्झल्यमकिति ॥ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यं विज्ञायत इति प्रत्यय इह सन्निधापितो झला विशेष्यत इति तदादिविधिर्विज्ञायत इत्याह–*झलादाविति। अकिति प्रत्यये परत इति*। किति परतो न भवतीत्यर्थः। प्रसज्यप्रतिषेधो ह्ययमिष्यते, एतच्च गाङ्कुटादिसूत्रे सम्यगुपपादितम्। *लघूपधगुणापवादोऽयमिति*। अकितीति वचनान्नाप्राप्ते तस्मिन्नस्यारम्भात्। *सिचि वृद्धिस्त्वमि कृते भवतीति*। सिचि वृद्धिस्तु भवति, न बाध्यते; येन नाप्राप्त्यभावात्। साप्यमि कृते भवति। तस्यैव व्याख्या। *पूर्वं तु बाध्यत इति*। अमागमेन; नित्यत्वात्तस्य।

न्यासः

विशेषणम्। न च मुख्ये भये स्मयतेर्वृत्तिरस्ति। तत्र सामर्थ्यात् केनचित् सादृश्येन स्मयत्यर्थ एव भयशब्देनात्राभिधीयत इति विज्ञायते॥

सृजिदृशोर्झल्यमकिति ॥ **स्रष्टा, द्रष्टेति**। अमागमे कृते यणादेशः, व्रश्चादिसूत्रेण षत्वम्। **लघूपधगुणापवादोऽयमित्यादि**। ननु चासति सम्भवे बाधनं भवति, अस्ति च सम्भवो यदुभयं स्यादिति, तत्र गुणे कृतेऽमागमो भविष्यति? नैतदेवम्; सामान्यविहितो गुणः, विशेषविहितस्त्वमागमः, सामान्यविहितस्य च विशेषविहितो बाधको भवति, यथा–ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति। यथा सामान्यविहितस्य दधिदानस्य विशेषविहितं तक्रदानं बाधकं भवति, तथेहापि युक्तोऽमागमेन गुणस्य बाधा। **अस्राक्षीत्, अद्राक्षीदिति**। 'आदेशप्रत्यययोः' इति षत्वम्, 'अस्तिसिचोऽपृक्ते' इतीट्, 'वदव्रजहलन्तस्याचः' इति वृद्धिः, 'षढोः कः सि' इति कत्वम्। **वृद्धिरमि कृते भवतीति**। अथ प्रागेव वृद्धिः कस्मान्न भवति? इत्याह–**पूर्वन्तु बाध्यत इति**। यथैव हि विशेषविहितत्वादमागमेन सामान्यविहितो गुणो बाध्यते,

धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादिह न भवति—रज्जुसृड्भ्याम्, देवदृग्भ्यामिति ॥

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ॥ ५९ ॥

'उपदेशे' इति वर्तते, 'झल्यमकिति' इति च। उपदेशेऽनुदात्तस्य धातोर्ऋकारोपधस्य झलादावकिति प्रत्यये परतोऽन्यतरस्याममागमो भवति। त्रप्ता, तर्पिता, तर्प्ता। द्रप्ता, दर्पिता, दर्प्ता। 'तृप प्रीणने', 'दृप हर्षणमोचनयोः'—इत्येतौ रधादी धातू, तयोरिडागमः 'रधा-

पदमञ्जरी

रज्जुसृड्भ्याम्, देवदृग्भ्यामिति। उभयत्र व्रश्चादिसूत्रेण षत्वे जश्त्वमिति केचित्। अन्ये तु 'क्विन्प्रत्ययस्य कुः' इति कुत्वमिच्छन्ति। ननु न क्विन्नन्तावेतौ, किं तर्हि? क्विबन्तौ? नैष दोषः; यस्माद्धातोः क्वचित्क्विन् विहितः, तस्य प्रत्ययान्तरे कुत्वं भवति, 'क्विनः कु' इति वक्तव्ये प्रत्ययग्रहणादिति वक्ष्यते। पदान्तस्येत्यधिकारात् स्रष्टा, द्रष्टेत्यत्र न भवति, कुत्वविधावेव तस्य निर्णयं वक्ष्यामः॥

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्॥ उपदेश इति वर्त्तत इति। अनुदात्तस्य विशेषणार्थम्, तेन द्रप्तेत्यत्र तृनि विहिते यद्यपि नित्स्वरेण धातोरुदात्तत्वं भवति, तथापि उपदेशेऽनुदात्त इत्यम्भवति। वर्द्धेत्यत्र तृचि कृते यद्यपि शेषनिघातेन धातुरनुदात्तो भवति, तथाप्युपदेशे नायमनुदात्त इत्यम्न भवति। किमर्थं पुनरनुदात्तस्येत्युच्यते, नानिट इत्येवोच्येत, एवं हि सति लघु सूत्रं भवति? तत्राह—*तृप प्रीणन इत्यादि*। *इडागमो रधादिभ्यश्चेत्यनेन विकल्पित इति*। ततश्च पाक्षि-

न्यासः

तथा वृद्धिरपि सामान्यविहितैवामागमे कृते पश्चात् पुनःप्रसङ्गविज्ञानात् सिद्धमिति सापि भवति। गुणस्त्वमागमे कृते न भवति; निमित्तस्य विहतत्वात्। न ह्यमागमे कृत उपधा लघ्वी गुणभाविन्युपपद्यते।

अथेह कस्मान्न भवति—रज्जुसृड्भ्याम्, देवदृग्भ्यामिति; सत्यपि धात्वधिकारे 'क्विबन्ता धातुत्वं न जहति' इति भ्याम्प्रत्ययमकितमाश्रित्यामागमः प्राप्नोति? इत्यत आह—धातोरित्यादि।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्॥ उपदेश इति वर्त्तत इति। अनुदात्तस्य विशेषणार्थम्। तेन त्रप्तेत्यत्र यद्यपि तृनि विहिते नित्स्वरेण धातोरुदात्तत्वम्, तथाप्युपदेशावस्थायामनुदात्त इत्यमागमः सिद्धो भवति; इह च वर्द्धेति यद्यपि तृचि कृते धातुरनुदात्तो भवति, तथाप्युपदेशावस्थायान्नायमनुदात्त इत्यमागमो न प्रवर्त्तते; किमर्थम् पुनरनुदात्तस्येत्युच्यते, अनिट इत्येव नोच्येत, एवं हि लघु सूत्रं भवति? इत्याह—**तृप प्रीणन इत्यादि**। तृप्यतिदृप्यत्योः 'रधादिभ्यश्च' इतीट् विकल्प्यते,

Indira Gandhi National Centre for the Arts

दिभ्यश्च' इति विकल्प्यते। अनुदात्तोपदेशः पुनरमर्थं एव।

अनुदात्तस्येति किम्? वर्ढा, वर्ढुम्, वर्ढव्यम्। 'वृहू उद्यमने' इत्ययमुदात्तोपदेश ऊदित्वाच्चास्येड् विकल्प्यते। ऋदुपधस्येति किम्? भेत्ता। छेत्ता।

झलीत्येव—तर्पणम्। दर्पणम्।

अकितीत्येव—तृप्तः। दृप्तः॥

शीर्षंश्छन्दसि॥ ६०॥

'शीर्षन्' इति शब्दान्तरं शिरःशब्देन समानार्थं छन्दसि विषये निपात्यते, न पुनरयमादेशः शिरःशब्दस्य। सोऽपि हि छन्दसि प्रयुज्यत एव। शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति। यत्ते शीर्ष्णो दौर्भाग्यम्।

पदमञ्जरी

केणेटा सेट्त्वात्तयोर्न स्यात्। अथ पाक्षिकेणेडभावेन तयोरपि स्यात्, वर्ढा, वर्ढुमित्यत्रापि स्यादिति भावः। यदि तर्हि तयोः 'रधादिभ्यश्च' इतीड्विकल्प्यते, अनुदात्तोपदेशः पुनस्तयोः किमर्थः? इत्याह—*अनुदात्तोपदेशः पुनरमर्थ एवेति।*

शीर्षश्छन्दसि॥ न पुनरयमादेशः शिरःशब्दस्येति। यद्यपि सूत्रे शिरस इति स्थानी नोपात्तः, तथापि समानार्थत्वादादेशेनाक्षिप्यते, यथा–शिवादिषु विश्रवण-रवणशब्दाभ्यां विश्रवःशब्द इत्यादेशत्वशङ्का। *सोऽपि हि छन्दसि प्रयुज्यत इति।*

न्यासः

ततो यद्यनिट एवोच्येत, तदा पाक्षिकेणेटा नैतावनिटाविति तयोरमागमो न स्यात्। अथ पाक्षिकेणेड्भावेन तयोरनिट्त्वादमागमो भवति, तथा च सति 'वृहू उद्यमने' इत्यस्यापि स्यात्, अयमप्यूदित्वात् पाक्षिकेड्भावादनिड् भवति। तस्मान्न शक्यतेऽनिट इति वक्तुमित्यभिप्रायः। यदि तर्ह्यनयोरिड् विकल्प्यते, तदानुदात्तोपदेशः किमर्थः? स ह्येवमर्थः क्रियते—'अनुदात्तात्' इतीट्प्रतिषेधो यथा स्यात्। यदि तर्ह्यनयोरिड् विकल्प्यते, किं तेन? इत्यत आह–**अनुदात्तोपदेशः पुनरमर्थ एवेति।** **वर्ढेति।** 'हो ढः', 'ष्टुना ष्टुः', 'ढो ढे लोपः'। यदाप्युदात्तोपदेशस्तदेडत्र प्राप्नोति? इत्याह—**ऊदित्वादित्यादि।** 'स्वरतिसूति' इत्यादिनास्योदित्वादिड् विकल्प्यते, ततस्तेन सत्युदात्तत्वे पक्ष इडभावो न भवति। चकारोऽयमनुकर्षणार्थः। तेनोत्तरत्र तस्यानुवृत्तिर्न भवति॥

शीर्षंश्छन्दसि॥ किं पुनः कारणमादेशो नेष्यते? इत्याह—**सोऽपि हीत्यादि।** यतः शिरःशब्दोऽपि च्छन्दसि प्रयुज्यते, ततो नायमादेशः प्रयुज्यते। आदेशे हि सति शिरःशब्दस्य च्छन्दसि विषये प्रयोगो न स्यात्; निवृत्तिधर्मत्वात् स्थानिनः। यद्यन्यतरस्यांग्रहणमिहानुवर्त्तते, तदादेशेऽप्यदोषः। **शीर्षा इति।** 'नोपधायाः' इति दीर्घः।

Indira Gandhi National Centre for the Arts

छन्दसीति किम् ? शिरः ॥

ये च तद्धिते ॥ ६१ ॥

'शीर्षन्' इति वर्तते। आदेशोऽयमिष्यते, स कथम् ? 'तद्धिते' इति हि परं निमित्तमुपादीयते, स तदनुरूपां प्रकृतिं शिरःशब्दमाक्षिपति। यकारादौ तद्धिते परतः शिरःशब्दस्य शीर्षन्नादेशो भवति। शीर्षण्यो हि मुख्यो भवति। शीर्षण्यः स्वरः। शिरसि भव इति 'शरीरावयवाच्च' इति यत्, 'ये चाभावकर्मणोः' इति प्रकृतिभावः।

तद्धित इति किम् ? शिर इच्छति शिरस्यति ॥

पदमञ्जरी

आदेशश्चपक्षे तु तेन निवर्तितत्वाच्छिरःशब्दो न प्रयुज्येतेति भावः। ननु च 'अन्यतरस्याम्' इत्यनुवृत्तेस्तस्यापि प्रयोगो भविष्यति, सत्यम्; उत्तरत्रापि विकल्पानुवृत्तिः शङ्क्येतेति प्रकृत्यन्तरपक्ष एवाश्रितः ॥

ये च तद्धिते ॥ *छन्दसि पूर्वेणैव सिद्धमिति*। भाषार्थमिदम्, यदि पूर्वसूत्रवदिहापि शीर्षन्निति प्रकृत्यन्तरं विज्ञायेत तदा। यदा शिरःशब्दाद्यकारादिस्तद्धित उत्पद्यते तदा तस्य श्रवणं प्रसज्येतेति मत्वाऽऽह—*आदेशोऽयमिष्यत इति। स कथमिति*। स आदेशः कथं लभ्यते, न कथञ्चित्, स्थानिनोऽनुपादानात् पूर्वसूत्रवदिति प्रश्नः। तन्निमित्तमनुरूपां शब्दतश्चार्थतश्चान्तरतमां प्रकृतिं शिरःशब्दमेवाक्षिपति। *शिरस्यतीति*। 'सुप आत्मनः क्यच्'।

न्यासः

कचित् शीर्ष्णेति पठ्यते, तत् तृतीयान्तं द्रष्टव्यम्। 'अल्लोपोऽनः' इत्यकारलोपः। **शीर्ष्ण इति**। षष्ठ्येकवचनान्तमेतत् ॥

ये च तद्धिते ॥ यदि यकारादावपि तद्धिते प्रकृत्यन्तरं विज्ञायते, ततो यदि शिरःशब्दाद् यकारादिस्तद्धित उत्पद्यते, तदा तस्य श्रवणमापद्येत, न चेष्यते, इत्यत आह—**आदेशोऽयमिष्यत इति**। स्थानिनोऽनुपादानादिहाप्यादेशो न युज्यत इत्यभिप्रायेणाह—**स कथमिति**। **तद्धित इति** **हीत्यादि**। यस्मादिह यकारादिस्तद्धितः परनिमित्तमुपादीयते, न चानुपादाय प्रकृतिं तद्धित उत्पद्यते, न च शीर्षञ्शब्द एव प्रकृतिर्युक्ता; तस्य भाषायामसम्भवात्। स हि च्छन्दसि निपातितः, भाषायाञ्चेदम्। तस्मात् प्रकृत्यन्तरादुत्पन्ने यकारादौ तद्धिते विधीयमाने या तेन प्रकृतिराक्षिप्ता तस्या आदेशोऽयं विज्ञायते। आदेशोऽपि हि विज्ञायमानो न यस्य कस्यचिद्विज्ञायते, अपि तु शिरःशब्दस्यैव। यतः स तद्धितस्तदनुरूपां तस्यादेशस्य शब्दतश्चार्थतश्चान्तरतमां प्रकृतिं शिरःशब्दमेवाक्षिपति। **शीर्षण्य इति**। अट्कुप्वादिना णत्वम्।

शिरस्यतीति। 'सुप आत्मनः क्यच्'।

Indira Gandhi National Centre for the Arts

❀ वा केशेषु ❀। शिरसः शीर्षन्नादेशो वक्तव्यः। शीर्षण्याः केशाः। शिरस्याः केशाः॥

अचि शीर्षः॥ ६२॥

अजादौ तद्धिते शिरसः शीर्षशब्द आदेशो भवति। हस्तिशिरसोऽपत्यं हास्तिशीर्षिः[1]। 'बाह्वादिभ्यश्च' इति इञ्। स्थूलशिरस इदं स्थौलशीर्षम्। शीर्षन्भावे हि 'अन्' इति प्रकृतिभावः स्यात्।

हास्तिशीर्षिशब्दात् स्त्रियामिञः 'अणिञोरनार्षयोः' ष्यङादेशे कृते शीर्षस्य शिरःशब्दग्रहणेन ग्रहणात् शीर्षन्नादेशः प्राप्नोति, तत्र प्रकृतिभावे सति हास्तिशीर्षण्येत्यनिष्टं रूपं स्यात्, इष्यते तु हास्तिशीर्ष्येति, तत्कथम्? कर्त्तव्योऽत्र यत्नः। अणिञन्ताद् वा परः प्रत्ययः

पदमञ्जरी

वा केशेष्विति। सूत्रेण नित्ये प्राप्ते विकल्पितः। अत्र शिरस्यशब्दस्य केशैकविषयत्वात्तत्प्रयोगे केशशब्दो न प्रयोक्तव्यः, शीर्षण्यशब्दस्तु सामान्यवाचीति तत्प्रयोगे विशेषावगमाय केशशब्दः प्रयोक्तव्यः॥

अचि शीर्षः॥ शीर्षन्भावे ह्यन्निति प्रकृतिभावः स्यादिति। अतोऽकारान्तमादेशान्तरं विहितमिति भावः।

कर्त्तव्योऽत्र यत्न इति। तत्रायं यत्नः–शीर्षन्नादेशसन्निपातकृतः ष्यङादेश-

न्यासः

वा केशेष्विति। केशेष्वभिधेयेषु शिरःशब्दस्य शीर्षन्नित्यादेशो वा वक्तव्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्—अन्यतरस्यांग्रहणमनुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते। तेन शिरसः केशेषु वा शीर्षन्नादेशो भविष्यतीति॥

अचि शीर्षः॥ स्थौलशीर्षमिति। 'तस्येदम्' इत्यण्। किमर्थं पुनरादेशान्तरं विधीयते, न प्रकृत एव शीर्षन्नादेशो विधीयताम्? तत्रापि 'नस्तद्धिते' इति टिलोपे कृते सिध्यत्येवेष्टमित्याह–शीर्षन्भाव इत्यादि।

ष्यङादेशे कृत इत्यादि। 'अणिञोरनार्षयोः' इत्यादिना, तस्य शीर्षस्य शिरःशब्दग्रहणेन ग्रहणादिति स्थानिवद्भावेन शीर्षन्नादेशः प्राप्नोतीति। 'ये च तद्धिते' इत्यनेनैव। तत्रेत्यादि। प्रकृतिभावप्राप्तिस्तु 'ये चाभावकर्मणोः' इत्यनेन। **हास्तिशीर्षण्या, हास्तिशीर्ष्येति**। 'यङश्चाप्' इति चाप्। तत् कथमिति हास्तिशीर्ष्येति। कथमिष्टं सिध्यतीत्यर्थः। **कर्त्तव्योऽत्र यत्न इति**। स पुनर्यत्नः–शिरस्याः केशा इत्यस्य

१. 'पैलुशीर्षिः'—इत्यधिकं पुस्तकान्तरे।

Indira Gandhi National Centre for the Arts

ष्यङाश्रयितव्यः, तत्र यस्येतिलोपस्य स्थानिवद्भावाद् व्यवधानम् ॥

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६३ ॥

पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष, दोष, यकृत्, शकृत्, उदक, आसन—इत्येतेषां शब्दानां स्थाने शस्प्रभृति-प्रत्ययेषु परतः पद्, दत्, नस्, मास्, हृत्, निश्, असन्, यूषन्, दोषन्, यकन्, शकन्, उदन्, आसन्—इत्येते आदेशा यथासंख्यं भवन्ति। पद्—निपदश्चतुरो जहि। पदा वर्त्तय गोदुहम्। पादस्य पत्।

पदमञ्जरी

स्तद्विघातस्य निमित्तं न भवतीति। *अणिञन्ताद्वा पर इति*। 'अणिञोरनार्षयोः' इत्यादेशपक्षप्रहाणेन प्रत्ययपक्ष आश्रयणीयः, आदेशपक्ष एव वा स्थित्वा यत्नः कर्त्तव्य इति वाशब्दार्थः ॥

पदन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ इहापि 'शस्प्रभृतिषु' इति निमित्तोपादानादनुरूपाः प्रकृतयः आक्षिप्यन्ते, पदादयश्चादेशा विज्ञायन्ते इत्याह—*पाददन्तेत्यादि*। अन्ते आसनशब्दः पठ्यते, आस्यशब्दस्तु पठितव्यः, आस्नो वृकस्य वर्त्तिकामभीके, ग्रीवायां बद्धो अपि कक्ष आसनि, आस्नो यत्सीसमुञ्चतं वृकस्येत्यादौ ह्यास्यार्थोऽवगम्यते। *आसनीति*। 'विभाषा

न्यासः

सिद्धये य एव प्रकृतः स एव वेदितव्यः। व्यवस्थितविभाषयैव हि शीर्षशब्दस्य शिरःशब्देन ग्रहणाच् शीर्षन्नादेशो न भविष्यतीति; तेन हास्तिशीर्ष्येत्येवं भवति, न हास्तिशीर्षण्येति। **अणिञन्ताद्वेत्यादि**। 'अणिञोरनार्षयोः' इत्यत्र सूत्रे द्वौ पक्षौ—अणिञोः स्थान आदेशः ष्यङ् विधीयत इत्येकः पक्षः, अणिञन्तात् परः ष्यङ्प्रत्ययो भवतीति द्वितीयः। तत्रादेशपक्षेऽयं दोष आपततीत्यणिञन्तात् परः ष्यङाश्रयितव्य इति प्रत्ययपक्ष आश्रयितव्य इत्यर्थः। आदेशपक्षे 'यत्नो वा कर्त्तव्यः' इति विकल्पार्थो वाशब्दः। अथ तत्रापि प्रत्ययपक्ष आश्रीयमाणे शीर्षस्य शीर्षन्नादेशः कस्मान्न भवति ? इत्याह-**तत्रेत्यादि**। यदा प्रत्ययः ष्यङ् तदा तस्मिन्परतो योऽसाविञः 'यस्येति च' इति लोपस्तस्य पूर्वविधौ कर्त्तव्ये स्थानिवद्भावाद् व्यवधानम्। अतो यकारादेः शीर्षन्नादेशनिमित्तस्य तद्धितस्य व्यवधानादादेशो न प्राप्नोतीति भावः ॥

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ इहापि शस्प्रभृतयो निमित्तत्वेनोपादीयन्ते, ते च प्रकृत्या विना नोपपद्यन्त इति भावः। तेषु प्रकृत्यन्तराद्विहितेषु विधीयमानाः पदादय आदेशा विज्ञायन्ते। न च स्थानिनोऽनुपादानादनियमेनादेशप्रसङ्गः; यतस्तेष्वादिश्यमानेषु शस्प्रभृतयोऽनुरूपमेव पादादिकां स्वार्थिकीं प्रकृतिमाक्षिपन्तीत्याह-**पाददन्तनासिकेत्यादि**। पदित्याद्युदाहरणेषु पदो दत

Indira Gandhi National Centre for the Arts

दत्—या दतो धावति तस्यै श्यावदन्। नस्—सूकरस्त्वखनन्नसा। मास्—मासि त्वा पश्यामि चक्षुषा। हृद्—हृदा पूतेन मनसा जातवेदसम्। निश्—अमावास्यायां निशि यजेत। असन्—आसिक्तोऽस्नावरोहति। यूषन्—या पात्राणि यूष्ण आसेचनानि। दोषन्—यत्ते दोष्णो दौर्भाग्यम्। यकन्—यक्नोऽवद्यति। शकन्—शक्नोऽवद्यति। उदन्—उद्नो दिव्यस्य नावा ते। आसन्—आसनि किं लभे मधूनि।

शस्प्रभृतिष्विति किम्? पादौ ते प्रतिपीड्यौ, नासिके ते कृशे।

केचिदत्र छन्दसीत्यनुवर्त्तयन्ति। अपरे पुनरविशेषेणेच्छन्ति। तथा हि—भाषायामपि पदादयः शब्दाः प्रयुज्यन्ते।

'व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः॥' इत्येवमादयः।

अन्यतरस्यामित्येतदनुवर्तयन्ति, तेन पादादयोऽपि प्रयुज्यन्ते।

शस्प्रभृतिष्विति प्रकारार्थे प्रभृतिशब्द इति शला दोषणी इत्यत्रापि दोषन्नादेशो भवति।

❀ पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ❀। मांस, पृतना—सानु—

पदमञ्जरी

ङिश्योः' इत्यल्लोपाभावपक्षे रूपम्। अपरे पुनरविशेषेणेच्छन्तीति। भाष्ये तु छान्दसमेवैतदिति स्थितम्।

प्रकारार्थे प्रभृतिशब्द इति। व्यवस्थावाचिनि तु शसः पूर्वेषु वचनेषु न स्युः। *दोषणीति*। प्रथमाद्विवचने, दोःशब्दस्य दोषन्नादेशः, औङः शीभावः। *मांस*-

न्यासः

इति शसन्ते। यूष्णः, दोष्णः, यक्नः, शक्न इति षष्ठ्येकवचनान्तानि। 'अल्लोपोऽनः' इत्यकारलोपः। मासि, निशि, आसनीति सप्तम्येकवचनान्तानि। आसनीत्यत्र 'विभाषा ङिश्योः' इति पक्षेऽकारलोपो न भवति। शेषाणि तृतीयैकवचनान्तानि। पादौ, नासिके इति प्रथमाद्विवचनान्ते।

कस्मात् पुनरन्यतरस्यामित्येतदनुवर्त्तयन्ति? इत्याह—**तेन पादादयोऽपीत्यादि**। यस्मात् पादादयोऽपि प्रयुज्यन्ते तस्मादन्यतरस्यामित्यनुवर्त्तयन्ति।

व्यवस्थावाचिनि प्रभृतिशब्द आश्रीयमाणे शस्प्रभृतिभ्योऽन्यत्रादेशो न सिध्यतीत्यभिप्रायेणाह—**प्रकारार्थे प्रभृतिशब्द इति**। **दोषणी इति**। केचिदाहुः—प्रथमाद्विवचने दोषन्नादेशः, औङः शीभावः। अन्ये त्वाहुः—दोषणीति ङीबन्तमेतत्, ङीपि विषयभूते दोषन्नादेशः, ततः 'ऋन्नेभ्यो ङीप्'।

Indira Gandhi National Centre for the Arts

इत्येतेषां स्थाने यथासंख्यं मांस्, पृत्, स्नु—इत्येते आदेशा भवति। मांस्पचन्या उखायाः। मांसपचन्या इति प्राप्ते। पृत्सु मर्त्यम्। पृतनासु मर्त्यमिति प्राप्ते। न ते दिवो न पृथिव्या अधिस्नुषु। अधिसानुष्विति प्राप्ते।

❀ नस् नासिकाया यत्तस्क्षुद्रेषु ❀। नासिकाया नस्भावो वक्तव्यो यत्, तस्, क्षुद्र—इत्येतेषु परतः। नस्यम्। नस्तः। नःक्षुद्रः।

❀ यति वर्णनगरयोर्नेति वक्तव्यम् ❀। नासिक्यो वर्णः। नासिक्यं नगरम्॥

धात्वादेः षः सः॥ ६४॥

धातोरादेः षकारस्य स्थाने सकारादेशो भवति। षह्—सहते। षिच—सिञ्चति।

पदमञ्जरी

पचन्या उखाया इति। 'मांसस्य पचि युट्घञोः' इत्यन्तलोपो वक्ष्यते, तद्व्युत्पत्त्यन्तरम्। *नस्यमिति*। हितार्थे भवार्थे वा 'शरीरावयवाद्यत्'। *नस्त इति*। 'अपादाने चाहीयरुहोः' इति तसिः। *नः क्षुद्रः इति*। 'तृतीया तत्कृतार्थेन' इति समासः। 'सप्तमी' इति योगविभागादित्यन्ये। बहुव्रीहौ विशेषणस्य क्षुद्रशब्दस्य राजदन्तादित्वात्परनिपात इत्यन्ये।

यति वर्णनगरयोर्नेति वक्तव्यमिति। तत्तर्हि वक्तव्यम्? न वक्तव्यम्; इह तावन्नासिक्यो वर्ण इति, परिमुखादिपाठाद् ञ्यः, नासिक्यं नगरमिति सङ्काशादिपाठाद् ण्यः, 'राजन्यसाङ्काश्यकाम्पिल्यनासिक्यदार्वाघाटानामादिर्वान्तो वा' इति प्रतिपदस्वरविधानात्स्वरेऽपि नास्ति विशेषः, प्रत्युत यत्प्रत्यये सत्यनासिक्यमित्यत्र 'ययतोश्चातदर्थे' इत्युत्तरपदान्तोदात्तत्वं प्रसज्येत, अव्ययपूर्वपदप्रकृतिस्वरश्चेष्यते॥

धात्वादेः षः सः॥ सिञ्चतीति। 'शे मुचादीनाम्' इति नुम्।

न्यासः

नस्यमिति। हितार्थे 'शरीरावयवाद्यत्'। **नस्त इति**। 'अपादाने चाहीयरुहोः' इति तसिः। **नःक्षुद्र इति**। नासिका क्षुद्रा यस्येति बहुव्रीहिः।

नासिक्यो वर्ण इति। भवार्थे 'शरीरावयवात्' इति यत्। **नासिक्यं नगरमिति** अत्र हितार्थे यत्॥

धात्वादेः षः सः॥ सिञ्चतीति। 'शे मुचादीनाम्' इति नुम्।

Indira Gandhi National Centre for the Arts

धातुग्रहणं किम् ? षोडश । षडिकः । षण्डः । आदेरिति किम् ? कषति । लषति । कृषति ।

पदमञ्जरी

षोडन्निति । षड् दन्ता यस्येति बहुव्रीहौ 'वयसि दन्तस्य दतृ' 'षष उत्त्वं दतृदशधासु' इति षष उत्वमुत्तरपदादेष्टुत्वं च, 'उगिदचाम्' इति नुम्, हल्ङ्यादिसयोगान्तलोपौ । क्वचित्तु षोड *इति* पठयते, तत्तु षोडन्तमाचष्ट इति णिचि कृते टिलोपे पचाद्यचि रूपम् । षटशब्दोऽव्युत्पन्नं प्रातिपदिकम् । अनुकम्पितः षडङ्गुलिः षडिकः, 'बह्वचो मनुष्यनाम्नष्ठज्वा', 'ठाजादावूर्ध्वम्' इत्यङ्गुलिशब्दस्य लोपः । *लषतीति* । षकारोपदेशस्तु प्रनिलषतीत्यादौ 'शेषे विभाषाऽकखादावषान्त उपदेशे' इति नेर्णत्वप्रतिषेधार्थं स्यात्, लेषतुः लेषुरित्यत्र 'आदेशप्रत्यययोः' इति षत्वार्थम् । क्वचित्तु *कषतीत्यपि* पठ्यते; तदयुक्तम्; षकारोपदेशसामर्थ्यादेवात्र न भविष्यति; प्रनिकषतीत्यत्रापि कखादावित्येव णत्वप्रतिषेधः सिद्धः; आदेशादित्वाभ्यासलोपौ च न स्तः—चकषतुः, चकषुः ।

न्यासः

षोडश इति । षट् वा दश वास्येति 'संख्ययाव्यय' इत्यादिना बहुव्रीहिः, 'संख्येये डज्' इत्यादिना समासान्तो डच् । षोडन्निति । षट् दन्ता अस्येति बहुव्रीहिः, 'वयसि दन्तस्य दतृ' इति दन्तशब्दस्य दत्रादेशः । 'षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वञ्च' इति षष उत्वम्, उत्तरपदादेश्च ष्टुत्वम्—डकारः । **षण्ड इति** । प्रातिपदिकान्तमेतदव्युत्पन्नम् । **षडिक इति** । अनुकम्पितः षडङ्गुलिदत्त इति 'बह्वचो मनुष्यनाम्नष्ठच्' इति ठच्, 'ठाजादावूर्ध्वं द्वितीयादचः' इत्यङ्गुलिदत्तशब्दस्य लोपः । ननु च 'लिटि धातोः' इत्यतोऽत्र धातुग्रहणमनुवर्त्तिष्यते, तदिह किं पुनर्धातुग्रहणेन ? एवं तर्ह्येतज् ज्ञापयति—तन्निवृत्तमिति । तस्य ह्यनुवृत्तौ 'लोपो व्योर्वलि' इत्ययमपि लोपो धात्ववयवस्यैव विज्ञायते । क्नूयी,क्तः—क्नूतः, क्ष्मायी, क्तः—क्ष्मात इत्यत्रैव स्यात्; गौधेरः, पचेरन्नित्यत्र न स्यात् । नन्वेवमपि धातुग्रहणमनर्थकमेव, यस्मादुपदेश इति वर्त्तत एव, न च प्रातिपदिकानामुपदेशः, केषां तर्हि उपदेशः ? धातूनाम् ? नैतदस्ति; उपदेशाधिकारेऽप्युपदेशग्रहणेन षकारो विशिष्यते, षषश्च षकार उपदेशो भवति । 'षष उत्त्वं दतृदशधासूत्तरपदादेः' इति सूत्रे[1] पाठात् । तस्माद् धातुग्रहणं कर्त्तव्यम् । **कषतीति** । भ्वादौ कषसिषेत्यादिर्हिंसार्थो धातुवर्गे पठ्यते । **लषतीति** । 'लष कान्तौ' । अनयोरादिग्रहणान्न भवति । ननु चोपदेशसामर्थ्यादेवात्र न भविष्यतीति, अन्यथा ह्युपदेशस्य वैयर्थ्यं स्यात् ? नैतदस्ति; अस्ति ह्यन्यत्तूपदेशस्य प्रयोजनम् । किं तत् ?—'शेषे विभाषाऽकखादावषान्त उपदेशे' इत्यत्र कषेर्ग्रहणं मा भूत्; लषेश्च लेषतुः, लेषुरिति षत्वं यथा स्यात् ।

---

१. वस्तुतस्तु वार्त्तिकमिदम् ६, ३, १०९—इत्यत्र ।

Indira Gandhi National Centre for the Arts

'आदेशप्रत्यययोः' इत्यत्र षत्वव्यवस्थार्थं षादयो धातवः केचिदुपदिष्टाः। के पुनस्ते? ये तथा पठ्यन्ते। अथ वा, लक्षणं क्रियते—'अज्दन्त्यपराः सादयः षोपदेशाः स्मिस्विदिस्वदिस्वञ्जिस्वपितयश्च'[1], सृपिसृजिस्तृस्त्यासेक्सृवर्जम्' ॥

पदमञ्जरी

किमर्थं पुनः षादयो धातव उपदिष्टाः, न सादय एवोपदिश्येरन्, एवं ह्येतत्सूत्रं न कर्त्तव्यं भवति? तत्राह—*आदेशप्रत्यययोरित्यादि*। व्यवस्थानियमः—आदेशप्रत्यययोरिति सहादीनामेव षत्वं यथा स्यात्, सृपिसृजिप्रभृतीनां मा भूदित्येवमर्थं षादयः केचिदुपदिष्टाः; अन्यथा सहादीनां षत्वार्थं यत्नान्तरमास्थेयम्, तच्च गुरु भवतीति भावः। *के पुनस्त इति*। पाठे भ्रंशसम्भवात्प्रश्नः। *ये तथा पठ्यन्त इति*। अप्रमादेन पठितव्यमित्यर्थः। *अथ वा लक्षणं क्रियत इति*। मन्दधियोऽनुग्रहीतुमिति भावः। *अज्दन्त्यपराः सादय इति*। अज्दन्त्यौ परौ येषां तेऽज्दन्त्यपराः, परशब्दोऽवयववाची। तच्चाज्दन्त्ययोः परत्वमवयवान्तरापेक्षं विज्ञायमानं सन्निधानात्सकारापेक्षं विज्ञायते। *स्मिङ्स्विदिति*। 'ष्मिङीषद्धसने', 'ञिष्विदा गात्रप्रक्षरणे', 'ष्वन्ज सङ्गे', 'ञिष्वप् शये'—एते स्वरूपेणैव पठ्यन्ते। वकारमकारयोरनज्दन्त्यत्वाद्वकारोऽपि केवलदन्तस्थानो न भवति। 'स्वद आस्वादने' इति। स्वदिमपि केचित्पठन्ति। *सृपिसृजीत्यादि*। 'सृप्

न्यासः

किमर्थं पुनः षादयो धातव उपदिष्टाः, न सादयो ह्युपदिश्येरन्, एवं ह्येतत् सूत्रं न कर्त्तव्यं भवति? इत्यत आह—**आदेशप्रत्यययोरित्यादि**। षत्वव्यवस्था=षत्वनियमः। 'आदेशप्रत्यययोः' इत्यनेन सहादीनामेव षत्वव्यवस्था यथा स्यादित्येवमर्थम्। षादयः केचिदुपदिष्टाः, अन्यथा सहादीनां षत्वार्थं यत्नान्तरं कर्त्तव्यं स्यात्। तच्च गुरु भवतीत्यभिप्रायः। यद्यपि षकारादिषु सन्देहो न भवति, सकारादिषु च भवत्येव। अत्र हि न ज्ञायते—किं षोपदेशा एव सन्तः 'धात्वादेः षः सः' इत्यनेन कृतसत्वा उच्चारिताः? उत सकारादय एव? इति सन्दिह्य पृच्छति—**के पुनस्त इति**। **ये यथा पठ्यन्त इति**। षादयो ये यथा पठ्यन्ते सन्निधानात् त एव षोपदेशा अवगन्तव्याः। **अज्दन्त्यपरा इत्यादि**। अज्दन्त्यौ परौ येषामिति तेऽज्दन्त्यपराः। परशब्दोऽत्रावयवे वर्त्तते। तच्चाज्दन्त्ययोः परत्वमवयवान्तरापेक्षं विज्ञायमानं सन्निधानात् सकारापेक्षं विज्ञायते। **स्मिस्विदिस्वञ्जिस्वपयश्चेति**। 'ष्मिङ् ईषद्धसने', 'ञिष्विदा गात्रप्रक्षरणे', 'ष्वन्ज परिष्वङ्गे', 'ञिष्वप् शये'—एते स्वरूपेणाख्यायन्ते; मकारवकारयोरज्दन्त्यत्वाभावात्।

---

१. इतोऽग्रे—'मकारवकारयोरनज्दन्त्यत्वान्न भवतीति अप्राप्ते विधानम्' इति पाठो मुद्रितपुस्तके दृश्यते।

Indira Gandhi National Centre for the Arts

❀ सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधो वक्तव्यः ❀। षोडीयति। षण्डीयति। ष्ठीवति। ष्वष्कते। 'ष्ठिवु'—इत्येतस्य द्वितीयस्थकारष्ठ-

पदमञ्जरी

गतौ', 'सृज विसर्गे', 'स्तृञ् आच्छादने', 'स्त्यै ष्टयै शब्दसङ्घातयोः', 'सेकति-गत्यर्थः', 'सृ गतौ'—एतान्वर्जयित्वा येऽन्येऽज्दन्त्यपरास्ते षोपदेशाः।

सुब्धात्वित्यादि। सुब्धातुः क्यजाद्यन्तः, 'ष्ठिवु निरसने', 'ष्वष्कतिर्गत्यर्थः' अनुदात्तेत्—एषां सत्वस्य प्रतिषेधो वक्तव्यः। तत्र सुब्धातूनां तावन्न वक्तव्यः, उपदेश इति वर्तते, न च सुब्धातवः क्वचिदुपदिश्यन्ते, एवं च कृत्वा धातुग्रहणं शक्यमकर्तुम्। उपदेशाभावादेव षोडादेर्न भविष्यति, तत् क्रियते धातोरित्यस्य निवृत्तिं सूचयितुम्। तेन 'लोपो व्योर्वलि' इति अविशेषेण भवति, ष्ठीवतिष्व-ष्कती द्विषकारकौ, तत्र पूर्वस्यास्तु सत्वम्, परेण सन्निपातेन षत्वं भविष्यतीति।

न्यासः

केचित् स्मिस्वदिस्वदिस्वञ्जिस्वपयश्चेति स्विदिस्थाने स्वदिं पठन्ति, तेषां 'स्वद स्वर्द आस्वादने' इति स्वदिरपि षोपदेश एव। सृपिसृजिस्तृस्त्यासेकृसृवर्जमिति। 'गम्लृ सृप्लृ गतौ', 'सृज विसर्गे', 'स्तृञ् आच्छादने', 'ष्ट्यै स्त्यै शब्दसङ्घातयोः', 'सेकृ सेक्ृ स्रकि श्लकि गत्यर्थाः', 'सृ गतौ'—एतान् वर्जयित्वा येऽन्येऽज्दन्त्यपरास्ते षोपदेशाः।

सुब्धात्वित्यादि। सुब्धातुः क्यजाद्यन्तः। 'ष्ठिवु निरसने', 'ष्वक्क वुक्क मक्क तिक्क टिक्क टीक्क वगि लगि गत्यर्थाः'—एषां प्रतिषेधो वक्तव्यो व्याख्येय इत्यर्थः। तत्रेदं व्याख्यानम्—सुब्धातौ तावत् षोडीयतीत्यादौ नैव धात्वादिः षकारः, तथा ह्यादिरवयवः। आरम्भकश्चावयवो भवति, सुब्धातुः सुबन्तेन क्यचा चारभ्यते। न च षकारेणापि वर्णान्तरेणेति कुतस्तस्य षकारादित्वम्? सहादयस्तु षकारादिभिरेव वर्णैरारभ्यन्त इति युक्तं तेषां षकारादित्वम्। ष्ठिवेरपि निपातनान्न भवति, किं तन्निपातनम्? 'ष्ठिवुक्लमुचमां शिति' इति। यस्य हि सत्वं भवति तमयं प्रदेशेषु कृतसत्वमेवोच्चारयति यथा प्रदेशे—'स्थाघ्वोरिच्च' इति। ष्वक्केरप्यज्दन्त्यपरा इत्यनेन निवर्त्तितत्वान् न भवति। वकारस्य दन्त्यौष्ठ्यत्वादज्दन्त्यग्रहणेन न गृह्यते। अथ वा—यादित्वात् ष्ठिवुष्वक्कोर्न भविष्यति, यकारस्तु लुप्तनिर्दिष्टत्वान्न श्रूयते। अथ वा—अन्यतरस्यांग्रहणमत्रानुवर्त्तते, सा च व्यवस्थितविभाषा विज्ञायते, तेन सुब्धात्वा-दीनां न भवतीति। **ष्ठीवतीति।** 'ष्ठिवुक्लमुचमां शिति' इति दीर्घः। **ष्वक्कत इति।** अनुदात्तेत्त्वादात्मनेपदम्। अथ ष्ठिवो द्वितीयवर्णः किं ठकार इष्यते? उत थकारः? यदि ठकारस्तदा सिद्धम्—टेष्ठीव्यत इति, न सिध्यति—तेष्ठीव्यत इति, 'अभ्यासे चर्च' इति टकार एवान्तरतमष्ठकारस्य स्थाने प्राप्नोतीति कृत्वा; अथ थकारस्तदा सिद्धम्—तेष्ठीव्यत इति, एतन् न सिध्यति-टेष्ठीव्यत इति, आन्तरतम्याद् विधीयमानस्थकारस्य स्थाने तकार एव प्राप्नोतीत्यत आह—ष्ठिवु इत्येतस्येत्यादि। अभ्यासस्य द्वैरूप्यं यथा

Indira Gandhi National Centre for the Arts

कारश्चेष्यते । तेन तेष्ठीव्यते, टेष्ठीव्यते इति चाभ्यासरूपं द्विधा भवति ॥

णो नः ॥ ६५ ॥

'धातोरादेः' इत्यनुवर्तते । धातोरादेर्णकारस्य नकार आदेशो भवति । णीञ्—नयति । णम्—नमति । णह्—नह्यति ।

धात्वादेरित्येव—अणति ।

सुब्धातोरयमपि नेष्यते—णकारमिच्छति णकारीयति ।

'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यत्र णत्वविधेर्व्यवस्थार्थं णादयो धातवः केचिदुपदिश्यन्ते । के पुनस्ते ? ये तथा पठ्यन्ते । अथ वा, लक्षणं क्रियते—'सर्वे णादयो णोपदेशाः, नृतीनन्दिनर्दिनक्कनाटिनाथृनाधृवर्जम्' ॥

पदमञ्जरी

यद्येवम्, लिट् ष्वष्कते, षत्वस्यासिद्धत्वाद् 'ङः सि धुट्' इति धुट् प्रसज्येत ? एवं तर्हि यकारादी ष्ठिवुष्व्रष्कती, यकारस्तु 'लोपो व्योर्वलि' इति लुप्यते । *ष्ठीवतीति* । 'ष्ठिवुक्लमुचमां शिति' इति दीर्घत्वम् । अथास्य द्वितीयो वर्णो यदि ठकारः, तेष्ठीयत इति न सिध्यति; अथ थकारः, टेष्ठीयत इति न सिद्ध्यति; उभयं चेष्यते, तत्राह—*ष्ठीवत इत्यस्येत्यादि* । उभयथा ह्याचार्येण शिष्याः पाठिता इति भावः ॥

णो नः ॥ अणतीति । णोपदेशस्तु निरणतीत्यादौ 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वार्थं स्यात् । *सुब्धातोरयमपि* नेष्यत *इति* । पूर्ववदेव सर्वे नादय इति प्रयोगे । *नृतीनन्दीत्यादि* । 'नृती गात्रविक्षेपे', 'टुनदि समृद्धौ', 'नर्द गर्द शब्दे', 'नक्क नाशने', 'नट अवस्यन्दने' चुरादिः, 'नाथृ नाधृ याच्ञोपतापैश्वर्येषु' ॥

न्यासः

स्यादिति । केचिदाचार्येण शिष्याः 'ठकारोऽयम्' इत्युपदिष्टाः । अपरे पुनः 'थकारोऽयं ष्टुत्वेन ठकारः श्रूयते' इतीममर्थं ग्राहिताः । उभयश्चैतत् प्रयोजनम् । अन्ये पुनराहुः—ष्ठिवुर्दिवादिष्वपि पुनरधीयते, तत्रैकस्य द्वितीयस्थकारः, अपरस्य तु ठकार इति । तेष्ठीव्यत इति 'शर्पूर्वाः खयः' शेषः ॥

णो नः ॥ **सुब्धातोरयमपि नेष्यत इति** । पूर्वस्मादेव हेतोः ।

उपसर्गादसमासेऽपीत्यादि । अत्र पूर्वानुसारेण पूर्वपक्षो विज्ञेयः । **नृतीनन्दीत्यादि** । 'नृती गात्रविक्षेपे', 'टुनदि समृद्धौ', 'नर्द गर्द शब्दे', 'नक्क वक्क नाशने', 'नट अवस्यन्दने', चुरादिणिजन्तः, 'नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु', 'नॄ नये' ॥

Indira Gandhi National Centre for the Arts

लोपो व्योर्वलि ॥ ६६ ॥

धातोरिति प्रकृतं यत् तद् धात्वादेरिति पुनर्धातुग्रहणान्निवृत्तम् । तेन धातोरधातोश्च वकारयकारयोर्वलि परतो लोपो भवति । दिव्–दिदिवान्, दिदिवांसौ, दिदिवांसः । ऊयी–ऊतम् । क्नूयी–क्नूतम् । गोधाया ढ्रक्–गौधेरः । पचेरन् । यजेरन् । वकारस्य–'जीवेरदानुक्'–जीरदानुः । स्रिवेः–आस्रेमाणम् । 'उणादयो बहुलम्' इति बहुलवचनात् 'च्छ्वोः शूडनुनासिके च' इति ऊठ् न भवति ।

वलीति किम् ? ऊय्यते । क्नूय्यते । पूर्वं लोपग्रहणं किम् ?

पदमञ्जरी

लोपो व्योर्वलि ॥ *धातोरिति प्रकृतमित्यादि* । एतद् 'धात्वादेः षः सः' इत्यत्र व्याख्यातम् । *दिदिवानिति* । दिवेः क्वसौ रूपम् । 'वस्वेकाजाद्घसाम्' इति नियमादिडभावः । अत्र वक्तव्यमस्ति तद् 'वस्वेकाजाद्घसाम्' इत्यत्र वक्ष्यामः । 'ऊयी तन्तुसन्ताने', 'क्नूयी शब्दे' । *आस्रेमाणमिति* । 'स्रिवु गतिशोषणयोः', औणादिको मनिन्, नञा समासः ।

ननु च सतः कार्यिणः कार्येण भवितव्यमिति पूर्वं कार्यिनिर्देशो युक्तः, पश्चात्कार्यनिर्देशः—'व्योर्वलि लोपः' इति, लाघवं च भवत्यर्द्धमात्रया, तत्किमर्थं पूर्वं लोपग्रहणं कृतम् ? इत्यत आह—*पूर्वं लोपग्रहणमित्यादि* ।

न्यासः

लोपो व्योर्वलि ॥ 'लिटि धातोः' इत्यस्य धातुग्रहणस्य दृष्टानुवृत्तिसामर्थ्यादिहाप्यनुवृत्तिरिति मन्यमानस्य धातोरेवायं वलि व्यलोपो विधीयत इति कस्यचिद् भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह—**धातोरिति यत् प्रकृतमित्यादि** । **दिदिवानिति** । दिवेः क्वसौ रूपम् । **ऊयीति** । 'ऊयी तन्तुसन्ताने' । **क्नूयीति** । 'क्नूयी शब्दे' । **गौधेर इति** । 'गोधाया ढ्रक्' ढस्यैयादेशः, यकारलोपः । **पचेरन्निति** । सीयुड्यकारस्य लोपः । **जीवेरिति** । 'जीव प्राणधारणे' इत्यस्य । **स्रिवेरिति** । 'स्रिवु गतिशोषणयोः' इत्येतस्य । **आस्रेमाणमिति** । औणादिकोऽयं मनिन् । कथं पुनरेतदिहोदाहरणम्, यावता परत्वाद् 'वार्णादाङ्गं बलीयो भवति' इति बलीयस्त्वात् 'च्छ्वोः शूडनुनासिके च' इत्यादिनोठादेशेनात्र भवितव्यम् ? इत्यत आह—**उणादयो बहुलमित्यादि** । बहुलग्रहणस्य सर्वविधिव्यभिचारार्थत्वान् न भवत्येष दोषप्रसङ्ग इति ।

पश्चाल्लोपग्रहणे क्रियमाणे पकारात् परेणाध्यर्धमात्रोच्चारयितव्या भवति, अकारो हि मात्रा, विसर्जनीयस्त्वर्धमात्रः । पूर्वं तु लोपग्रहणे क्रियमाणे मात्राद्वयमुच्चारयितव्यं जायते; ओकारस्य द्विमात्रिकत्वात् । तत्र लाघवार्थं पश्चादेव लोपग्रहणं कर्तुं युक्तम्, तत् किं पूर्वं क्रियते ? इत्यत आह—**पूर्वमित्यादि** । अन्यस्तु पूर्वं कार्यिनिर्देशो युक्तः,

Indira Gandhi National Centre for the Arts

वेरपृक्तलोपात्पूर्वं वलि लोपो यथा स्यात्।

कण्डूयतेः क्विप्—कण्डूः। लोलूयतेः—लोलूः।

व्रश्चादीनामुपदेशसामर्थ्याद् वलि लोपो न भवति। वृश्चति,

पदमञ्जरी

पूर्वं लोपग्रहणेनायमर्थः सूच्यते—विध्यन्तरात्पूर्वमेवायं लोपो भवतीति, कण्डूयते-र्यलोपश्च प्राप्नोति, वेरपृक्तलोपश्च, तत्रान्तरङ्गत्वात्पूर्वमपृक्तलोपेन भवितव्यम्।

कण्डूयतेः क्विबिति। 'कण्ड्वादिभ्यो यक्' इत्यत्र भाष्यम्—'नैतेभ्यः क्विब् दृश्यते' इति, तस्मात्कण्डूमिच्छतीति क्यजन्तात्क्विब् द्रष्टव्यः। द्विविधा हि कण्ड्वादयः—धातवः, प्रातिपदिकानि च। तत्र धातुभ्यो यग्विधानात्प्रातिपदिकेभ्यः क्यजादयो भवन्त्येव, तत्र क्यजन्तात्क्विपि कृते–अतो लोपश्च प्राप्नोति, वेरपृक्तलोपश्च, तत्रान्तरङ्गत्वात्पूर्वमपृक्तलोपेन भाव्यम्। अथाप्यार्द्धधातुक इति विषयसप्तम्याश्रयणात्पूर्वमतो लोपः, पश्चात्क्विप्? एवमपि क्विलोपश्च प्राप्नोति वलोपश्च, तत्र परत्वान्नित्यत्वाच्च पूर्वमपृक्तलोपः स्यात्,तस्मिंश्च सति निमित्ताभावादलाश्रये प्रत्ययलक्षणाभावात्स्थानिवद्भावाभावाच्च वलि लोपो न स्यात्, पूर्वलोपग्रहणाच्च भवति। अथात्र लोपस्य स्थानिवद्भावादुवङ् कस्मान्न भवति? उच्यते; क्यजन्तात्क्विबित्युक्तम्, ततः किम्? स्थानिवद्भावेनापि कण्डूमात्रस्य धातुत्वाभावादुवङ् न भवति। यणादेशस्तर्हि प्राप्नोति? अस्तु यण्, तस्योठ् करिष्यते। न चोठ्यपि कर्त्तव्ये स्थानिवद्भावः, आदिष्टादचः पूर्वत्वाद्वकारस्य, अत एव कण्डुवावित्यादावूङुवङादिषु कर्त्तव्येषु नास्त्यल्लोपस्य स्थानिवद्भावः।

अथ व्रश्चकः, व्रश्चनमित्यादौ रेफे वलि परतो वकारस्य लोपः कस्मान्न भवति? तत्राह—*व्रश्चादीनामित्यादि*। ननु वृश्चति, वव्रश्चेत्यादौ सम्प्रसारणे कृते हलादिशेषे च वकारस्य श्रवणं यथा स्यादित्येतदुपदेशस्य प्रयोजनं स्यात्,

न्यासः

पश्चात् कार्यनिर्देश इति पूर्वं व्योर्ग्रहणे कर्त्तव्ये किमर्थं लोपग्रहणं क्रियत इति पूर्वपक्षं वर्णयति, स चायुक्तः; 'लुगणिञोः' इत्यत्र कार्यस्यापि पूर्वं निर्देशात्। **वेरपृक्तलोपादित्यादि**। कण्डूयतेर्लोलूयतेश्च क्विपि कृते वलि लोपात् परत्वात् कृताकृतप्रसङ्गित्वेन नित्यत्वाच्च पूर्वं वेरपृक्तलोप एव स्यात्, अस्मिंश्च सति निमित्ताभावाद् वर्णाश्रये प्रत्ययलक्षणाभावाद् वलि लोपो न स्यात्। तस्मात् पूर्वं लोपग्रहणं क्रियते–वलि लोप एव पूर्वं यथा स्यात्। पूर्वं लोपग्रहणे ह्ययमर्थः सूच्यते–वेरपृक्तलोपात् पूर्वं वलि लोप एव कर्त्तव्यमिति। **कण्डूरिति**। 'अतो लोपः' इत्यकारलोपः। 'क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषु न स्थानिवत्' इत्यकारस्य स्थानिवद्भावो न भवति, वलि लोपः। अथ व्रश्चकः, व्रश्चन इत्यत्र रेफे वलि परतो वकारलोपः कस्मान्न भवति? इत्याह—**व्रश्चादीनामित्यादि**। यद्येषामपि लोपः स्याद्, वकारोच्चारणमनर्थकं स्यात्।

Indira Gandhi National Centre for the Arts

वव्रश्चेत्यत्रापि हि सम्प्रसारणहलादिःशेषयोर्बहिरङ्गत्वात्प्राप्नोति ॥

वेरपृक्तस्य ॥ ६७ ॥

'लोपः' इति वर्त्तते । 'वेः' इति क्विबादयो विशेषाननुबन्धानुत्सृज्य सामान्येन गृह्यन्ते । वेरपृक्तस्य लोपो भवति । 'ब्रह्मभ्रूणवृत्रेषु क्विप्'–ब्रह्महा, भ्रूणहा । 'स्पृशोऽनुदके क्विन्'–घृतस्पृक्, तैलस्पृक् । 'भजो ण्विः'–अर्धभाक्, पादभाक्, तुरीयभाक् ।

पदमञ्जरी

न ह्यत्र लोपः प्रवर्तते, वल्परत्वाभावादित्यत आह—*वृश्चति वव्रश्चेत्यादावपीत्यादि । बहिरङ्गत्वादिति ।* बहिरङ्गत्वं सम्प्रसारणस्य क्ङित्प्रत्ययापेक्षत्वात्, हलादिशेषस्य त्वभ्यासापेक्षत्वात्, ततश्चाकृतयोरेव तयोर्वलोपः प्राप्त उपदेशसामर्थ्यादेव न भवति ।

अत्र भाष्ये वलोपः प्रत्याख्यातः । आस्रेमाणम्, जीरदानुरित्यत्र छान्दसो वर्णलोपः, क्वसावपि छान्दस एव, दिविप्रभृतीनां यङ्लुगन्तानां तसादिषूठा भवतिव्यम्, तिप्सिपोरीडभावपक्षेषूठा भवितव्यम् । ये तत्र क्ङितीति नानुवर्त्तयन्ति–देदिविति देद्योति, देदिवीषि देद्योषि, मिपि त्वनुनासिकत्वादेव भवति, देदिवीमि देद्योमि; ये त्वनुवर्त्तयन्ति तेषामपि छान्दसो यङ्लुगिति ॥

वेरपृक्तस्य ॥ क्विबादयो गृह्यन्त इति । ततोऽन्यस्य वेरपृक्तस्याभावात् । *घृतस्पृगिति ।* 'क्विन्प्रत्ययस्य कुः' अपृक्तग्रहणाद्वकारमात्रस्येदं ग्रहणम्, इकार उच्चारणार्थः ॥

न्यासः

अतश्चोच्चारणसामर्थ्याद् व्रश्चादीनां वलि लोपो न भवति । स्यादेतत्—वृश्चति, वव्रश्चेत्यत्र स्प्रसारणे हलादिशेषे च वकारस्य श्रवणं यथा स्यात्, तत् कुत उपदेशस्य वैयर्थ्यम् ? अत आह–वृश्चतीत्यादि । यथा व्रश्चक इत्यादौ लोपस्य प्राप्तिः, एवं वृश्चतीत्यादावपि सम्प्रसारणादौ कार्ये कृतेऽपि; तस्य बहिरङ्गत्वेनासिद्धत्वात् । तत्र सम्प्रसारणं ङित्प्रत्ययापेक्षत्वात् बहिरङ्गम्, हलादिशेषोऽभ्यासापेक्षत्वाद् बहिरङ्गः, वलि यलोपस्तु वर्णमात्राश्रयत्वादन्तरङ्गः । तस्मात् सर्वत्रैव व्रश्चेर्वकारलोपः प्राप्नोति । क्रियते चास्योपदेशः, अत उपदेशसामर्थ्यान्न भविष्यतीति तदेवावस्थितम् ॥

वेरपृक्तस्य ॥ वेरित्यादि । क्विबादेरन्यस्य वेरपृक्तसंज्ञकस्याभावात् क्विबादय एव गृह्यन्ते, कथं पुनर्वेरित्युच्यमाने क्विबादीनां सामान्येन ग्रहणमुपपद्यते, यावता पकारादयस्तेषां विशेषा अनुबन्धाः सन्ति ? इति चोद्यनिरासायेदमुक्तम्—**विशेषाननुबन्धानुत्सृज्येति ।** ब्रह्महा, भ्रूणहेति । 'सौ च' इति दीर्घः । घृतस्पृगिति । 'क्विन्प्रत्ययस्य कुः' इति कुत्वम् । अर्धभागिति । 'चोः कुः' इति कुत्वम् ।

दर्विरित्यादौ 'उणादयो बहुलम्' इति बहुलग्रहणादेव लोपो न भवतीति शक्यते वक्तुम्, अतः प्रपञ्चार्थम् । वैचित्र्यार्थं वाऽपृक्तग्रहणम् ॥

Indira Gandhi National Centre for the Arts

अपृक्तस्येति किम् ? 'वृदभ्यां विन्'-दर्विः। 'कॄगॄशॄसृजागृभ्यः क्विः'-जागृविः।

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ ६८ ॥

'लोपः' इति वर्तते। तदिह लौकिकेनार्थेनार्थवत् कर्मसाधनं द्रष्टव्यम्—लुप्यते इति लोपः। हलन्ताद्, ङ्यन्तादाबन्ताच्च दीर्घात् परं सु, ति, सि-इत्येतदपृक्तं हल् लुप्यते। हलन्तात् सुलोपः-राजा, तक्षा, उखास्रत्, पर्णध्वत्। ङ्यन्तात्-कुमारी, गौरी, शार्ङ्गरवी। आबन्तात्-खट्वा, बहुराजा, कारीषगन्ध्या।

पदमञ्जरी

हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ दीर्घग्रहणं सम्भवव्यभिचाराभ्यां ङ्यापोरेव विशेषणम्। ङ्याब्ग्रहणं च सोर्विशेषणम्। हलपृक्तग्रहणं च तिस्योः। सुतिसीति त्रीणि पदानि। *तदिहेत्यादि*। प्रकृतस्य लोपशब्दस्य शास्त्रीयस्य भावसाधनस्य सुतिसीति प्रथमान्तेन सम्बन्धाभवादिति भावः। अपर आह-हल्ङ्याब्भ्यः' इति पञ्चम्या सुतिसीत्यादिकायाः प्रथमायाः षष्ठ्यां प्रकल्पितायां

न्यासः

हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ॥ यदि लोप इतीहानुवर्त्तमानं शास्त्रीयेणार्थेनैवार्थवत् स्यात्, तदा तेन हलित्यस्य प्रथमान्तस्य सामानाधिकरण्येन सम्बन्धो नोपपद्यते। शास्त्रीयस्य हि लोपशब्दस्यार्थः-दर्शनाभावः = अदर्शनम्, न च हलदर्शनं भवति। न च 'हल्ङ्याब्भ्यः' इति पञ्चमी हलिति प्रथमायाः षष्ठीत्वं प्रकल्पयिष्यति। सामर्थ्याद्वा हलित्यस्य षष्ठ्यन्ततया विपरिणामो भविष्यति, अतः षष्ठ्यन्तस्य लोपशब्देन सम्बन्धो भविष्यतीति शक्यं प्रकल्पयितुम्; अकृतार्थत्वात् प्रथमायाः षष्ठीभावस्यानुपपत्तेरित्येतदालोच्याह—**तदिहेत्यादि**। **लुप्यत इति लोपः**। कर्मणि घञ्। एतेन लौकिकार्थेनार्थवत्त्वं लोपशब्दस्य दर्शयति। लुप्यत इति निरुध्यत इत्यर्थः। लौकिकेनार्थेनार्थवता कर्मसाधनेन लोपशब्देन हलित्येतस्य विशेषणविशेष्यभाव उपपद्यते। लोपशब्देन हि लुप्यमानं वर्णमात्रमुच्यते। **सुतिस्यपृक्तं हलिति**। अनेन च तदेव विशिष्यते। **दीर्घादिति**। एतच्च ङ्यापोरेव विशेषणम्; सम्भवाव्यभिचारात्, न तु हलन्तस्य; असम्भवात्। **उखास्रत्**। **पर्णध्वदिति**। 'स्रन्सु ध्वन्सु अधःपतने', उखायां स्रंसते, पर्णानि ध्वंसत इति क्विप्, 'अनिदिताम्' इत्यनुनासिकलोपः, 'वसुस्रंसुध्वंस्वनडुहां दः' इति दकारः, तस्य 'वावसाने' चर्त्वम्—तकारः। **कुमारीति**। 'वयसि प्रथमे' इति ङीप्। **गौरीति**। 'षिद्गौरादिभ्यश्च' इति ङीष्। **शार्ङ्गरवीति**। 'शार्ङ्गरवाद्यञो ङीन्'। **खट्वेति**। 'अजाद्यतष्टाप्' इति टाप्। **बहुराजेति**। 'डाबुभाभ्यामन्यतरस्याम्' इति डाप्। **कारीषगन्ध्येति**। 'यङश्चाप्'।

Indira Gandhi National Centre for the Arts

हलन्तादेव तिलोपः, सिलोपश्च । तत्र तिलोपस्तावत्—अबिभर्भवान् । भृञो लङि तिपि 'श्लौ', 'भृञामित्' इत्यभ्यासस्येत्त्वम् । अजागर्भवान् । सिलोपः—अभिनोऽत्र । अच्छिनोऽत्र । दस्य रेफः ।

हल्ङ्याब्भ्य इति किम् ? ग्रामणीः । सेनानीः । दीर्घादिति किम् ? ग्रामणीः । सेनानीः । दीर्घादिति किम् ? निष्कौशाम्बिः ।

पदमञ्जरी

शास्त्रीयेऽपि लोपशब्दे न दोष इति । *अभिनोऽत्रेति* । भिदेर्लङि सिलोपः, 'दश्च' इति दकारस्य रुत्वम्, तस्य 'अतो रोरप्लुतादप्लुते' इत्युत्वम्, श्नमोऽकारेण 'आद्गुणः', 'एङः पदान्तादति' इति पूर्वरूपम् ।

निष्कौशाम्बिरिति । ननु च प्रत्ययग्रहणपरिभाषया तदादिग्रहणादेवात्र न भविष्यति, इहापि तर्हि न स्यात्—परमकुमारी, परमखट्वेति ? 'स्त्रीप्रत्यये चानुपसर्जने न' इति तदादिनियमाभावाद्भविष्यति । निष्कौशाम्बिरित्यादौ उपसर्जनत्वाद्भवत्येव तदादिनियमः ? एवं तर्हि एतज्ज्ञापयति—उपसर्जनेऽपि स्त्रीप्रत्यये तदादिनियमोऽत्र न भवतीति । तेनार्द्धं पिप्पल्या अर्द्धपिप्पलीत्यादौ 'एकविभक्ति च' इत्युपसर्जनत्वे सत्यपि लोपो भवति । नात्रोपसर्जनं पिप्पली; एकविभक्तावषष्ठ्यन्तमिति वचनात् । अत एव 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वं न भवति । मा भूच्छास्त्रीयमुपसर्जनम्, अप्रधानं तावद्भवत्येव—बह्वयः श्रेयस्योऽस्य बहुश्रेयसीति ? शास्त्रीयमप्युसर्जनत्वमस्ति, 'ईयसश्च' इति कपः प्रतिषेधः, 'ईयसो बहुव्रीहौ प्रतिषेधो वक्तव्यः' इति ह्रस्वाभावः । अपर आह—'निष्कौशाम्बिरित्यादौ समुदायस्य ङ्याबन्तत्वेऽपि यदत्र ङ्याबन्तं कौशाम्ब्यादि, ततः परस्य सोर्लोपः प्राप्नोति दीर्घग्रहणाद्व्यावर्त्तते' इति । ननु च विहितविशेषणं विज्ञायते—ङ्याबन्ताद्विहितस्येति ? नैवं शक्यम्; या, सा, केत्यादौ न स्यात्, न ह्यत्र टाबन्तात्सुब्विहितः । मा भूदेवम्, हलन्ताद्विहित इत्येवं भविष्यति । यद्येवम्, यः, सः, क इत्यत्रापि स्यात्, कर्त्ता हर्तेत्यादौ च न स्यात्, न ह्यत्र हलन्तात्

न्यासः

हलन्तादेव तिलोपः सिलोपश्चेति । ननु ङ्याबन्तादित्येवकारेण दर्शयति, न हि ङ्याबन्तात् परौ तिसी सम्भवतः; धातोरेव परस्य लकारस्य तयोर्विधानात् । **अबिभर्भवानिति** । गुणे रपरत्वे च कृते तिलोपः । **अजागर्भवानिति** । 'जाग्रोऽविचिण्णल्ङित्सु' इति गुणः । भवानित्यनुप्रयोगस्तिशब्दाभिव्यक्तये । **अभिन इति** । भिदेर्लङ्, 'दश्च' इति रुत्वम्, 'अतो रोरप्लुतादप्लुते' इत्युत्त्वम्, श्नमोऽकारेण सह 'आद्गुणः', 'एङः पदान्तादति' इति पूर्वरूपत्वम् ।

ग्रामणीरिति । ग्रामं नयतीति 'सत्सूद्विष' इत्यादिना क्विप् । **निष्कौशाम्बिरिति** । निर्गतः कौशाम्ब्या इति प्रादिसमासः, 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वम् । **अतिखट्व**

Indira Gandhi National Centre for the Arts

अतिखट्वः । सुतिसोति किम् ? अभैत्सीत् । तिपा सहचरितस्य सिशब्दस्य ग्रहणात्सिचो ग्रहणं नास्ति । अपृक्तमिति किम् ? भिनत्ति, छिनत्ति[1] ।

हलिति किम् ? बिभेद । चिच्छेद ।

अथ किमर्थं हलन्तात्सुतिसीनां लोपो विधीयते, संयोगान्तलोपेनैव सिद्धम् ? न सिद्धयति; राजा, तक्षेत्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपो न स्यात् । उखास्रत्, पर्णध्वदित्यत्रापदान्तत्वाद्दत्वं च

पदमञ्जरी

त्सुर्विहित इति ? अतोऽन्यस्मादपि विहितस्य हल्ङ्याब्भ्योऽनन्तस्य लोप इत्यास्थेयम् । एवं च निष्कौशाम्ब्यादावपि लोपः प्राप्तो दीर्घग्रहणेन व्यावर्त्तनीयः । *तिपा सहचरितस्येति* । तिपा तिशब्देन साहचर्यात्सहापि तिङ एव ग्रहणमित्यर्थः ।

अथ किमर्थमित्यादि । 'ङ्यापोर्दीर्घात्सुः' इत्येव वक्तव्यमिति चोद्यार्थः । *न लोपो न स्यादिति* । ननु च 'न ङिसम्बुद्धयोः' इति ज्ञापकान्नलोपे कर्त्तव्ये संयोगान्तलोपः सिद्ध एव भविष्यति ? न; पचन्नित्यादावपि प्रसङ्गात् । नकारसंबुद्धयोरानन्तर्ये प्रतिषेधो विज्ञायमानस्तुल्यजातीये नकारविभक्त्योरानन्तर्य एव संयोगान्तलोपस्य सिद्धत्वं ज्ञापयति । पचन्नित्यादौ तु तकारेण व्यवहितत्वाद् ज्ञापकाभावाल्लोपाभावः ?—इत्याशङ्कय दोषान्तरमाह—*उखास्रत्, पर्णध्वदिति* । *दत्वमिति* । न स्यादित्यनुषङ्गः । उखास्रस्+सु इति स्थिते संयोगान्तलोपस्यापवादत्वाद्बाधित्वा 'स्कोः संयोगाद्योः' इति प्रकृतिसकारस्य लोपे श्रूयमाणः सकारो न वस्वादिसम्बन्धीति 'वसुस्रंसु' इति दत्वं न स्यात् । न च संयोगादिलोपं बाधित्वा पूर्वमेव प्रकृतिसकारस्य दत्वं लभ्यते; अपदान्तत्वात् । न हि सौ श्रूयमाणे पूर्वस्य पदसंज्ञाऽस्ति; 'असर्वनामस्थाने' इति प्रतिषेधात् । अथापि सावपि पदत्वमिति पक्षाश्रयेण स्यात्पदत्वम् ? एवमपि दत्वस्यासिद्धत्वात्पूर्वं

न्यासः

इति । खट्वामतिक्रान्त इति पूर्ववत् समासे कृते ह्रस्वः । **अभैत्सीदिति** । 'वदव्रज' इति वृद्धिः, अपृक्त इट् । ननु सीति सामान्येन निर्देशात् सिचोऽपि ग्रहणम्, अतो न युक्तमिदं प्रत्युदाहरणम् ? अत आह—**तिसहचरितस्येत्यादि** । तिङ्तिशब्देन साहचर्यात् तिङ एव सेर्ग्रहणम्, न सिच इति किमत्रायुक्तम् ! **बिभेदेति** । णलोऽकारोऽत्र भवत्यपृक्तः, न तु हल् इति नासौ लुप्यते ।

संयोगान्तलोपनैव सिद्धमिति । राजेत्यादिकमुदाहरणमिति शेषः । कथं पुनर्न सिध्यति ? इत्यत आह—**राजा, तक्षेत्यादि** । यथा पचन्नित्यत्र संयोगान्तलोपस्यासिद्ध-

1. 'बिभर्ति' इत्यधिकमेकस्मिन्पुस्तके ।

Indira Gandhi National Centre for the Arts

न स्यात्। अभिनोऽत्रेत्यत्र 'अतो रोरप्लुतादप्लुते' इत्युत्वं न स्यात्। अबिभर्भवानित्यत्र तु 'रात्सस्य' इति नियमाल्लोप एव न स्यात्।

संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यति।
रात्तु ते नैव लोपः स्याद्, हलस्तस्माद्विधीयते ॥

पदमञ्जरी

संयोगादिलोप एव स्यात्। ननु च वस्वादीनां दत्वं सौ दीर्घत्वे सिद्धमिति वक्ष्यति तत्र, सौ दीर्घग्रहणं न करिष्यते वस्वादीनां दत्वमित्येव, ततश्च पूर्वमेव दत्वं भविष्यति? एवमपि राजा, तक्षेत्यादौ सावपि पदत्वे सति संयोगान्तलोपस्यासिद्धत्वात्पूर्वं नलोपे सति असंयोगान्तत्वात्सोर्लोपो न स्यात्। तस्मात्सुष्ठूक्तम्—दत्वं न स्यादिति। *उत्वमिति।* न स्यादित्यनुषङ्गः। स एव हेतुः—संयोगान्तलोपस्यासिद्धत्वादिति। एतच्च 'संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः'—इत्येतदनाश्रित्योक्तम्। तदाश्रयणे तु—हरिवो मेदिनीमित्यादिवत्सिद्धम्। *रात्सस्येति नियमाल्लोप एव न स्यादिति।* ननु 'रात्सस्य' इति द्वितकारकनिर्देशात्तकारस्यापि प्रश्लेषाद्रेफादुत्तरस्य च तकारस्यापि लोपो विधास्यते? यद्येवम्, कीर्त्तयतेः क्विपि 'कीः' इति स्यात्, यथान्यासे तु कीर्दिति भवति। तदेवं सिग्रहणमेकं न कर्त्तव्यम्, अन्यत्सर्वं कर्त्तव्यमिति स्थितम्।

संयोगान्तस्य लोपे हीत्यादि। संग्रहश्लोकः। हिशब्दो हेतौ, नलोपादीत्यादिशब्देन दत्वोत्वयोर्ग्रहणम्। ये तु संयोगान्तलोपवादिनस्तेषां रेफादुत्तरस्य तकारस्य अबिभर्भवानित्यत्र नैव लोपः स्यात्, तस्माद्धल उत्तरेषां सुतिसीनां लोपो विधीयते ॥

न्यासः

त्वान् नलोपो न भवति; तथा राजा, तक्षेत्यादावपि न स्यात्। संयोगान्तलोपासिद्धत्वं चात्र पारम्पर्य्येण हेतुः। तस्मिन् सति हि सौ परतः पूर्वस्य पदसंज्ञा न भवति; 'असर्वनामस्थाने' इति प्रतिषेधात्। तस्यां चासत्यां पदस्येत्युच्यमानो नलोपो न स्यात्, नलोपे चासति राजेत्यादिकं रूपं न सिध्येत्। दत्वमिति। न स्यादिति प्रकृतेन सम्बन्धनीयम्। दत्वमपि हि संयोगान्तलोपस्यासिद्धत्वादसत्यां पदसंज्ञायां न स्यात्। अथ वा—संयोगान्तलोपोऽत्र न प्रवर्त्तत एव, तस्य 'स्कोः संयोगाद्योरन्ते च' इति सयोगादिलोपोऽपवादभूत इति स एव स्यात्, यथा—काष्ठं तक्ष्णोतीति काष्ठतडित्यत्र। तस्मिंश्च सति विभक्तिसकारस्य रुत्वविसर्गौ स्यातामिति कुतो दत्वम्! उत्वमिति। न स्यादित्यपेक्षते, एतदपि संयोगान्तलोपस्यासिद्धत्वात्। अलब्धपदव्यपदेशस्य न स्यात्। रात्सस्येति नियमादिति। 'संयोगान्तस्य लोपः' इत्यनेनैव सिद्धेः। 'रात्सस्य' इति नियमार्थमिदम्–रात्सस्यैव लोपोयथा स्यान्नान्यस्येति। ततश्चाबिभर्भवानित्यत्र तकारस्य लोप एव नस्यात्। तस्मात् संयोगन्तलोपेन न सिध्यतीति हलन्ताल्लोप उच्यते।

अस्यैवा्र्थस्य सुखोपग्रहणार्थं संयोगान्तस्य लोपे हीत्यादि संग्रहश्लोकस्योपन्यासः।

Indira Gandhi National Centre for the Arts

एङ्ह्रस्वात्सम्बुद्धेः ॥ ६९ ॥

'लोपः' इति वर्त्तते, 'हल्' इति च। 'अपृक्तम्' इति नाधिक्रियते, तथा च पूर्वसूत्रे पुनरपृक्तग्रहणं कृतम्। एङन्तात्प्रातिपदिकाद् ह्रस्वान्ताच्च परो हल्लुप्यते स चेत्सम्बुद्धेर्भवति। एङन्तात्—हे अग्ने,

पदमञ्जरी

एङ्ह्रस्वात्सम्बुद्धेः ॥ अत्र यदि हल्ग्रहणं नानुवर्तेत, तत एङ्ह्रस्वाभ्यां सम्बुद्धिरेव विशेषणीया—एङन्ताद् ह्रस्वान्ताच्च परस्याः सम्बुद्धेर्लोप इति, ततश्च हे कुण्डेत्यत्र न स्यात्। कथम्? कुण्ड+सु इति स्थिते लोपश्च प्राप्नोत्यम्भावश्च, तत्र लोपः शब्दान्तरप्राप्त्याऽनित्यः, स हि कृतेऽम्भावे 'आदेः परस्य' इत्यमोऽकारस्य प्राप्नोति, अकृते तु सकारस्य, अम्भावस्तु लोपे कृतेऽत्यन्ताप्राप्त्याऽनित्यः— इत्युभयोरनित्ययोः परत्वादम्भावे कृतेऽमि पूर्वस्य प्राप्नोति लोपश्च। तत्रामि पूर्वत्वे कृते व्यपवर्गाभावादुभयत आश्रयणेऽन्तादिवद्भावाभावाच्च लोपो न प्राप्नोति, लोपे च कृतेऽमोऽभावादमिपूर्वत्वं न प्राप्नोतीत्युभयोरनित्ययोः परत्वादमि पूर्वत्वे कृते लोपो न स्यात्, तस्मादनुवर्त्यं हल्ग्रहणम्। तदाह–*हलिति चेति*। 'वर्त्तते' इत्यपेक्षते। *अपृक्तमिति नाधिक्रियत इति*। यद्यधिक्रियेत, हे कुण्डेत्यत्र न स्यात्; अपृक्तसंज्ञाया अभावात्। कथं पुनर्ज्ञायते—नायमधिक्रियत इति? तत्राऽऽह—*तथा चेति*। अनुवर्तमानेऽपि हल्ग्रहणे यद्येङ्ह्रस्वाभ्यां सम्बुद्धिर्विशेष्येत, तया हल् विशेष्येत—एङन्ताद् ह्रस्वान्ताच्च परा या सम्बुद्धिस्तस्या हल्लुप्यते इति, ततः हे कुण्डेत्यत्र न स्यात् पूर्वोक्तादेव हेतोः। अत एङ्ह्रस्वाभ्यां सम्बुद्ध्या च हलेव विशेषणीय इति मत्वाऽऽह—*एङन्तात्प्रातिपदिकादित्यादि*। सम्बुद्ध्याक्षिप्तप्रातिपदिकमेङ्ह्रस्वाभ्यां विशेष्यत इति तदन्तविधिलाभः। अत्र

न्यासः

हिशब्दो हेतौ। यस्मात् संयोगान्तलोप आश्रीयमाणे नलोपादिकं कार्यं न सिध्यतीति। किञ्च—ते=तव, भवतः संयोगान्तलोपवादिनः, रात्तु रेफात्तु परस्य तकारस्याबिभर्भवानजगर्भवानित्यत्र नैव लोपः स्यात्। तस्माद्धलन्तात् सुतिसीनां लोपो विधीयते॥

एङ्ह्रस्वात् सम्बुद्धेः ॥ **हलिति चेति**। वर्त्तत इत्यपेक्षते। यदि हलिति नानुवर्त्तेत, तदा हे कुण्ड + सु इति स्थिते लोपात् परत्वादम्भावे कृते 'आदेः परस्य' इत्यकारलोपे 'सुपि च' इति दीर्घत्वे च हे कुण्डमित्यनिष्टं रूपं स्यादित्यभिप्रायः। **अपृक्तमिति नाधिक्रियत इति**। यदि ह्यपृक्तमिहानुवर्त्तेत, तर्हि हे कुण्डेत्यत्र लोपो न स्यात्; अपृक्तसंज्ञाया अभावादिति भावः। कथं पुनर्ज्ञायते—अपृक्त इह नानुवर्त्तते? इत्याह—**तथा चेत्यादि**। तथा चेति हेतौ। यस्मात् पूर्वसूत्रेऽपृक्तग्रहणं कृतमतोऽवसीयते—नात्र प्रकरणेऽपृक्तग्रहणस्यानुवृत्तिरस्तीति; अन्यथा हि 'वेरपृक्तस्य' इत्यत एवापृक्तग्रहणमनुवर्त्तिष्यत इति। पुनरपृक्तग्रहणं पूर्वसूत्रे न क्रियेतेति। **स चेत् सम्बुद्धेर्भवतीति**। यदि

Indira Gandhi National Centre for the Arts

हे वायो । ह्रस्वान्तात्—हे देवदत्त, हे नदि, हे वधु, हे कुण्ड । कुण्डशब्दाद् 'अतोऽम्' इत्यम्, 'अमि पूर्वः' इति पूर्वत्वे कृते हल्मात्रस्य मकारस्य लोपः ।

हे कतरदित्यत्र डिदयमद्डादेशः, तत्र टिलोपे सति ह्रस्वाभावान्नास्ति सम्बुद्धिलोपः ।

पदमञ्जरी

पक्षे कुण्डेत्यत्रामि पूर्वत्वस्य पूर्वं प्रत्यन्तवद्भावाद् ह्रस्वान्तात्परो हल्भवति । वस्तुतश्च सम्बुद्धेरिति लोपः सिद्धयति ।

अच्छब्द इति । एतच्च तत्रैव व्याख्यास्यते । *ह्रस्वाभावादिति* । ननु चादडेवाकारो ह्रस्वः, ततः परो हल् भवति, सम्बुद्धेश्च सम्बन्धीति लोपः स्यादेव, सम्बुद्धौ तु विशेष्यमाणायां प्रकृत्यकारस्य लोपे ह्रस्वात्परा सम्बुद्धिर्न भवतीति लोपाप्रसङ्गः ? उच्यते; 'सम्बुद्धयाक्षिप्तं प्रातिपदिकमेङ्ह्रस्वाभ्यां विशेष्यते' इत्युक्तम्, तेन कुण्डेत्यत्र न भविष्यति; एकादेशस्य पूर्वं प्रत्यन्तवद्भावात् प्रकृतिग्रहणेन ग्रहणात् । हे कतरदित्यत्र च न भविष्यति; टिलोपे कृते प्रकृतेरह्रस्वान्तत्वात् । *सम्बुद्धिगुणबलीयस्त्वादिति* । अन्यथा अग्नि+सु इति स्थिते सम्बुद्धिगुणश्च प्राप्नोति, ह्रस्वादिति लोपश्च; तत्र नित्यत्वात्परत्वाच्च सम्बुद्धिगुणे कृतेऽह्रस्वान्तत्वान्न भवेत् । ननु च विहितविशेषणं विज्ञास्यते—ह्रस्वान्ताद्विहिता या सम्बुद्धिरिति ? एवमपि हे खट्वेत्यत्र न स्यात् । मा भूदनेन, आबन्तत्वात्पूर्वेण भविष्यति ? एवमपि हे नदि, हे यवागु, हे कुमारीत्यत्र न स्यात्, न चात्र ङ्यन्तत्वाल्लोपो लभ्यते, दीर्घग्रहणात् । एवं तर्ह्युभयं विज्ञास्यते—विहितविशेषणम्, परविशेषणं च; तेनाग्ने, कुमारीत्यादौ सर्वत्र भविष्यति ? तत्र सकृच्छ्रुतस्य ह्रस्वग्रहणस्योभयविशेषणत्वमेव तावद् दुर्लभम् । अथापि लभ्यते ? एवमपि हे कतरदित्यत्र यद्यपि टिलोपे कृते सम्बुद्धेर्ह्रस्वपरत्वाभावः, तथापि ह्रस्वान्ताद्विहिता सम्बुद्धिरिति स्यादेव लोपः । तस्मादेङ्ग्रहणं कर्तव्यम् ।

वयं तु ब्रूमः—ये स्वभावत एङन्तास्तदर्थमप्येङ्ग्रहणं कर्त्तव्यमिति । तद्यथा—हेशब्दमतिक्रान्तो ब्राह्मणोऽतिहेः, तस्य सम्बोधनं हे अतिहे; अनुकृतः पचतेशब्दो

न्यासः

सम्बुद्धेः सम्बद्धो भवतीत्यर्थः । एतेन सम्बुद्धेरित्यस्यावयवषष्ठ्यन्ततां दर्शयति । हे अग्ने, हे वायो इति । 'ह्रस्वस्य गुणः' । हे नदि, हे वध्विति । 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वम् । हल्मात्रस्य मकारस्य लोप इति । हलित्यनुवृत्तेः ।

हे कतरदित्यत्रैकादेशे कृते ह्रस्वात् सम्बुद्धेर्हल् भवतीति तस्य लोपः कस्मान्न भवति ? इत्याह—हे कतरदित्यादि । 'अद्ड्डतरादिभ्यः' इत्यत्र द्विडकारनिर्देशाड् डिच्छब्द आदेशो भवतीति डित्वाट् टिलोपे ह्रस्वो नास्तीति न भवति लोपः ।

Indira Gandhi National Centre for the Arts

एङ्ग्रहणं क्रियते सम्बुद्धिगुणबलीयस्त्वात् ॥

शेश्छन्दसि बहुलम् ॥ ७० ॥

'शि' इत्येतस्य बहुलं छन्दसि विषये लोपो भवति । या क्षेत्रा । या वना । यानि क्षेत्राणि । यानि वनानि ॥

पदमञ्जरी

येन तस्य सम्बोधनं हेऽनुक्तपचते; विहित ईरेप्रत्ययो येन स विहितेरेः पाणिनिः, तस्य सम्बोधनम्–हे विहितेरे इत्यादि । अत्र संग्रहश्लोकः—

सम्बुद्धिर्ह्रस्वभेद्या यदि हि न च भवेन्नादिवन्नान्तवत्स्याद्,
दोषोऽसौ हल्निवृत्तावपि लुपि भवतोऽम् पूर्वरूपे परत्वात् ।
ह्रस्वान्ताल्लुब्विधिः स्याद्धल इति कतरङ्क्त्वतो नो हलो लुप्,
ह्रस्वश्रुत्या न शक्यः परविहितविधिर्नातिहेऽतोऽप्यकार्येऽङ् ॥

लोपनं लुप्, लोप इत्यर्थः ॥

शेश्छन्दसि बहुलम् ॥ या क्षेत्रेति । शेर्लोपे कृते प्रत्ययलक्षणेन 'नपुंसकस्य झलचः' इति नुम्, 'सर्वनामस्थाने च' इति दीर्घः, नलोपः ।

अयं योगः शक्योऽवक्तुम्, कथम् ? डादेशेन सिद्धत्वात् । कथमग्नेत्रीति ? त्रि + इ इति स्थिते प्रथमयोः पूर्वसवर्णदीर्घत्वेनैव सिद्धम् । न सिद्ध्यति, नुमा व्यवहितत्वात् ? छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः, मधोर्गृह्णातीत्येवमाद्यर्थं पुंवद्भावेनैव नुमो निवृत्तिः । एवमपि 'जसि च' इति गुणः प्राप्नोति, वक्ष्यत्येतत्– 'जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः' इति । अपि च या क्षेत्रा, ता ता पिण्डानामिति त + इ इति स्थिते 'सुपां सुलुक्' इतीकारस्याकारे कृते 'प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वेन सिद्धम् ॥

न्यासः

अथैङ्ग्रहणं किमर्थम्, यावता हे अग्ने इत्यादावपि प्रागेव सम्बुद्धिगुणाद् ह्रस्वादित्येवं लोपेन भवितव्यम् ? इत्यत आह–एङ्ग्रहणमित्यादि । नित्यत्वात् परत्वाच्च सम्बुद्धिगुणो बलीयानिति तेनैव तावत् भवितव्यम्, तत्र कृते ह्रस्वात् परः सम्बुद्धेर्हल् न सम्भवतीति लोपो न प्राप्नोति, अत एङ्ग्रहणं क्रियते । ननु च विहितविशेषणं विज्ञास्यते—ह्रस्वाद् विहितायाः सम्बुद्धेरिति ? नैतदस्ति; एका हीयं पञ्चमी, तत्र यदि ह्रस्वाद् विहितविशेषणं विज्ञायते तदेङन्तादपि विज्ञायेत । तथा च–हे गौरित्यत्रापि स्यात् । तस्मादेङ्ग्रहणं कर्त्तव्यम् ॥

शेश्छन्दसि बहुलम् ॥ 'जश्शसोः शिः' इति यः शिरादेशस्तस्यायं लोपो विधीयते । **या क्षेत्रा, या वना इति ।** शेर्लोपे कृते प्रत्ययलक्षणेन 'नपुंसकस्य झलचः' इति नुम्, 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घः, 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः ।

Indira Gandhi National Centre for the Arts

ह्रस्वस्य पिति कृति तुक् ॥ ७१ ॥

पिति कृति परतो ह्रस्वान्तस्य धातोः तुगागमो भवति । अग्निचित् । सोमसुत् । प्रकृत्य । प्रहृत्य । उपस्तुत्य ।

ह्रस्वस्येति किम् ? आलूय । ग्रामणीः । पितीति किम् ? कृतम् । हृतम् । कृतीति किम् ? पटुतरः । पटुतमः ।

ग्रामणि ब्राह्मणकुलमित्यत्र ह्रस्वस्य बहिरङ्गस्यासिद्धत्वात् तुग्न भवति ॥

पदमञ्जरी

ह्रस्वस्य पिति कृति तुक् ॥ कृता धातुराक्षिप्यते, स च ह्रस्वेन विशेष्यते, तेन तदन्तविधिर्भवतीत्याह—*ह्रस्वान्तस्य धातोरिति । अग्निचित्, सोमसुदिति ।* 'अग्नौ चेः', 'सोमे सुञः' इति क्विप् ।

ग्रामणिकुलमिति व्यस्तं चेन्नपुंसकह्रस्वत्वम्, षष्ठीसमासे तु 'इको ह्रस्वोऽङ्यो गालवस्य' इति ह्रस्वः । अत्र नपुंसकह्रस्वत्वमर्थापेक्षत्वाद्बहिरङ्गम्; इतरदुत्तरपदापेक्षत्वात् ।

यदि पुनरयं तुट् परादिः क्रियते ? नैवं शक्यम्; इहाग्निचित्सोमसुत, 'वेरपृक्तस्य' इति वलोपो न प्राप्नोति । इह च परितनोतीति क्विप्, 'क्वौ च गमादीनाम्' इत्यनुनासिकलोपः, 'नहिवृति' इत्यादिना दीर्घः—परीतत्, तुट आर्द्धधातुकभक्तत्वादिट्प्रसङ्गः । इह चावच्छ्याद् 'वाऽन्यस्य संयोगादेः' इत्येत्वं प्रसज्येत । अथाभक्तः स्याद्, मधुच्छादयतीति 'तिङ्ङतिङः' इति निघातो न प्राप्नोति; तकारेण व्यवधानात् । न च तकार एवातिङ्; अपदत्वात् । तस्मात्पूर्वान्त एव कर्त्तव्यः । यद्येवम्, नपुंसकह्रस्वत्वमुपसर्जनह्रस्वत्वं द्विगुस्वरश्च

न्यासः

वेति कर्त्तव्ये बहुलग्रहणं सर्वविधिव्यभिचारार्थम् । तेन 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इत्युपपन्नं भवति ॥

ह्रस्वस्य पिति कृति तुक् ॥ कृतात्र प्रत्ययेन धातुरुपस्थाप्यते, ह्रस्वेन च स एव विशेष्यते, विशेषणेन च तदन्तविधिर्भवतीत्यतो ह्रस्वान्तो धातुरागमी विज्ञायत इत्याह—**ह्रस्वान्तस्य धातोरित्यादि । अग्निचिदिति ।** 'अग्नौ चेः' इति क्विप् । **सोमसुदिति ।** 'सोमे सुञः' इत्युभयत्रोपपदसमासः । **प्रकृत्येत्यादौ** प्रादिसमासः । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यप् ।

अथ ग्रामं नयतीति ग्रामणि ब्राह्मणकुलमित्यत्र नपुंसकह्रस्वत्वे कृते ह्रस्वाश्रयस्तुक् कस्मान्न भवति ? इत्याह—**ग्रामणि ब्राह्मणकुलमित्यादि ।** ह्रस्वत्वं हि नपुंसकार्थवृत्ति-

संहितायाम् ॥ ७२ ॥

अधिकारोऽयम् 'अनुदात्तं पदमेकवर्जम्' इति यावत् । प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामः संहितायामित्येवं तद्वेदितव्यम् । वक्ष्यति—'इको यणचि, दध्यत्र'।

संहितायामिति किम् ? दधि अत्र । मधु अत्र ॥

छे च ॥ ७३ ॥

'ह्रस्वस्य तुक्' इति वर्तते । छकारे परतः संहितायां विषये

पदमञ्जरी

न सिद्ध्यति । नपुंसकह्रस्वत्वम्—आराशङ्कुलिच्छत्रम्, धानाशङ्कुलिच्छत्रम् । उपसर्जनह्रस्वत्वम्—निष्कौशाम्बिच्छत्रम्; द्विगुस्वरः—पञ्चारत्निच्छत्रम्, तुकि कृतेऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति ? न वा बहिरङ्गलक्षणत्वात् । बहिरङ्गस्तुक्—छकारसन्निपातापेक्षत्वात्, अन्तरङ्गा एते विधयः प्रागेव तत्सन्निधानाद्भविष्यन्ति ॥

संहितायाम् ॥ 'संहितायाम्' इति विषयसप्तमीयम् । कार्यिनिमित्तयोः संहितायां विषयभूतायां वक्ष्यमाणं कार्यं भवतीत्यर्थः । वक्ष्यति–'इको यणचि' इति, अनन्तरं तु विधिमतिक्रामतोऽभिप्रायो मृग्यः । *दधि अत्रेति* । ननु च 'इको यणचि' इत्यधिकरणसप्तम्येषा, तच्चाधिकरणमौपश्लेषिकादन्यद्वर्णेषु न सम्भवति, तत्राच्युपश्लिष्टस्येको विधीयमानो यण्वर्णान्तरव्यवाये कालव्यवाये च न भविष्यतीति नार्थः संहिताधिकारेण ? ज्ञापनार्थं तु, एतज्ज्ञापयति–'कालव्यवायो निर्दिष्टपरिभाषायां नाश्रीयते' इति । तेनोत्तरपदाधिकारेऽपि विधीयमानं कार्यमलुगादि कालव्यवधानेऽपि भवत्येव—आखरेष्ठ इत्याखरे स्थः, अग्नाविष्णू इत्यग्ना विष्णू इत्यादि ॥

छे च ॥ छकारेकार उच्चारणार्थः, 'विदिभिदिच्छिदेः', 'शाच्छोरन्यतरस्याम्' इत्यादिनिर्देशात् । अधिकारे द्वौ पक्षौ—अर्थाधिकारः, शब्दाधिकार

न्यासः

प्रातिपदिकमपेक्षत इति बहिरङ्गम्, अन्तरङ्गस्तु तुग्; वर्णमात्रापेक्षत्वात् । 'असिद्धं बहिरङ्गमन्तरङ्गे' इति तुग्नात्र भवति ॥

संहितायाम् ॥ **संहितायामिति** विषयसप्तमीयम् । तेन यदि कार्यिनिमित्तयोः संहिता विषयभूता भवति, तर्ह्येवं वक्ष्यमाणं कार्यं भवति; नान्यथेति वेदितव्यम् ॥

छे च ॥ छ इति यद्यप्यकारवतश्छकारादेषा सप्तमी, तथापि च्छकार एव केवलस्तुको निमित्तम्, अकारस्तूच्चारणार्थः । एतच्च 'इजादेश्च गुरुमतोऽनृच्छः'

Indira Gandhi National Centre for the Arts

ह्रस्वस्य तुगागमो भवति । इच्छति । गच्छति ।

ह्रस्व एवात्रागमी, न त्वदन्तः । तेन चिच्छिदतुः, चिच्छिदुरित्यत्र तुगभ्यासस्य ग्रहणेन न गृह्यत इति हलादिःशेषेण न निवर्त्यते । नावयवावयवः समुदायावयवो भवतीति ॥

पदमञ्जरी

इति । तत्राद्ये पक्षे पूर्वसूत्रे कृताक्षिप्तस्य धातोर्ह्रस्वेन विशेषणात्तदन्तं ह्रस्वशब्देन प्रत्यायितमिति इहापि तदन्तस्यैव ग्रहणं स्यात् । शब्दाधिकारे तु ह्रस्वशब्द एवात्रानुवर्त्तते, न पूर्वः प्रकृतोऽर्थः, न चेह किञ्चिद्विशेष्यमस्तीति तदन्तविध्यभावाद् ह्रस्व एवागमी भवति । तत्रेह द्वितीयः पक्ष आश्रित इत्याह—*ह्रस्व एवात्रागमीति* । किमेवं सति सिद्धं भवति ? तत्राह—*तेनेति* । यदि तु ह्रस्वान्तस्य तुक् स्यात्, तुकोऽभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्तिः स्यात् । ह्रस्वमात्रे त्वागमिनि नायमभ्यासस्यावयवो हलिति न भवत्येष प्रसङ्गः । कथं पुनर्ह्रस्व आगमिनि तुगभ्यासग्रहणेन न गृह्यत इत्यत आह—*नावयवावयव इति* । इतिकरणो हेतौ । यद्यवयवावयवस्समुदायावयवो न भवति, एवं तर्हि शेरत इत्यत्र

न्यासः

इत्याम्प्रतिषेधादवसीयते । यदि ह्यकारसहितश्छकारस्तुको निमित्तं स्यात्, तदा ऋच्छेस्तुगभावादसति गुरुमत्त्व आमः प्रसङ्गो नास्तीति प्रतिषेधं न कुर्यात् । **इच्छतीति** । 'इषुगमियमां छः' तुक्, चुत्वम् ।

पूर्वस्मिंस्तुग्विधौ ह्रस्वान्त आगमी, अतः स एवात्रागमीति कस्यचिद् भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह—**ह्रस्व एवेत्यादि** । एवं मन्यते—ह्रस्वानुकर्षणार्थश्चकारोऽत्र क्रियते— ह्रस्व एवागमी यथा स्यात्, तदन्तो मा भूदित्येवमर्थम्; अन्यथा स्वरितत्वादनन्तरत्वाच्च पूर्वसूत्रे य आगमी, स एवेहापि विज्ञास्यत इत्यनर्थकश्चकारः स्यात् । ह्रस्व एवागमिनि सति किमिष्टं सिध्यति, यतस्तदर्थोऽयं यत्नः क्रियते ? इत्याह—तेनेत्यादि । यदि ह्रस्वान्तस्य तुक् स्यात् तदा चिच्छिदतुरित्यादौ तस्याभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्तिः स्यात् । ह्रस्वे त्वागमिनि नायमभ्यासस्य हलिति न भवत्येव दोषः ।

कथं पुनर्ह्रस्व आगमिनि तुगभ्यासग्रहणेन न गृह्यते ? इत्याह—**नावयवावयव इत्यादि** । इतिकरणो हेतौ । यस्मादवयवस्य योऽवयवः स समुदायस्यावयवो न भवति । तस्मात् ह्रस्व एवागमिनि तुकोऽभ्यासग्रहणेन न ग्रहणं भवति । नावयवावयवः समुदायस्यावयवो भवतीत्यत्र चैतत् सूत्रविहितस्तुगित्यभिप्रायो वेदितव्यः । यदि ह्यविशेषेणावयवावयवः समुदायावयवो न स्यात्, एवं सति शेरते इत्यत्र रुडागमः सार्वधातुकस्यावयवस्य झादेशस्यातोऽवयव इति सोऽपि समुदायस्य सार्वधातुकस्यावयवो

आङ्माङोश्च ॥ ७४ ॥

'तुक्' इत्यनुवर्तते, 'छे' इति च। आङो ङित ईषदादिषु चतुर्ष्वर्थेषु वर्त्तमानस्य माङश्च प्रतिषेधवचनस्य छकारे परतस्तुगागमो भवति। 'पदान्ताद्वा' इति विकल्पे प्राप्ते नित्यं तुगागमो भवति। ईषदर्थे–ईषच्छाया। आच्छाया। क्रियायोगे–आच्छादयति।

पदमञ्जरी

रुडागमः सार्वधातुकावयवस्यादादेशस्यावयव इति सोऽपि सार्वधातुकस्य समुदायस्यावयवो न स्यात्। तत्र को दोषः ? 'शीङः सार्वधातुके गुणः' इति गुणो न स्यात्; रुटा व्यवधानात्। स ह्यवयवभक्तस्तमेव न व्यवदध्यात्, सार्वधातुकं तु व्यवदधात्येव। कुतश्चैष न्यायः—'अवयवावयवः समुदायावयवो न भवति' इति ? लोके तावद्देवदत्तावयवस्य हस्तस्यावयवोऽङ्गुलिर्देवदत्तस्याप्यवयवो भवत्येव—साङ्गुलिर्देवदत्त इति। तस्मादयमत्राभिप्रायः—'छ आङ्माङोश्च' इत्येक एव योगः कर्त्तव्यः, चकारादनन्तरस्य प्राक्कृतस्य च; एवं सिद्धे यद्योगविभागं चकारं च करोति, तस्यैतत्प्रयोजनम्—प्रकृतस्य तदन्तस्य प्रहाणेन केवलं ह्रस्वमेवानुवर्त्तयिष्यामीति। यदि त्वागमस्तुक् समुदायस्यावयवः स्याद्, एष यत्नोऽनर्थकः स्यादिति ॥

आङ्माङोश्च ॥ आङ्माङोर्ङिद्विशिष्टयोरुपादाने प्रयोजनमाह–*आङो ङित* इति। अर्थविशेषसम्पादनार्थं ङिद्विशिष्टयोरुपादानमित्यर्थः। *आच्छायाया इति*।

न्यासः

न स्यात्। ततः 'शीङः सार्वधातुके गुणः' इति गुणो न स्यात्; रुटा सार्वधातुकस्य व्यवहितत्वात् स ह्यवयव उक्तस्तमेव व्यवदध्यात्, स समुदायं तु न व्यवदधात्येव। तस्मात् पूर्वोक्त एवाभिप्रायो वृत्तिकारस्य वेदितव्यः।

कस्मात् पुनरेतत् सूत्रविहितोऽवयवावयवः समुदायस्यावयवो न भवति ? ह्रस्वानुकर्षणार्थचकारकरणसामर्थ्यात्। स हि चकारो ह्रस्वानुकर्षणार्थ एवमर्थः क्रियते—ह्रस्वमात्र आगमिनि तुकोऽभ्यासग्रहणेनाग्रहणाद्धलादिशेषेण निवृत्तिर्मा भूदिति। यदि चैतत्सूत्रविहितोऽप्यवयवावयवः समुदायावयवः स्यात्, तदा ह्रस्वेऽप्यागमिनि तुकस्तु तदवयवस्याप्यभ्यासग्रहणेन ग्रहणाद्धलादिशेषेण निवृत्त्या भवितव्यमिति चकारो ह्रस्वानुकर्षणार्थो निष्फलः स्यात्। तस्मादयमेव तुगवयवावयवः समुदायावयवो न भवति, अन्यस्तु भवत्येव। युक्तञ्चैतत्। तथा हि—बाहोर्योऽवयवो हस्तः स देवदत्तस्याप्यवयवो भवत्येव; अन्यथा हस्तवान् देवदत्त इति प्रयोगो न स्यात् ॥

आङ्माङोश्च ॥ अत्राकारो ङिदुपात्तः, स चेषदादावर्थे वर्त्तत इत्याह—**आङिस्यादि**। माशब्दोऽपि ङिदुपात्तः, सोऽपि निषेधे वर्त्तत इत्याह—**माङश्च प्रतिषेधवचनस्येति**। **आच्छादयतीत्यादि**। 'छद अपवारणे' चौरादिकः। अत्र च्छादनक्रियाङ्ग

Indira Gandhi National Centre for the Arts

मर्यादाभिविध्योः—आच्छायायाः। आच्छायम्। माङः खल्वपि—माच्छैत्सीत्। माच्छिदत्।

ङिद्विशिष्टग्रहणं किम्? आछाया, आच्छाया। प्रमाछन्दः, प्रमाच्छन्दः॥

दीर्घात्॥ ७५॥

'छे तुक्' इति वर्त्तते। दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव

पदमञ्जरी

'आङ् मर्यादावचने' इति कर्मप्रवचनीयसंज्ञा, 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी। *आच्छायमिति*। 'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः। *माच्छिददिति*। 'इरितो वा' इत्यङ्।

आछाया, आच्छायेति। स्मरणे चात्राकारः, 'वाक्यस्मरणयोरङित्'। *प्रमेति*। प्रपूर्वान्माङः 'आतश्चोपसर्गे' इत्यङ्, अत्र धातोर्ङित्वेऽपि टाबन्तो न ङित्, 'गामादाग्रहणेष्वविशेषः' इति लाक्षणिकस्याप्यस्य ग्रहणस्य प्रसङ्गः। अत्रोभयत्रापि 'पदान्ताद्वा' इति विकल्प एव भवति॥

दीर्घात्॥ 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान', अचरितार्था च पञ्चमी, तेन दीर्घादिति पञ्चम्या छ इत्यस्याः सप्तम्याः षष्ठ्यां प्रकल्पितायां छकारस्यैव तुका भवितव्यमिति भ्रान्तिमपाकारोति—*दीर्घात्परो य इत्यादि*। अनेन पञ्चम्या

न्यासः

विशिष्यत इति स क्रियायोगे वर्त्तते। आच्छायाया इति। मर्यादायामाङ्। छायाम्=मर्यादां परिवृत्येत्यर्थः। 'आङ् मर्यादावचने' इत्याङश्च कर्मप्रवचनीयसंज्ञकस्य योगे 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी। आच्छायमिति। छायामभिव्याप्येत्यर्थः। 'आङ् मर्यादाभिविध्योः' इति पञ्चम्यन्तेनाव्ययीभावः, 'नाव्ययीभावादतोऽम् त्वपञ्चम्याः' इति विभक्तेर्लुगभावश्च। मा च्छिददिति। इरित्वाच्च्लेरङ्।

आछाया, आच्छायेति। अत्राकारः स्मरणे वर्त्तते, तत्र चास्य ङित्त्वं नास्ति; 'वाक्यस्मरणयोरङित्' इति वचनात्। तेनात्र 'पदान्ताद्वा' इति विकल्पो भवति।

प्रमाछन्द इति। 'माङ् माने' प्रपूर्वः, 'आतश्चोपसर्गे' इत्यङ्, स्त्रियाम् 'अजाद्यतष्टाप्'। ननु च लाक्षणिकत्वादेवात्र न भविष्यति? नैतदस्ति; 'गामादाग्रहणेष्वविशेषः' इति वचनात्।

दीर्घात्॥ 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति दीर्घादिति पञ्चम्याश्छे इत्यस्याः सप्तम्याः षष्ठ्यां प्रकल्पितायाम् 'तस्मादित्युत्तरस्य' इति च्छकारस्यैव तुक् प्राप्नोतीति कस्यचिद् भ्रान्तिः स्यात्, अतस्तां निराकर्तुमाह—दीर्घात् परो यश्छकार-

Indira Gandhi National Centre for the Arts

दीर्घस्य तुगागमो भवति । ह्रीच्छति । म्लेच्छति । अपचाच्छायते । विचाच्छायते ॥

पदान्ताद्वा ॥ ७६ ॥

'दीर्घाच्छे तुक्' इति वर्त्तते । पदान्ताद्दीर्घात्परो यश्छकारस्तस्मिन्पूर्वस्य तस्यैव दीर्घस्य पूर्वेण नित्यं प्राप्तो वा तुगागमो भवति । कुटीच्छाया । कुटीछाया । कुवलीच्छाया । कुवलीछाया ।

❀ विश्वजनादीनां छन्दसि वा तुगागमो भवतीति वक्तव्यम् ❀ । विश्वजनच्छत्रम् । विश्वजनछत्रम् । नच्छायां कुरवोपराम् । नछायां कुरवोपराम् ॥

पदमञ्जरी

अन्वयो दर्शितः, प्रक्रमाभेदाय तु छकारस्य निमित्तत्वम्, दीघस्य च कार्यित्वं दर्शयति । *तस्मिन्पूर्वस्य तस्यैव दीर्घस्येति ।* अत्र च लिङ्गम्—'शाच्छा', 'विभाषासेनासुराच्छाया' इत्यादि निर्देशः, अवध्यवधिमद्भावस्य विवक्षितत्वादधिकरणभावस्य च विवक्षितत्वात् 'तस्मिन्पूर्वस्य' इति सप्तमी कृता । *ह्रीच्छतीति ।* 'ह्रीच्छ लज्जायाम्' । *म्लेच्छतीति ।* 'म्लेच्छ अव्यक्ते शब्दे' । *अपचाच्छायत इति ।* 'छो छेदने', यङ्, 'दीर्घोऽकितः' ॥

पदान्ताद्वा ॥ प्रकृतेन दीर्घेण पदविशेषणादेव तदन्तविधौ सिद्धेऽन्तग्रहणम्—पदान्तविधिरयं तुग् यथा स्यात्, पदविधिर्मा भूदिति । तेन समर्थपरिभाषानुपस्थानात्—तिष्ठतु कुमारीच्छत्रं हर देवदत्तस्येत्यत्रापि विकल्पो भवति ॥

न्यासः

तस्मिन् परतः पूर्वस्येत्यादि । एवं मन्यते—'तस्मादित्युत्तरस्य' इत्यत्र तस्मादिति योगविभागः कर्त्तव्यः, 'पूर्वस्य' इति पूर्वसूत्रादनुवर्त्तते, तेन दीर्घादित्यादौ सत्यपि पञ्चमीनिर्देशे पूर्वस्यैव कार्यं भवति, नोत्तरस्य । न चातिप्रसङ्गः; योगविभागादिष्टसिद्धेरिति । **ह्रीच्छतीति ।** 'ह्रीच्छ लज्जायाम्' । **म्लेच्छतीति ।** 'म्लेच्छ अव्यक्तायां वाचि' । **अपचाच्छायत इति ।** 'छो छेदने', 'आदेच उपदेशेऽशिति' इत्यात्वम्, यङ्, 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः ॥

पदान्ताद्वा ॥ कुटीछायेति । षष्ठीसमासः, असमासो वा ।

विश्वजनादीनामित्यादि । 'विश्वजन' इत्येवमादीनां छन्दसि विषये विकल्पेन तुग्भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम्—'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति प्राक् प्रतिपादितमेतत् । तेन विश्वजनादीनां छन्दसि वा तुग् भवतीति ॥

Indira Gandhi National Centre for the Arts

इको यणचि ॥ ७७ ॥

अचि परत इको यणादेशो भवति । दध्यत्र । मध्वत्र । कर्त्रर्थम् । हर्त्रर्थम् । लाकृतिः ।

❀ इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थं यणादेशो वक्तव्यः ❀ । भो३ इ इन्द्रम् । भो३ यिन्द्रम् ।

पदमञ्जरी

इको यणचि ॥ *इको यणादेशो भवतीति* । इकां यणां च साम्याद्यथासंख्यं भवति, आन्तर्यतो वा व्यवस्था । इक इति किम् ? व्यञ्जनस्य मा भूत्–वागत्र । कुत्वजश्त्वयोरसिद्धत्वाच्चकारस्य यकारः प्राप्नोति । यत्र च कुत्वादेरप्रसङ्गोऽपदान्ते पचतीति, तत्रापि प्रसङ्गः ? नैष दोषः; 'दीर्घात्' इति वर्त्तते, तच्च तत्रैव पञ्चमीनिर्देशेऽपि स्थानिभूतमिहापि तथैवानुवर्तते । यदि दीर्घस्य यण् भवति, कथं दध्यत्र मध्वत्रेति, 'ह्रस्वस्य' इत्येतदप्यनुवर्त्तते, तदेवं ह्रस्वदीर्घयोर्यण्विधानान्न व्यञ्जनस्य प्रसङ्गः ? प्लुतस्य च प्रकृतिभावेन भवितव्यम्, चयनम्, चायक इत्यादावेचामयादयोऽपवादाः, नाप्राप्ते तस्मिंस्तदारम्भात् ? देवेन्द्रः, खट्वौदनमित्यादौ गुणवृद्धी बाधिके भविष्यतः, यथा–सत्यपीग्ग्रहणे दधीन्द्रादौ सवर्णदीर्घत्वम्, अतो नार्थ इग्ग्रहणेन ? इदं तर्हि प्रयोजनम्–इको यणेवाचि यथा स्याद्, यद्यदन्यत्प्राप्नोति तन्मा भूदिति । किञ्चान्यत् प्राप्नोति ? शाकलम् । न च तस्याप्यत्यन्तबाधः; आरम्भसामर्थ्यात् । एवं सति सिन्नित्यसमासयोः शाकलप्रतिषेध इति यत्पूर्वाचार्यैः स्मर्यते तदनेनेग्ग्रहणेन सम्पाद्यते ।

इकः प्लुतपूर्वस्येति । प्लुतः पूर्वो यस्मात्स तथोक्तः, प्लुतात्परस्येत्यर्थः । *भो ३ इ इन्द्रेति* । भो+इ+इन्द्र इति स्थिते भोशब्दस्य गीतिवशात् प्लुतः, इकारः स्वरादिपाठान्निपातः प्रगृह्यसंज्ञकः, तस्य प्रकृतिभावे प्राप्ते यण्विधीयते, सवर्णदीर्घबाधनार्थमित्येतत्त्वाद्यप्राप्त्यभिप्रायेणोक्तम् । *प्लुतपूर्वस्येति* । प्लुतग्रहणमपि मात्रिकद्विमात्रिकव्यतिरिक्ताच्परिग्रहार्थम्, तेन चतुर्मात्रादावपि भवति,

न्यासः

इको यणचि ॥ इको यणादेशो भवतीति । इकां यणाञ्च साम्यात् यथासंख्यं भवतीति वेदितव्यम् । यश्च सवर्णोऽच् तत्र दीर्घविधानसामर्थ्यादसवर्णेऽचि यणादेशो विज्ञायत इति । इक इति किम् ? वागत्रेत्यत्र कुत्वादेव सिद्धत्वाद् यणादेशो मा भूदिति । अचीति किम् ? दधि करोति ।

प्लुतपूर्वस्येति । प्लुतः पूर्वो यस्मात् स प्लुतपूर्वः । वक्तव्यः=व्याख्येयः । तत्रेदं व्याख्यानम्—'इको यणचि' इत्यत्र तन्त्रेण द्वौ योगावुच्चारितौ; तत्रैको यणादेशार्थः, अपरस्त्विकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थो भविष्यतीति । भो यिदम्—भो+इ+

Indira Gandhi National Centre for the Arts

अचीति चायमधिकारः 'सम्प्रसारणाच्च' इति यावत् ॥

एचोऽयवायावः ॥ ७८ ॥

एचः स्थानेऽचि परतोऽय्, अव्, आय्, आव्–इत्येते आदेशा यथासंख्यं भवन्ति । चयनम् । लवनम् । चायकः । लावकः । कयेते । ययेते । वायावरुणद्धि ॥

वान्तो यि प्रत्यये ॥ ७९ ॥

योऽयमेचः स्थाने वान्तादेशः–ओकारस्य अव्, औकारस्याव्, स

पदमञ्जरी

तथा च छन्दोगा गायन्ति, सामन्येत्र चायमिष्यते, भोयिन्द्रं गायतीत्येतदपि सामगस्यानुकरणम् । एवं तावद्भाष्ये स्थितम्, वृत्तावप्येवमेव द्रष्टव्यम् ॥

वान्तो यि प्रत्यये ॥ कस्य पुनरयं वान्तादेशः ? एच इति वर्त्तते । यद्येवमेदैतोरपि प्राप्नोति—चेयम्, जेयम्, रैयतीति ? एवं तर्हि वान्तग्रहणं न करिष्यते, 'एचोऽयवायावः' इत्येव । इहापि तर्ह्ययादेशः प्राप्नोति—चेयम्, जेयमिति ? 'क्षय्यजय्यौ शक्यार्थे', 'क्रय्यस्तदर्थे' इत्येतन्नियमार्थं भविष्यति—एचौ यदि भवति क्षिज्योरेवेति । एवमपि रैयतीत्यत्रायादेशः प्राप्नोति ? रैशब्दश्छान्दसः, 'दृष्टानुविधिश्छन्दसि' । भाषायां तु रैशब्दप्रयोगो भाष्यविरोधादसाधुः । यद्येवं नियम आश्रयिष्यते—अनौष्ठ्यस्य यदि भवति क्षिज्योरेवेति; ततः 'शक्यार्थे' इति द्वितीयो योगः, क्षिज्योरपि शक्यार्थ एवेति ? सिध्यति; सूत्रस्य तु को निर्वाहः ? उच्यते; वान्तशब्दोऽयं सन्निहिते वान्ते वर्त्तते, न यत्र कुत्रचित्; सन्निहितश्चौदौत्स्थानिकः पूर्वत्र, यथासंख्यसम्बन्धात् । तत्र यथा यः कश्चन

न्यासः

इदमिति स्थिते 'गुरोरनृतोऽनन्तस्याप्येकैकस्य प्राचाम्' इत्यनेन दूराद्धूतेऽर्थे भोशब्दस्य प्लुतः कृतः, ततः सवर्णदीर्घत्वे प्राप्ते यणादेशः ॥

एचोऽयवायावः ॥ कयेते, ययेत इति । के+एते, ये + एत इति स्थितेऽयादेशः । **वायावरुणद्धीति** । वायौ+अवरुणद्धीति स्थित आवादेशः ॥

वान्तो यि प्रत्यये ॥ यीति वर्णग्रहणम्, तेन 'यस्मिन् विधिस्तदादावल्ग्रहणे' इति यकारादौ प्रत्यये कार्यं विज्ञायत इत्यत आह—**यकारादौ प्रत्यय इति** । यद्यपीह स्थानी न निर्दिष्टः, तथाप्यवादेश ओकारस्य स्थाने, आवादेशोऽप्यौकारस्य स्थाने भवतीति वेदितव्यम् । कथम् ? पूर्वयोगे हि यद्धर्मा वान्त आदेशो दृष्टः, इहापि तद्धर्मैवानुवर्त्तते । कश्च पूर्वयोगे तद्धर्मा दृष्टः ? अवादेशस्यौकारस्य स्थानित्वम् । आवादेशस्याप्यौकारस्य स्थानित्वम् ; अत इहापि स्वधर्ममजहतोऽनुवृत्तस्य वान्ता-

Indira Gandhi National Centre for the Arts

यकारादौ प्रत्यये परतो भवति। बाभ्रव्यः। माण्डव्यः। शङ्कव्यं दारु। पिचव्यः कार्पासः। नाव्यो ह्रदः।

वान्त इति किम्? रायमिच्छति रैयति। यीति किम्? गोभ्याम्, नौभ्याम्। प्रत्यय इति किम्? गोयानम्, नौयानम्।

❀ गोर्यूतौ छन्दसि ❀। गोशब्दस्य यूतौ परतश्छन्दसि विषये वान्तादेशो वक्तव्यः। आनो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्।

छन्दसीति किम्? गोयूतिः।

❀ अध्वपरिमाणे च ❀। गोर्यूतौ परतो वान्तादेशो वक्तव्यः। गव्यूतिमात्रमध्वानं गतः॥

धातोस्तन्निमित्तस्यैव ॥ ८० ॥

पदमञ्जरी

वान्तादेशो न भवति, तथान्यस्थानिको न भविष्यति; विशिष्टस्यैव सन्निधानात्। तदिदमुक्तम्—*योऽयमेचः स्थाने इति। बाभ्रव्य इति।* 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' इति यञ्। मण्डुशब्दो गर्गादिः। शङ्कुपिचुशब्दाभ्याम् 'तदर्थं विकृतेः प्रकृतौ' इत्यत्रार्थे 'उगवादिभ्यो यत्'। नावा तार्यं नाव्यम्, 'नौवयोधर्म' इत्यादिना यत्।

अध्वपरिमाणे चेति। भाषार्थमिदम्। गव्यूतिः = क्रोशयुगम्॥

धातोस्तन्निमित्तस्यैव॥ धातोरिति किमिति। न तावदविशेषेण नियमप्रसङ्गः—

न्यासः

देशस्य पूर्वक एव स्थानी विज्ञायते। **बाभ्रव्य इति।** बभ्रुशब्दादपत्येऽर्थे 'मधुबभ्र्वोर्ब्राह्मणकौशिकयोः' इति यञ्, 'ओर्गुणः' इति गुणः। **माण्डव्य इति।** 'गर्गादिभ्यो यञ्' इति यञ्। **शङ्कव्यमिति।** शङ्कुशब्दाद् 'तस्मै हितम्' इति 'उगवादिभ्यो यत्' इति यत्। **नाव्य इति।** नावा तार्यत इति 'नौवयोधर्मविष' इत्यादिना यत्।

रैयतीति। 'सुप आत्मनः क्यच्' इति क्यच्। **गोयानमिति।** षष्ठीसमासः।

गोर्यूतौ छन्दसीत्यादि। वक्तव्यशब्दस्य व्याख्येय इत्येषोऽर्थो वेदितव्यः। तत्रेदं व्याख्यानम्—'वान्तो यि' इति योगविभागोऽत्र क्रियते, तेन गोशब्दस्य यूतौ परतश्छन्दसि विषयेऽवादेशो भवति।

अध्वपरिमाणे चेति। 'गोर्यूतौ' इति वर्त्तते। तत्रापि वक्तव्यशब्दस्य स एवार्थः। व्याख्यानमपि तदेव। इदञ्च सामान्येन वचनम्, तेन भाषायामप्यध्वपरिमाणे भवति॥

धातोस्तन्निमित्तस्यैव॥ पूर्वेणैव सिद्धे नियमार्थं वचनम्। तन्निमित्तस्येति।

Indira Gandhi National Centre for the Arts

'एचः' इति वर्त्तते । 'वान्तो यि प्रत्यये' इति च । धातोर्य एच् तन्निमित्तो यकारादिप्रत्ययनिमित्तस्तस्य यकारादौ प्रत्यये परतो वान्तादेशो भवति । लव्यम् । पव्यम् । अवश्यलाव्यम् । अवश्यपाव्यम् ।

धातोरिति किम् ? प्रातिपदिकस्य नियमो मा भूत् । तत्र को दोषः ? बाभ्रव्य इत्यत्रैव स्यात्, इह न स्याद्—गव्यम्, नाव्यमिति ।

तन्निमित्तस्येति किम् ? अतन्निमित्तस्य मा भूत्—उपोयते ।

पदमञ्जरी

यि प्रत्यये यदि भवति तन्निमित्तस्यैवेति; एवं हि 'वान्तो यि प्रत्यये तन्निमित्तस्य' इति विशिष्टविधिराश्रयणीयः, योगविभाग एवकारो नियम इति सर्वमेतदनर्थकमापद्येत । तस्मादसत्यपि धातुग्रहणे विशिष्टविषयो नियमो भविष्यतीति प्रश्नः । स तु विशिष्टो विषयः प्रातिपदकमपि सम्भाव्येतेत्युत्तरम् । *बाभ्रव्य इत्यत्रैव स्यादिति* । एचस्तन्निमित्तत्वात् । *अत्र न स्यादिति* । विपर्ययात् । *उपोयत इति* । वेञः कर्मणि लट , आत्मनेपदम्, यक्, यजादित्वात्संप्रसारणम्, 'अकृत्सा-

न्यासः

तच्छब्देन यकारादिप्रत्ययः प्रत्यवमृश्यते, स निमित्तं यस्य स तथोक्तः । **लव्यमिति** । 'अचो यत्' इति यत्, तमेव यकारमाश्रित्य 'सार्वधातुकार्धधातुकयोः' इत्योकारो विधीयमानस्तन्निमित्तो भवति । **अवश्यलाव्यमिति** । 'ओरावश्यके' इति ण्यत्, मयूरव्यंसकादयश्च' इति समासः, 'लुम्पेदवश्यमः कृत्ये' इति मकारलोपः । अत्रापि ण्यतमाश्रित्य 'अचो ञ्णिति' इति विधीयमान औकारस्तन्निमित्तो भवतीति ।

प्रातिपदिकस्य नियमो मा भूदिति । असति हि धातुग्रहणे प्रातिपदिकस्यापि नियमः स्यात् । ननु च प्रातिपदिकस्यापि नियम एतन्निमित्तस्यैव भवति, नातन्निमित्तस्येत्ययमर्थः स्यात्, तथा च—पूर्वसूत्रस्यारम्भोऽनर्थकः स्यात्, निर्विषयत्वात् ? नैष दोषः; यो हि धातोरिति किमिति पृच्छति स पूर्वयोगस्यारम्भं पृथङ् नेच्छत्येव । स ह्येवं मन्यते—'वान्तो यि प्रत्यये' तन्निमित्तस्यैवेत्येको योगः कर्त्तव्य इति । तत्र को दोष इति प्रातिपदिकनियमे सति यदि कश्चिद् दोष आपद्येत ततस्तन्निवृत्तये क्रियमाणं धातुग्रहणं शोभत इत्यभिप्रायः । **बाभ्रव्य इत्यत्रैव स्यादिति** । एचस्तन्निमित्तत्वात् । **इह तु न स्यात्—गव्यम्, नाव्यमिति** । अतन्निमित्तत्वादेचः ।

उपोयत इति । वेञ एच आत्वे कृत उपपूर्वाल्लट्, 'भावकर्मणोः' इत्यात्मनेपदम्, 'सार्वधातुके यक्' इति यक्, यजादित्वात् सम्प्रसारणम्, 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः, उपाकारेण सह 'आद्गुणः' । **औयत इति** । तस्यैव धातोर्लङ्, पूर्ववदात्मनेपदादि, 'आडजादीनाम्' इत्याट्, 'आटश्च' इति वृद्धिः । अयमौकारः पूर्वक ओकारश्च

Indira Gandhi National Centre for the Arts

औयत । लौयमानिः । पौयमानिः । 'अत इञ्' ।

एवकारकरणं किम् ? धात्ववधारणं यथा स्यात्, तन्निमित्तावधारणं मा भूदिति तन्निमित्तस्य हि धातोश्चाधतोश्च भवति—बाभ्रव्यः, अवश्यलाव्यम्, लव्यम् ॥

पदमञ्जरी

र्वधातुकयोः' इति दीर्घः, 'आद्गुणः', तस्य परं प्रत्यादिवद्भावाद्धातुग्रहणेन ग्रहणम् । *ओयते इति* । कर्मण्येव लङ् । *लौयमानिरिति* । 'अत इञ्', आदिवृद्धिः । ननु चात्र गुणः पदद्वयापेक्षत्वाद्बहिरङ्गः, वृद्धिरपि बाह्यतद्धितापेक्षत्वाद्बहिरङ्गैव ? सत्यम्; औयतेत्यत्रैतदुभयं नास्ति, तदर्थमवश्यं योग आरब्धव्यः, आरब्धेनैव सिद्धत्वादुपोयते इत्यादिकं प्रत्युदाहृतम् ।

एवकारकरणं किमिति । सिद्धे सत्यारम्भो नियमार्थत्वे हेतुः, न त्वेवकारकरणमपीति प्रश्नः । इष्टतोऽवधारणार्थ इत्युत्तरम् ॥

न्यासः

एतदुभयमप्यतन्निमित्तम्, एतस्य मा भूदित्येवमर्थं तन्निमित्तग्रहणम् । ननु चान्तरङ्गो यणादेशो वर्णमात्राश्रयत्वात्, बहिरङ्गस्त्वेकादेश उभयपदाश्रयत्वात्, ततश्च 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यसिद्धत्वादेवात्र न भविष्यति ? एवं तर्ह्येतज्ज्ञापयति—नेयमिह परिभाषोपतिष्ठत इति । तेनाक्षद्यूरित्यत्र बहिरङ्गोऽप्यूडादेशोऽन्तरङ्गे यणादेशे कर्त्तव्ये नासिद्धो भवति; अन्यथा यद्ययमर्थो न ज्ञाप्येत तदाक्षैर्दीव्यतीति क्विपि कृते 'च्छ्वोः शूडनुनासिके च' इत्यूडादेशे कृते तस्यासिद्धत्वाद् यणादेशो न स्यात् । *लौयमानिरिति* । लूयमानस्यापत्यमित्यर्थे 'अत इञ्' इतीञ्, 'तद्धितेष्वचामादेः' इति वृद्धिः, सा च तद्धितनिमित्ता, न तु यकारादिप्रत्ययनिमित्ता ।

सिद्धे हि विधिरारभ्यमाणः विनाप्येवकारकरणं नियमार्थो भविष्यतीत्यभिप्रायेणाह—**एवकारः किमिति** । इष्टतोऽवधारणार्थमेवकारकरणं क्रियत इति दर्शयन्नाह—**धात्ववधारणमित्यादि** । एवकारे तन्निमित्तशब्दानन्तरमुच्चार्यमाणे यत एवकारकरणं ततोऽन्यत्रावधारणार्थमिति धात्ववधारणं भवति । असति ह्येवकारकरणे धातोरेव तन्निमित्तस्येति तन्निमित्तावधारणमप्यनिष्टं विज्ञायेत । तस्माद् धात्ववधारणं यथा स्यात्, तन्निमित्तावधारणं मा भूदित्येवमर्थमेवकारकरणम् । किं पुनर्धात्ववधारणे सतीष्टं रूपं सिध्यति यतस्तदिष्यते ? इत्यत आह—**तन्निमित्तस्य हीत्यादि** । धात्ववधारणे हि सति तन्निमित्तस्यानियतत्वादधातोश्च भवति—बाभ्रव्य इति, धातोश्च भवति—लव्यम्, अवश्यलाव्यमिति । यदि तन्निमित्तावधारणं कृतं स्यात् तदा धातोरेव तन्निमित्तस्येति । ततो बाभ्रव्य इत्यत्र न स्यात्, न हि बभ्रुशब्दो धातुः । तस्माद्धात्ववधारणमितीष्यते ॥

Indira Gandhi National Centre for the Arts

क्षय्यजय्यौ शक्यार्थे ॥ ८१ ॥

'क्षि' 'जि'–इत्येतयोर्धात्वोर्यति प्रत्यये परतः शक्यार्थे गम्यमाने एकारस्यायादेशो निपात्यते। शक्यः क्षेतुं क्षय्यः। शक्यो जेतुं जय्यः।

शक्यार्थ इति किम् ? क्षेयं पापम्। जेयो वृषलः ॥

क्रय्यस्तदर्थे ॥ ८२ ॥

पदमञ्जरी

क्षय्यजय्यौ शक्यार्थे ॥ उदाहरणे शक्यार्थे कृत्यः, प्रत्युदाहरणे त्वावश्यके ॥

क्रय्यस्तदर्थे ॥ क्रय्य इत्यत्र प्रत्ययार्थश्च कर्म विद्यते, कर्मणि कृत्यविधानात् प्रकृत्यर्थश्च द्रव्यविनिमयः, तत्र प्रत्ययार्थः प्रधानम्, प्रकृत्यर्थस्तूपसर्जनम्, तत्र यदि प्राधान्यात्तदित्यनेन प्रत्ययार्थः परामृश्येत, तदयुक्तम्; तथाहि यदि स एवार्थस्तदर्थ इति तत्पुरुष आश्रीयते ? तदावश्यमेव क्रय्यशब्दस्य तस्मिन्नर्थे वृत्तेर्नार्थस्तदर्थग्रहणेन। अथ सोऽर्थो यस्य तदर्थः शब्दस्तस्मिन्नभिधेय इत्यर्थः ? तदप्ययुक्तम्; शब्दस्य वृत्त्यसम्भवात्। अतो गुणीभूतोऽपि प्रकृत्यर्थ एव निर्दिश्यत

न्यासः

क्षय्यजय्यौ शक्यार्थे ॥ 'क्षि', 'जि' इत्येतयोर्धात्वोरिति। क्षिग्रहणेन 'क्षि क्षये' 'क्षि निवासगत्योः' 'क्षिष् हिंसायाम्' इत्येतेषां ग्रहणम्, जिग्रहणे तु 'जि जये' इत्येतस्य। ननु च 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इत्यनया परिभाषया 'क्षिष् हिंसायाम्' इत्यस्य ग्रहणं न प्राप्नोति ? नैष दोषः; निपातनाद् भविष्यति। किं हि निपातनान्न लभ्यते ? यथैव हि ततोऽन्यदलाक्षणिकं कार्यं किञ्चिद् भविष्यति, तथेदमपि स्यात्। अर्थग्रहणं कर्मण्यपि यथा स्यात्; अन्यथा शकेरकर्मकत्वाद् भाव एव निपातनं विज्ञायेत–क्षय्यं देवदत्तेनेति। कर्मणि तु न स्यात्–क्षय्यो व्याधिरिति, न ह्यकर्मकेभ्यः कर्मणि कृत्यप्रत्यय उपपद्यते। अर्थग्रहणेन तु कृत्यार्थ उपलक्ष्यते। कृत्याश्च कर्मण्यपि विहिताः, तेन तत्रापि निपातनाद्विज्ञायते ॥

क्रय्यस्तदर्थे ॥ **क्रय्य इति**। अत्र प्रत्ययार्थश्च कर्म विद्यते; कर्मणि कृत्यविधानात्। प्रकृत्यर्थश्च विनिमयः; क्रीणातेर्विनिमयार्थत्वात्। तत्र प्रत्ययार्थः प्रधानम्, 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति कृत्वा। प्रकृत्यर्थस्तूपसर्जनम्, प्रत्ययार्थविशेषणमिति कृत्वा। तत्र यदि प्रधानत्वात् तदित्यनेन प्रत्ययार्थो निर्दिश्येत तदायमर्थः स्यात्–स क्रय्योऽर्थो यस्य शब्दस्य स तदर्थः, तस्मिन्नभिधेये क्रय्य इत्येष शब्दो निपात्यत इति ? अयुक्तश्चायम्; न ह्यत्र क्रय्यशब्दस्य क्रय्यार्थः कश्चिच्छब्दोऽभिधेयोऽस्ति, ततस्तस्याप्रतीतेः। अथैव विज्ञायेत—स एवार्थस्तदर्थ इति ? एवमपि तदर्थग्रहणमनर्थकम्। अवश्यमेव हि क्रय्यशब्दो यत्प्रत्ययान्तस्तस्मिन् यत्प्रत्ययार्थे वर्त्तते। तस्मात् तच्छब्देन प्रधाननिर्देशे सति तदर्थग्रहणस्यानर्थक्यम्। अतो गुणभूतोऽपि प्रकृत्यर्थो निर्दिश्यत

Indira Gandhi National Centre for the Arts

क्रीणातेर्धातोस्तदर्थे क्रयार्थं यत्तस्मिन्नभिधेये यति प्रत्यये परतोऽयादेशो निपात्यते । क्रय्यो गौः । क्रय्यः कम्बलः । क्रयार्थं यः प्रसारितः स उच्यते ।

तदर्थ इति किम् ? क्रेयं नो धान्यम्, न चास्ति क्रय्यम् ॥

भय्यप्रवय्ये चच्छन्दसि ॥ ८३ ॥

बिभेतेर्धातोः प्रपूर्वस्य च 'वो' इत्येतस्य यति प्रत्यये परतश्छन्दसि विषयेऽयादेशो निपात्यते। भय्यं किलासीत्। वत्सतरी प्रवय्या। भय्येति 'कृत्यल्युटो बहुलम्' इत्यपादाने यत्प्रत्ययः। बिभेत्यस्मादिति भय्यम्। 'प्रवय्या' इति स्त्रियामेव निपातनम्। अन्यत्र प्रवेयमित्येव भवति।

छन्दसीति किम् ? भेयम् । प्रवेयम् ।

❀ ह्रदय्या आप उपसंख्यानम् ❀ । ह्रदय्या आपः । ह्रदे भवा—'भवे छन्दसि' इति यत्प्रत्ययः ॥

पदमञ्जरी

इति दर्शयति—*तदर्थं क्रयार्थं यत्तस्मिन्नभिधेय इति । क्रयार्थं यः प्रसारित इति ।* क्रेतारः क्रीणीयुरिति बुद्ध्याऽऽपणे यद्व्यवस्थापितमित्यर्थः । *क्रेयमिति ।* मूल्येनोपादेयमित्यर्थः ।

न चेहास्ति क्रय्यमिति । आपणे विक्रयाय प्रसारितं धान्यं नास्तीत्यर्थः । केचित्तु क्रय्यशब्दे क्रीणातिर्विक्रये वर्त्तत इत्याहुः । तेनापणे विक्रयाय प्रसारितं द्रव्यम् 'क्रय्यम्' इत्युच्यते ॥

भय्यप्रवय्ये चच्छन्दसि ॥ वीत्येतस्येति । 'वी गत्यादिषु', 'अजेर्व्यघञपोः' इति वा ।

ह्रदय्या इति । आकारस्यायादेशः ॥

न्यासः

इति मत्वाऽऽह—**तदर्थे क्रयार्थं यत् तस्मिन्नभिधेय इति ।** तस्मै इदं तदर्थम् । क्रयार्थमित्यनेन क्रीणात्यर्थस्तच्छब्देन निर्दिश्यत इति दर्शयति । क्रयणं क्रयः, विनिमय इत्यर्थः । क्रयार्थमित्यत्रापि चतुर्थीसमास एव—क्रयाय इदं क्रयार्थम् । **क्रयार्थं यः प्रसारित इति ।** विनिमयार्थं य उपन्यस्त इत्यर्थः ।

क्रेयं नो धान्यमिति । क्रेतव्यम्=ग्रहीतव्यम्, स्वीकर्त्तव्यमित्यर्थः । **न चास्ति क्रय्यमिति ।** न चात्र क्रयार्थमुपन्यस्तं धान्यमस्तीत्यर्थः ॥

भय्यप्रवय्ये च च्छन्दसि ॥ वी इत्येतस्येति । गतिप्रजनादिषु यो वी पठ्यते तस्य, 'अजेर्व्यघञपोः' इत्यजेर्यो वी आदेशस्तस्य वा ।

ह्रदय्या आप उपसंख्यानमिति । उपसंख्यानशब्दस्य प्रतिपादनमर्थः । **ह्रदय्या**

Indira Gandhi National Centre for the Arts

एकः पूर्वपरयोः ॥ ८४ ॥

अधिकारोऽयम् । 'ख्यत्यात्परस्य' इति प्रागेतस्मात्सूत्रादित उत्तरं यद्वक्ष्यामस्तत्र पूर्वस्य परस्य द्वयोरपि स्थाने एकादेशो भवतीत्येतद् वेदितव्यम् । वक्ष्यति—'आद्गुणः' इति । तत्राचि पूर्वस्यावर्णाच्च परस्य स्थाने एको गुणो भवति–खट्वेन्द्रः, मालेन्द्रः ।

पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थम् । एकस्यैव हि स्यात्, नोभे सप्तमीपञ्चम्यौ युगपत्प्रकल्पिके भवत इति ।

पदमञ्जरी

एकः पूर्वपरयोः ॥ वक्ष्यमाणप्रकरणे पौर्वापर्येणावस्थितौ निर्दिश्येते—आदचि, आदेचीत्यादि, तयोः पूर्वपरयोः स्थाने वक्ष्यमाणो गुणादिरेकादेशो भवतीति सूत्रार्थः ।

अथ पूर्वपरयोरिति किमर्थम् ? स्थानिनिर्देशार्थम्, असति हि तस्मिन् 'आद्गुणः' इत्यादौ स्थानिनिर्देशाभावात् कस्य गुणादिरादेशः स्यात् । नैतदस्ति प्रयोजनम्, आदित्यादिका पञ्चमी अचीत्यादिकायाः सप्तम्याः षष्ठीं प्रकल्पयिष्यति, सा च तस्यास्तेन तयोरेव पूर्वपरयोर्गुणो भविष्यतीति नार्थ एतेन ? तदाह—*पूर्वपरग्रहणमित्यादि* । *द्वयोरादेशप्रतिपत्त्यर्थमिति* । युगपदादेशप्रतिपत्त्यर्थमित्यर्थः । असति तु तस्मिन्कस्य स्यात् ? इत्यत आह–*एकस्यैव स्यादिति* । ननु द्वयोरपि षष्ठीप्रक्लृप्तिरुक्ता ? तत्राह—*नोभे सप्तमीपञ्चम्याविति* । नोभे प्रकल्पिके भवतः, युगपन्न प्रकल्पिके भवत इत्यर्थः । इतिकरणो हेतौ । तत्र 'आद्गुणः' इत्यत्राचीत्येषा सप्तमी यणादिविधौ चरितार्था; आदित्येषा तु

न्यासः

इत्यस्य प्रतिपादनं कर्त्तव्यमित्यर्थः । तत्रेदं प्रतिपादनम्—चकारोऽत्र क्रियते, स चानुक्तसमुच्चयार्थः, तेन हृदय्या इत्यपि भविष्यतीति ॥

एकः पूर्वपरयोः ॥ अथ पूर्वपरग्रहणं किमर्थम्, यावता 'आद्गुणः' इत्यादावादित्येषा पञ्चमी अचीत्यस्याः सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यतीति; 'तस्मादित्युत्तरस्य' इति वचनात् । तथाचीत्येषा सप्तम्यादित्यस्याः पञ्चम्याः षष्ठीत्वं प्रकल्पयिष्यति; 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति वचनात् । तत्रान्तरेणापि पूर्वपरग्रहणं पूर्वपरयोर्द्वयोरपि भविष्यति ? इत्याह—**पूर्वपरग्रहणमित्यादि** । किं पुनः कारणमसति पूर्वपरग्रहणे द्वयोरपि युगपदादेशो न सिध्यति ? इत्यत आह—**एकस्यैव हीत्यादि** । एवं मन्यते—अचीत्येषा सप्तमी यणादेशादिविधौ चरितार्था; आदित्येषा तु पञ्चमी न क्वचिच्चरितार्था, अतः सा सप्तम्याः षष्ठीत्वं प्रकल्पयेत् । तत्रासति पूर्वपरग्रहणेऽच एव स्थाने गुणः स्यात् । 'वृद्धिरेचि' इत्यत्र च गुणविधावादिति पञ्चमी कृतार्थेति तस्या एचीति

Indira Gandhi National Centre for the Arts

एकग्रहणं पृथगादेशनिवृत्त्यर्थम्, स्थानिभेदाद्धि भिन्नादिषु नत्ववद् द्वावादेशौ स्याताम् ॥

पदमञ्जरी

पञ्चमी न क्वचिच्चरितार्था, ततश्च सैव सप्तम्याः षष्ठीं प्रकल्पयिष्यति इत्यच एव स्थाने गुणः स्याद् । 'वृद्धिरेचि' इत्यत्र तु गुणविधौ पञ्चमी कृतार्थेति तस्याः 'एचि' इति सप्तम्यकृतार्था षष्ठीं प्रकल्पयेदित्यवर्णस्यैव वृद्धिः स्यात् । 'उपसर्गादृति धातौ' इत्यादौ द्वयोरप्यकृतार्थत्वेऽपि पर्यायेण परस्परषष्ठी-प्रक्लृप्तिः स्यात्, न युगपत्कार्यित्वं निमित्तत्वं च; द्वयोर्युगपद्विरोधात्, ततश्च कार्यमपि पर्यायेण स्यात् । तस्मात्पूर्वपरयोरिति वक्तव्यम् ? न वक्तव्यम् ; एक-ग्रहणसामर्थ्याद् । 'अन्तादिवच्च' इति वचनाच्च पूर्वपरयोर्द्वयोरेवादेशो भविष्यति, नान्यतरस्य ? सत्यम् ; सुखप्रतिपत्त्यर्थं तु पूर्वपरयोरित्युक्तम् ; अन्यथा युगपत् षष्ठीप्रकल्पनद्वारेण विवक्षितप्रतिपत्तौ प्रतिपत्तिगौरवं स्यात् ।

अथ किमर्थमेकग्रहणम्, प्रथमनिर्दिष्टमतिक्रम्य चरमनिर्दिष्टस्य 'पूर्वपरयोः' इत्यस्य प्राक् प्रयोजनमुक्तम् ; पाठक्रमादर्थक्रमस्य बलीयस्त्वात । कथम् ?

न्यासः

सप्तम्यकृतार्था षष्ठीत्वं प्रकल्पयेत् । एवञ्च वृद्धिरवर्णस्यैव प्रसज्येत । 'उपसर्गादृति धातौ' इत्यत्र द्वयोरपि पञ्चमीसप्तम्योरकृतार्थत्वात् पर्यायेण परस्परं षष्ठीप्रकल्पनेति पर्यायेणैव वृद्धिः स्यात् । यत् पुनः परस्याभिमतं पञ्चमी सप्तम्याः षष्ठीत्वं प्रकल्पयिष्यति, सप्तम्यपि पञ्चम्याः, ततोऽन्तरेणापि पूर्वपरग्रहणं द्वयोरप्यादेशो भविष्यतीति ? तन्निरासायाह—नोभे इत्यादि । निवृत्तिधर्मा हि स्थानी भवति, श्रूयमाणस्य च षष्ठीप्रकल्पनं प्रति निमित्त-भावः । कथं पूर्वपरौ निवर्त्तयाताम् ? षष्ठीप्रकल्पनं च प्रति निमित्तभावमुपगच्छेताम् ? अत एवानिवृत्तेर्निमित्तभावस्य चासम्भवान्नोभे सप्तमीपञ्चम्यौ युगपत्प्रकल्पिके भवतः । तस्मादेकस्यैव स्यात्, नोभयोः ।

अथैकग्रहणं किमर्थम्, यावता 'भ्रस्जो रोपधयो रमन्यतरस्याम्' इत्यत्र विनाप्येकग्रहणमेक एव सम्भवति, तथाप्यत्रैकग्रहणेन विनाप्येक एव भविष्य-तीत्याह—एकमित्यादि । रमागमेन हि मित्त्वात् 'मिदचोऽन्त्यात् परः' इत्यचो-ऽन्त्यात् परेण भवितव्यम् । न च द्वयोरमोर्भृज्जतावचोऽन्त्यात् परेण सम्भवोऽस्ति । ततो युक्तं तद्विनाप्येकग्रहणम् । एक एव रम् भवतीति गुणादिस्त्वादेशः । सम्भवति च स्थानिभेदे सत्येकैकस्य स्थानिनो गुणादिः पृथगादेशः । तत्रासत्येकग्रहणे पृथगादेशः स्यात् । तस्मात् पूर्वपरयोर्द्वयोः स्थानिनोः पृथगादेशो मा भूदित्येवमर्थमेक-ग्रहणम् । असति पुनरेकग्रहण आदेशश्च द्वयं प्राप्नोतीत्यमुमर्थं सोपपत्तिकं प्रतिपाद-यितुमाह—स्थानिभेदाद्धीत्यादि । यथा 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति स्थानिभेदाद्धेतोर्भिन्नं छिन्नमित्येवमादिषु द्वावेवादेशौ भवतः, तथा खट्वेन्द्र इत्येव-मादिष्वपि द्वावादेशौ स्याताम् ॥

Indira Gandhi National Centre for the Arts

पदमञ्जरी

सतः कार्यिणः कार्येण भवितव्यम्, कार्यस्य च गुणादेर्विशेषणमेकग्रहणम्। ननु च 'आद्गुणः' इत्यादावेकस्यैवादेशस्य सूत्रे उपादानम्, संख्याया विवक्षितत्वादुपात्तसंख्यात्यागे कारणाभावात्, ततश्चैक एव गुणादिरादेशो भविष्यति। स्यादेतत्—आदेशस्य विधेयतया प्राधान्यात् प्रधाने च ग्रहं सम्मार्ष्टीत्यादौ संख्याया अविवक्षितत्वादनेकादेशप्रसङ्ग इति? तदसत्; ग्रहं शेषितयोद्दिश्य सम्मार्गो हि विधीयते, शास्त्रान्तरे च विहितं शेषित्वमुपगच्छति, शास्त्रान्तरे च विज्ञाता ग्रहाः संख्यान्तरान्विताः, तत्रैकत्वविवक्षायां वाक्यभेदः प्रसज्येतेति कृत्वा ग्रहैकत्वमविवक्षितमुच्यते। नैवं गुणादिरादेश इत्येकत्वं विवक्षितम्; 'प्राजापत्या नव ग्रहाः' इति शास्त्रान्तरविहितनवग्रहोद्देशेन संस्कारः सम्मार्गो विधीयते, तत्र श्रुतमप्येकत्वं नोद्देश्यकोटौ निवेशयितुं शक्यते; तत्र संख्यान्तरान्विततया विहितत्वात्। ततश्च तद्विवक्षायां तदपि विधेयं स्यात्, ततश्च वाक्यभेदप्रसङ्गः। वचनव्यक्तिभेदाद्यो ग्रहस्तं सम्मार्ष्टि, तं चैकमिति। इह तु विधेयतया गुणादेः प्राधान्येऽपि विशिष्टविधिसम्भवाद् न वाक्यभेदप्रसङ्गः, अविवक्षाकारणाभावाद्विवक्षितमेकत्वं लोकवत्, तद्यथा—लोकेऽनयोर्मृत्पिण्डयोर्घटं कुर्विति, न चोच्यते एकमिति, एकमेव चासौ करोति। न चार्थप्रकरणादिना तत्रैकस्य करणम्, तदभावेऽपि दर्शनात्तस्मान्नार्थ एकग्रहणेन? तत्राह—*एकग्रहणं पृथगादेशनिवृत्त्यर्थमिति*। यथा पुनः पृथगादेशप्रसङ्गस्तथा दर्शयति—*स्थानिभेदादिति*। 'पूर्वपरयोः' इति निर्देशात्स्थानिभेदः प्रतीयते, ततश्च तद्वशादादेशेऽपि श्रुतमप्येकत्वमविवक्षितं स्यादित्यनेकादेशप्रसङ्ग इत्यर्थः। अवश्यं चैतदेवमभ्युपगन्तव्यमिति दृष्टान्तेन दर्शयति। *भिन्नादिषु नत्ववदिति*। यथा 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति नत्वमेकत्वाविवक्षया प्रतिस्थानि भवति, तद्वदत्रापीत्यर्थः।

भाष्ये त्वेकग्रहणं प्रत्याख्यातम्। न तावद् गुणभूतस्थान्यनुरोधेन प्रधानस्यादेशस्य भेदकल्पना युक्ता, प्रधानानुरोधी हि गुणो भवति, न पुनर्गुणानुरोधी प्रधानम्। यच्चोक्तम्—भिन्नादिषु नत्ववदिति, तत्र न खलु नत्वविधावेकत्वस्याविवक्षिततया द्वौ नकारौ भवतः, किं तर्हि? पूर्वस्य चेति चकाराद्वाक्यभेदोऽवगम्यते। तत्र पूर्वेण निष्ठातो नत्वम्, परेण धातुदकारस्य, इह च 'उभौ साभ्यासस्य' इति प्राणिणिषतीत्युपसर्गादनन्तरस्य नकारस्य 'अनितेः' इत्येव णत्वे सिद्धे साभ्यासस्येत्येतावतैव द्वयोर्नकारयोर्णत्वं सिद्धमिति स्थानिनिर्देशार्थमुभौग्रहणं न कर्त्तव्यम्—उभौ नकारौ णत्वमापद्येते इति। तस्मादादेशार्थमुभौग्रहणं विज्ञायते—साभ्यासस्यानितेर्यौ नकारौ द्वौ तयोरुभौ णौ भवत इति। तेनात्रापि नैकत्वस्याविवक्षितत्वाद् द्वयोर्द्वौ भवतः, किन्तूभौग्रहणादिति न कश्चिद्दोषः।

Indira Gandhi National Centre for the Arts

अन्तादिवच्च ॥ ८५ ॥

'एकः' इति वर्त्तते, 'पूर्वपरयोः' इति च। 'एकः पूर्वपरयोः'

पदमञ्जरी

इह श्रुतिस्मृतिविहितं कर्म किञ्चित्सकृदनुष्ठीयते, यथा–उपनयनम्, आधानम्, आचमनमिति; न ह्युपनीतः पुनरुपनीयते, नाप्यग्न्याहितः पुनरग्नीनाधत्ते, नाप्याचान्तः पुनराचामति। असति निमित्ते, किञ्चिदसकृद्यथा—ज्योतिष्टोमादयः। यथा–'पूर्ववया ब्राह्मणः प्रत्युत्थेयः' इति यो यो वृद्धवयास्तस्य तस्यागमनं प्रत्युत्थीयते। 'ब्राह्मणो न हन्तव्यः', 'सुरा न पेया' इति प्रतिव्यक्तिनिषेधोऽनुष्ठीयते, न पुनरेकं ब्राह्मणमहत्वैकां च सुरामपीत्वान्यत्र कामचारः। व्याकरणं च स्मृतिः, तदिह 'आद्गुणः' इत्यनया स्मृत्या 'गुणः कर्त्तव्यः' इति चोदिते यदि सकृदनुष्ठानं खट्वेन्द्र इत्येकस्यां व्यक्तौ गुणे कृते कृतः शास्त्रार्थ इति कृत्वा मालेन्द्र इत्यादिषु न क्रियेत, तस्मात्प्रत्युत्थानादिवदावर्त्तते। किं पुनरत्र निबन्धनम्—किञ्चित्सकृत्क्रियते, किञ्चित्पुनः पुनरिति? उपनयनं तावन्माणवकस्य संस्कारः, सकृच्चासौ संस्कृतोऽध्ययनादिषु योग्यो भवति, आधानमप्यग्निसंस्कारार्थम्, सम्पन्नेष्वग्निषु प्रयोजनाभावात्पुनर्न क्रियते, आचमनमपि शौचार्थमित्य सति निमित्ते पुनर्न क्रियते। ज्योतिष्टोमादयस्तु नित्याश्चेत्प्रत्यवायपरिहाराय वसन्ते क्रियन्ते; अथ काम्याः 'अमुष्मिन् लोक एनमप्सरसो जाया भूत्वोपशेरते इति ततस्तमभ्युदयम्', भूयोभूयः परीप्सुभिः पुनःपुनरनुष्ठीयन्ते। पूर्ववयोब्राह्मणप्रत्युत्थानाकरणे दोषः, करणे चाभ्युदयो दर्शितः—

'ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते'॥ इति।

तच्च प्रत्यागमनमविशिष्टम्, अतो दोषनिर्हाणाथ पुनःपुनरनुष्ठीयन्ते। नैमित्तिकत्वाद्वा प्रतिनिमित्तमावृत्तिः। तथा ब्राह्मणवधे च सुरापाने च दोष उक्तः, स ब्राह्मणमात्रे सुरामात्रे च भवति, ततो दोषवन्तो मा भूमेति सर्वत्रैवानुष्ठीयते। इह शब्दस्य ज्ञाने प्रयोगे चाभ्युदयो दर्शितः—'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति' इति। प्रत्यवायश्च याज्ञे कर्मण्यपशब्दप्रयोगे दर्शितः–'तेऽसुरा हेलयः' इति, 'आहिताग्निरपशब्दं प्रयुज्य' इति च। अत एव तदपि गुणादिकं पुनःपुनरनुष्ठीयते। तदेवं नित्यत्वं नैमित्तिकत्वं काम्यत्वं भूयोभूयोऽनुष्ठाननिबन्धनम्। एतच्च सर्वशास्त्रसाधारणमपि *वार्त्तिककारेण* प्रोक्तं *भाष्यकारेणो*पपादितमित्यस्माभिरप्यत्रैव प्रत्यपादि॥

अन्तादिवच्च॥ अन्तादिशब्दयोरवयवविशेषवाचित्वादवयविशेषापेक्षायां पूर्व-

न्यासः

अन्तादिवच्च॥ अन्तादिवदित्युक्ते न ज्ञायते—कोऽस्यातिदेशस्यार्थ इत्यतस्तत्परि-

इति योऽयमेकादेशो विधीयते स पूर्वस्यान्तवद्भवति, परस्यादिवद्भवति। यथा तस्यान्त आदिर्वा तदन्तर्भूतस्तद्ग्रहणेन गृह्यते, तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यते—इत्येषोऽतिदेशस्यार्थः।

ब्रह्मबन्धूरित्यत्र ब्रह्मबन्ध्विति प्रातिपदिकम्, ऊङित्यप्रातिपदिकम्, तयोः प्रातिपदिकाप्रातिपदिकयोर्य एकादेशः स प्रातिपदिकस्यान्तवद् भवति। यथा शक्यते कर्त्तुम्—'ङ्याप्प्रातिपदिकात्' इति स्वादिविधिः।

पदमञ्जरी

परयोरित्यनुवृत्तेस्तस्य च वक्ष्यमाणगुणाद्यादेशविशेषणत्वादेकादेश इति लभ्यते, तदिदमुक्तम्—*एकः पूर्वपरयोरिति वर्त्तत इत्यादि*। कः पुनरत्रातिदेशार्थः, किं यावेकादेशस्य स्थानिनौ पूर्वपरौ तयोरन्तादिवद्भवति? किं वा—अकृत एकादेशे तमेवैकादेशमपेक्ष्य यौ पूर्वपरौ समुदायौ तयोरन्तादिवद्भवतीति? यदि वा—एकादेशस्य स्थानिनौ पूर्वपरौ वर्णौ, तयोः समुदाययोरन्तादी, तयोरेकादेशोऽप्यन्तादिवद्भवतीति? तत्राद्यपक्षस्तावन्न सम्भवति, एकादेशेन पूवपरयोस्तत्स्थानिनोर्निवर्त्तितत्वात्! कथमसतोः पूर्वपरयोरन्तादिवत्स्यात्! द्वितीये पक्षे वृक्षावित्यत्र वृक्ष+औ इति स्थिते सुबसुपोरेकादेशः सुबपेक्षस्य कस्यचित्परस्याभावात्परादिवन्न स्यात्?

अतस्तृतीयः पक्ष आश्रीयते। नन्वयमपि पक्षो न सम्भवत्येव। तथा हि—ब्रह्मबन्धूरित्यत्र ब्रह्मबन्धु+ऊ इति स्थिते पूर्वो वर्ण उकारो यस्यान्तो ब्रह्मबन्धुशब्दस्य स एकादेशे नास्त्येव, उकारस्य निवर्त्तितत्वात्; यश्चास्ति धकारान्तो न तस्यान्त एकादेशस्य स्थानी उकारः, अनारम्भकत्वात्? एवं तर्हि यद्व्यपदेशयुक्तस्य स्थानिनौ पूर्वपरावन्तादी तद्व्यपदेशयुक्तस्यैकादेशोऽप्यन्तादिवदित्यर्थः। एतदुक्तं भवति—एकादेशात्प्राक् पूर्वपरयोः पृथगवस्थितयोस्ताभ्यां सह यो व्यपदेशः पूर्वपरसमुदायविषयो दृष्टः—प्रातिपदिकमिति वा, सुबन्तमिति वा, स व्यपदेश एकादेशे कृतेऽपि भवतीति। तदिदमुक्तम्—*यथा तस्यान्त आदिर्वा तदन्तर्भूत इत्यादि*। तस्येत्यनेन एकादेशात्प्रागवस्थितः पूर्वः परश्च समुदायो निर्दिश्यते, अन्तादिशब्दाभ्यां च एकादेशस्य स्थानिनौ पूर्वपरौ। *तद्ग्रहणेन गृह्यत* इत्यनेनापि 'एतदुक्तं भवति' इत्यारभ्यानन्तरं यदुक्तमस्माभिस्तद्दर्शितम्। *एषोऽतिदेशार्थ इति*। अतिदिश्यत इत्यतिदेशः, अतिदेशश्चासावर्थश्चेत्यतिदेशार्थः, कर्मधारयोऽयमर्थोऽत्रातिदिश्यत इत्यर्थः।

न्यासः

ज्ञानायाह—**यथेत्यादि**। **इत्येषोऽतिदेशस्यार्थ इति**। इतिशब्दोऽतिक्रान्तप्रत्यवमर्शी—अतिदिश्यतेऽनेनेत्यतिदेशः, स पुनः 'अन्तादिवच्च' इत्येष एव योग इत्येषोऽनन्तरोक्तोऽस्यातिदेशस्यार्थ इत्यर्थः।

Indira Gandhi National Centre for the Arts

वृक्षावित्यत्र सुबौकारः असुबकारः, तयोः सुबसुपोरेकादेशः सुप आदिवद्भवति । यथा शक्यते वक्तुम्—सुबन्तं पदमिति ।

वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यते, तथा हि—खट्वाभिरित्यत्रान्तवद्भावाभावाद् 'अतो भिस ऐस्' इति न भवति । ह्वयतेः—जुहावेति सम्प्रसारणपूर्वत्वस्यादिवद्भावाभावाद् 'आत औ णलः' इति न भवति । अस्यै अश्वः, अस्या अश्व इति 'वृद्धिरेचि' इति वृद्धिः, 'एङः पदान्तादति' इत्यत्र विधावादिवन्न भवति ।

पदमञ्जरी

वर्णाश्रयविधावित्यादि । वर्णस्वरूपमाश्रित्य यद्विधीयते न तदन्तादिवद्भावेनातिदिश्यत इत्यर्थः । तत्कथम् ? नात्र ताद्रूप्यनिबन्धनं कार्यमतिदिश्यते, योऽयमन्त आदिर्वा प्रागेकादेशादवस्थितः पूर्वः परश्च तद्वदयमेकादेशो भवति । *तत्प्रयुक्तं कार्यं लभत इति* । एवं च तद्वच्चेत्येव वक्तव्यं स्यात, तच्छब्देन पूर्वापरौ परामृश्यते । एवं हि सिद्धेऽन्तादिवदिति वचनादन्तादित्वप्रयुक्तं कार्यमेकादेशस्य भवतु, पूर्वपरस्वरूपप्रयुक्तं तु कार्यं केन भवेत् ! लिङ्गं चात्र भवति तुक्यसिद्धवचनम्; अन्यथा अधीत्येत्यादावेकादेशस्यादिवद्भावादेव तुकः सिद्धत्वादनर्थकं तत्स्यात । *खट्वाभिरिति* । तपरकरणं तु यत्रैकादेशो नास्ति तदर्थं स्यात्—शुभंयाभिरिति । *जुहावेति* । 'अभ्यस्तस्य च' इति ह्वयतेः सम्प्रसारणे कृते जुहु+आ इति यत्पूर्वरूपत्वमाकारस्य तन्नादिवद्भवति, योऽयमादिराकारस्तद्वन्न भवति, तेन 'आत औ णलः' इति न भवति । *अस्यै अश्व इति* । स्याटो विभक्त्येकारस्य योऽयं 'वृद्धिरेचि' इति वृद्धिरेकादेशः स परस्यादिवन्न भवति, तेन 'एङः पदान्तादति' इति न भवति । यत्र च युगपदुभयमाश्रीयते—अन्तश्चादिश्च, तत्राप्यन्तादिवद्भावो न भवति, यथा 'एतेर्लिङि' इति ह्रस्वत्वमुपसर्गात्परस्येणो विधी-

न्यासः

वर्णाश्रयविधावयमन्तादिवद्भावो नेष्यत इति । कथमेतज्ज्ञायते ? इत्याह—**तथा हीत्यादि** । 'अतो भिस ऐस्' इत्यकारवर्णाश्रयो विधिः, तत्र कर्त्तव्ये खट्वाभिरित्यत्र सवर्णदीर्घत्वं पूर्वस्यान्तवन्न भवति । 'आत औ णलः' इत्याकारवर्णाश्रयोऽयं विधिः । तत्र कर्त्तव्ये वर्णाश्रये जुहावेत्यत्र 'अभ्यस्तस्य च' इति ह्वयतेः सम्प्रसारणे कृते यत पूर्वरूपत्वमाकारस्य तन्नादिवद्भवति । 'एङः पदान्तादति' इत्येष विधिरेङ्वर्णाश्रयः । तत्र कर्त्तव्ये—अस्यै अश्व इत्यत्र 'आटश्च' इति वृद्धिः परस्यादिवन्न भवति, तदभावादायादेशः, 'लोपः शाकल्यस्य' इति यकारलोपः, तत् किमेतद् वक्तव्यम्—**वर्णाश्रये नान्तादिवदिति** ? न वक्तव्यम् ! कथम् ? अताद्रूप्यातिदेशात् । नेह ताद्रूप्यमतिदिश्यते, रूपाश्रयाश्चैते विधयः, तेनाताद्रूप्यान्न भविष्यन्ति ।

Indira Gandhi National Centre for the Arts

पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते । तत्रावयवयोरानुमानिकं स्थानित्वमिति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तमित्यन्तादिवद्भावो विधीयते ॥

पदमञ्जरी

यमानम्-अभीयात्परीयादित्यादौ न भवति। यदि ह्ययमेकादेशः पूर्वं प्रत्यन्तवद् बुद्ध्या गृह्येत, स तदानीमेव कथं परं प्रत्यादिवत्स्यात्! एवं परं प्रत्यादिवत्त्वे तदानीमेव पूर्वं प्रत्यन्तवद्भावोऽप्यनुपपन्नः; एकस्योभयापेक्षया युगपत्पारतन्त्र्यस्य विरोधात्।

पूर्वपरेति । यो येन निवर्त्यते स तस्य स्थानी, यथा-भुवोऽस्तिः । समुदायश्चात्र निवर्त्यते, ततश्च तत्प्रयुक्तमेव कार्यं स्थानिवद्भावात्स्याद् यदि किञ्चिदस्ति, न तु प्रत्येकं पूर्वपरयुक्तम् । स्यादेतद्-अवयवयोरपि निवर्त्यमानत्वात्तयोरपि स्थानित्वम्? इत्यत आह—*तत्रेति* । इतिकरणद्वयमपि हेतौ । तत्र समुदाये स्थानिन्यवयवयोर्यत्स्थानित्वं तदानुमानिकमवयवनिवृत्तिमन्तरेणावयविनो निवर्त्तयितुमशक्यत्वादवयवयोर्निवृत्तिः, न त्वादिष्टत्वादित्यर्थः । ततश्च तदाश्रयं कार्यं स्थानिवद्भावान्न प्राप्नोति; साक्षाच्छ्रुतस्यैव च स्थानिनस्तत्राश्रयणात्। इष्यते च तदर्थमन्तादिवद्भावो विधीयते । ननु विपरीतमिदम्-अवयवयोरानुमानिकं स्थानित्वमिति? 'पूर्वपरयोः' इति द्विर्वचननिर्देशात् तयोरेव स्थानित्वं श्रुतं न समुदायस्य शब्दोऽस्ति, द्वयोस्तु निवर्तमानयोरर्थात्समुदायो निवर्तत इत्येतावत्। तथा च पूर्वसूत्रे 'स्थानिभेदाद्भिन्नादिषु नत्ववत्' इत्युक्तम्। तच्चान्यत्रापि उक्तम्—यो ह्युभयस्थाने भवति लभते सोऽन्यतरव्यपदेशम्, तेन खट्वर्श्य इत्यत्र रपरत्वं भवत्यृकारस्यापि स्थानित्वादिति । भवतु वा स्थानित्वमवयवयोरानुमानिकम्, तथापि सिद्धः स्थानिवद्भावः, कथम्? 'स्थानिवदादेशः' इत्यत्र स्थानिशब्दस्य सम्बन्धिशब्दत्वादेवादेशपरिग्रहे सिद्धे आदेशग्रहणमानुमानिकस्याप्यादेशस्य स्थानिवद्भावार्थम्, ततश्च स्थान्यप्यानुमानिक आश्रितः,

न्यासः

किमर्थं पुनरयमन्तादिवद्भावो विधीयते, यावता पूर्वपरावुक्तावेकादेशस्य स्थानिनौ, अत्र स्थानिवद्भावादेव तदाश्रयं कार्यं भविष्यति? इत्यत आह—**पूर्वपरसमुदाय एकादेशस्य स्थानीति** । कथं ज्ञायते? इत्याह—**स हीत्यादि** । येन हि यो निवर्त्यत आदेशेन स तस्य स्थानीति, तद् यथा—'अस्तेर्भूः' इति । अत्र भुवोऽस्तिः, समुदायश्चेहैकादेशेन निवर्त्यत इति स एव तस्य स्थानी, न पूर्वपरौ समुदायिनौ। स्यादेतत्-अवयवस्य समुदायाभ्यन्तरत्वात् समुदाय आदेशेन निवर्त्यमानेऽवयवावपि निवर्त्येते, तस्मात् तयोरपि स्थानित्वम्? इत्यत आह—तत्रेत्यादि । इतिकरणौ द्वावपि हेतौ । तत्र समुदाये स्थानिन्यवयवयोर्यत् स्थानित्वं तदानुमानिकम्, समुदाय एका-

Indira Gandhi National Centre for the Arts

षत्वतुकोरसिद्धः ॥ ८६ ॥

षत्वे तुकि च कर्तव्ये एकादेशोऽसिद्धो भवति । सिद्धकार्यं न

पदमञ्जरी

यथा 'एरुः', पचत्वित्यत्र । अत्र हि इकारेणेकारान्तः स्थान्यनुमीयते, उकारेणाप्युकारान्त आदेशः, तस्य स्थानिवद्भावात् 'तिङन्तं पदम्' इति पदसंज्ञा भवति । एवमप्यत्रावयवयोरानुमानिके स्थानित्वे सिद्धः स्थानिवद्भावः ? एवं तर्ह्यनल्विधौ स्थानिवद्भाव उक्तः अल्विध्यर्थमिदम्, यथा—क्षीरपेण, सुरापेणोत्तरपदविभक्त्योरेकादेशस्यान्तवद्भावात् 'एकाजुत्तरपदे णः' इति णत्वमल्विधिरपि भवति । ननु च 'अनल्विधौ' इति प्रतिषेधः स्थान्यलाश्रयेष्वेव कार्येषु, अस्य त्वेकादेशस्योत्तरपदं प्रत्यवयवत्वमेव स्थानिवत्त्वेन प्रार्थनीयम्; अच्त्वं तु स्वत एव सिद्धम्, ततश्च यथा—अरुदितामित्यत्र स्वाश्रयं वलादित्वं स्थानिवद्भावकृतं च सार्वधातुकत्वमाश्रित्य 'रुदादिभ्यः सार्वधातुके' इतीड् भवति, तद्वदिहापि स्थानिवद्भावकृतमुत्तरपदावयवत्वं स्वाश्रयं चाच्त्वमाश्रित्य णत्वं भवति । तत्तु स्थान्यल्स्वरूपनिबन्धनम्, तत्रेष्यत एव, यथा खट्वाभिरित्यादावैस्भावादि । तस्मात् चिन्त्यमस्य प्रयोजनम् ॥

षत्वतुकोरसिद्धः ॥ *षत्वे तुकि चेति* । षत्वशास्त्रे, तुक्शास्त्रे चेत्यर्थः । *एकादेश इति* । एकादेशशास्त्रम् 'आद्गुणः' इत्यादीत्यर्थः । *असिद्धो भवतीति* । सिद्धः=निष्पन्नः, ततोऽन्योऽसिद्धः । तत्र शास्त्रस्वरूपं तावन्निष्पन्नमिति परत्र परशब्दप्रयोगादिवार्थोऽवगम्यते, तत्कार्यकरणाच्च सादृश्यम्, तदाह—*सिद्धकार्याणि*

न्यासः

देशस्य आदेशेन निवर्त्यमाने तयोरपि निवर्त्तनं नान्तरीयकमिति कृत्वा । न हि विनावयवनिवर्त्तनेन समुदायः शक्यते निवर्त्तयितुम्; तस्य तदात्मकत्वात् । समुदायस्य तु प्रत्यक्षं स्थानित्वम् । 'पूर्वपरयोः' इति स्थानषष्ठ्यन्तस्य साक्षाच् श्रवणात् 'श्रुतानुमितयोः श्रौतः सम्बन्धो गरीयान्' इति 'स्थानिवदादेशोऽनल्विधौ' इत्यनेन यस्य प्रत्यक्षं साक्षात् श्रुतम्, स्थानित्वं तदाश्रयमेव कार्यमादेशे विधीयते । अवयवयोश्चानुमानिकं स्थानित्वं न प्रत्यक्षम्, अतस्तदाश्रयं कार्यं नातिदिश्यते । तेन तदाश्रयं कार्यं स्थानिवद्भावादेशे न प्राप्नोति, इष्यते च । तदर्थमयमन्तादिवद्भावो विधीयते ॥

षत्वतुकोरसिद्धः ॥ इहासिद्धवचनेनैकादेशस्याभावो वा क्रियते ? तत्कार्यसामर्थ्यं वा प्रतिपाद्यते ? सिद्धमपि हि वस्तु सिद्धकार्यं कर्तुमसामर्थ्यादसिद्धमित्युच्यते, यथा—पुत्रकार्यकरणेऽसामर्थ्यात् पुत्रोऽप्यपुत्र इति । तत्र यद्यनेनैकादेशस्याभावः क्रियते तदाधीत्येत्यत्र तुग् न स्यात्, न हीह ह्रस्वोऽस्ति; एकादेशेन निवर्त्तितत्वात् । न चासिद्धवचनेनैकादेशे निवर्त्तिते ह्रस्वस्य प्रादुर्भावो भवति, न हि देवदत्तस्य हन्तरि हते पुनर्देवदत्तस्य प्रादुर्भावो भवतीतीममाद्ये पक्षे दोषं दृष्ट्वा कार्यासामर्थ्यमेकादेशस्यासिद्धत्वश्रुत्या प्रत्याय्यत इति दर्शयन्नाह—**सिद्धकार्यं न करोतीत्यर्थ इति** ।

करोतीत्यर्थः । असिद्धवचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च । कोऽसिचद् इत्यत्र 'एङः पदान्तादतिः' इत्येकादेशस्य परं प्रत्यादिवद्भावावादपदादेरिण उत्तरस्यादेशस्य सकारस्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति । कोऽस्य, योऽस्य, कोऽस्मै, योऽस्मै—

पदमञ्जरी

न करोतीत्यर्थ इति । षत्वतुक्शास्त्रसन्निधावेकादेशशास्त्रं स्वकार्यमेकादेशाख्यं कार्यं न करोति=न प्रवर्त्तयति, न प्रतिपादयतीत्यर्थः । सूत्रस्य प्रयोजनमाह— *असिद्धवचनमिति ।* आदेशे कृते यत्कार्यं तद्धेतुकं प्राप्नोति तदादेशलक्षणम्, आदेशो लक्षणं निमित्तमस्येति कृत्वा; तस्य प्रतिषेधार्थमसिद्धवचनम् । उत्सर्गः= स्थानी, सामान्योत्सृष्टत्वात्, स लक्षणं यस्य तदुत्सर्गलक्षणम्, तस्य भावः प्रवृत्तिर्यथा स्यादित्येवमर्थं चासिद्धवचनम् । *कोऽसिचदिति ।* 'लिपिसिचिह्वश्च' इति च्लेरङ्, कशब्दात्सोरुत्वम्, 'अतो रोरप्लुतादप्लुते' इत्युत्वम्, गुणः । एङः *पदान्तादतीति* । *परम्प्रत्यादिवद्भावादिति ।* आदिवद्भावे हि ओसिचदित्येतदन्तं पदम्, ततः सकारः पदादिर्न भवतीति 'सात्पदाद्योः' इति निषेधाभावादेकादेशमोकारमिणमाश्रित्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति । असिद्धत्वे हि षत्वशास्त्रं प्रत्येकादेशशास्त्रस्याप्रतिपादकत्वात् को असिचदित्येवमवस्थितं पदरूपं भवति, तत्राकारेण व्यवधानात्षत्वाभावः । *कोऽस्येति ।* इदमः षष्ठ्येकवचनम्, त्यदाद्यत्वम्, 'टाङसिङसामिनात्स्याः' इति स्यादेशः, हलि लोपः, शेषं पूर्ववत् । एवमादेशलक्षणप्रतिषेधस्योदाहरणानि दर्शितानि ।

न्यासः

सिद्धस्य निष्पन्नस्य यत् कार्यं तदेकादेशः सिद्धो निष्पन्नोऽपि न करोतीत्ययमस्य वचनस्यार्थः । **असिद्धवचनमित्यादिना** सूत्रस्य प्रयोजनमाचष्टे । आदेशे च कृते यत्कार्यं तद्धेतुकं प्राप्नोति तदादेशलक्षणम्, आदेशो लक्षणं निमित्तमस्येति कृत्वा । तस्य प्रतिषेधो यथा स्यादित्येवमर्थमसिद्धवचनम् । उत्सृज्यते निवर्त्यत इत्युत्सर्गः, स्थान्यभिधीयते । उत्सर्गो लक्षणं यस्य तदुत्सर्गलक्षणम्, तद्भावो यथा स्यादित्येवमर्थञ्चासिद्धवचनम् । **कोऽसिचदिति ।** सिचेर्लुङि च्लिः, 'लिपिसिचिह्वश्च' इति च्लेरङ्, किंशब्दात् परस्य सकारस्य रुत्वम्, 'अतो रोरप्लुतादप्लुते' इत्युत्त्वम्, 'आद्गुणः' इति गुणः, 'एङः पदान्तादति' इति परपूर्वत्वम् । **परं प्रत्यादिवद्भावादित्यादि ।** असिचदित्यत्र योऽकारस्तं प्रत्येकादेशस्य 'अन्तादिवच्च' इत्यनेनादिवद्भावः । अयञ्चापदादित्वे हेतुः । **असिद्धत्वान्न भवतीति ।** असिद्धत्वे हि सति सकारोऽत्रादिरेव पदस्य भवति, तेन 'सात्पदाद्योः' इति षत्वप्रतिषेधो भवति । **कोऽस्येति ।** इदमः षष्ठ्येकवचनम्, 'त्यदादीनामः' इत्यत्वम्, 'टाङसिङसामि-

Indira Gandhi National Centre for the Arts

इत्येकादेशस्यासिद्धत्वाद् 'इणः' इति षत्वं न भवति ।

तुग्विधौ—अधीत्य, प्रेत्येति । अत्रैकादेशस्यासिद्धत्वात् 'ह्रस्वस्य पिति कृति तुक्' इति तुग्भवति ।

※ सम्प्रसारणङीट्सु प्रतिषेधो वक्तव्यः ※ । सम्प्रसारणे—ब्रह्महूषु । परिवीषु । सम्प्रसारणपूर्वत्वस्यासिद्धत्वात्षत्वं न प्राप्नोति । ङौ–वृक्षेच्छत्रम्, वृक्षे छत्रम् । इटि–अपचेच्छत्रम्, अपचे छत्रम्;

पदमञ्जरी

इतरस्य दर्शयति—*अधीत्य, प्रेत्येति । एकादेशस्यासिद्धत्वादित्यादि ।* असिद्धत्वे हि तुक्शास्त्रसन्निधावधि + इ + इयेत्येव स्थितं पदरूपं भवति, ततश्च ह्रस्वाश्रयस्तुक् प्रवर्त्तते । यदि तु मुख्यस्यैकादेशस्यैव कार्यस्यासिद्धत्वमुच्यते, तदा षत्वे नास्ति दोषः, कथम् ? ओकारस्तावत्स्वकार्यं षत्वं न करोति, यौ तु ततः पूर्वौ ककारयकारौ तदाश्रयमपि षत्वं न भवति, तेनैवौकारेण व्यवधानात् । तुकि नेष्टसिद्धिः । कथम् ? एकादेशेन ह्रस्वस्य निवर्तितत्वात्, न चैकादेशः स्वकार्यं न करोति । अनेन स्थानिनः प्रत्यावृत्तिः शक्या, तस्मात्तुकि शास्त्रासिद्धत्वमेवाश्रयणीयम् । आह च—स्थानिवद्वचनानर्थक्यं च शास्त्रासिद्धत्वादिति ।

सम्प्रसारणङीट्स्विति । सम्प्रसारणे ङौ इटि च य एकादेशस्तस्यासिद्धत्वप्रतिषेधो वक्तव्यः । *शकहूष्विति ।* शकान् ह्वयतीति यजादित्वात्सम्प्रसारणं पूर्वत्वम्, क्विप्, 'हलः' इति दीर्घः । *परिवीष्विति ।* व्येञः परिपूर्वात् क्विबादि पूर्ववत् । *असिद्धत्वात्षत्वं न प्राप्नोतीति ।* पूर्वरूपस्यासिद्धत्वे हि शकहु+आ इत्येवमवस्थितं पदरूपं भवति । *वृक्षेच्छत्रमिति, अपचेच्छत्रमिति ।* पचेर्लङ्, उत्तमैकवचनमिट्,

न्यासः

नात्स्याः' इति स्यभावः, 'हलि लोपः' इतीद्रूपस्य लोपः । शेषं पूर्ववत् । एतदादेशलक्षणप्रतिषेधस्योदाहरणम् । उत्सर्गलक्षणभावस्य तु–**अधीत्य, प्रेत्येति** । ननु च बहिरङ्ग एकादेशो द्विपदाश्रयत्वात्; अन्तरङ्गावेव षत्वतुकौ, एकपदाश्रयत्वात्, तत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्यनया परिभाषयैवात्रासिद्धत्वं भविष्यतीति निरर्थकमिदं वचनम् ? एवं तर्हि सैव परिभाषात्र प्रकरणे षत्वतुकोर्नियम्यते । तेनाक्षद्यूरित्यत्र बहिरङ्गलक्षणोऽप्यूडादेशोऽन्तरङ्गयणादेशे कर्त्तव्ये नासिद्धो भवति ।

सम्प्रसारण इत्यादि । सम्प्रसारणे ङौ इटि च य एकादेशस्तस्यासिद्धत्वप्रतिषेधो वक्तव्यः । **ब्रह्महूष्विति** । ब्रह्माणं ह्वयतीति क्विप्, यजादित्वात् सम्प्रसारणम्, 'सम्प्रसारणाच्च' इति परपूर्वत्वम्, 'हलः' इति दीर्घः । सप्तमीबहुवचनम् । **परिवीष्विति** । वेञः परिपूर्वस्य पूर्ववत् क्विबादिषु कृतेषु रूपम् । **अपचेच्छत्रमिति** । पचेर्लङ्युत्तमपुरुषैकवचनमिट्, 'कर्त्तरि शप्' इति शप्, आद्गुणः' इति गुणः ॥

Indira Gandhi National Centre for the Arts

आद्गुणस्यासिद्धत्वाद् ह्रस्वलक्षणो नित्योऽत्र तुक् प्राप्नोति, 'दीर्घात्, पदान्ताद्वा' इति तुग्विकल्प इष्यते ॥

पदमञ्जरी

शप्। *आद्गुणस्यासिद्धत्वादिति*। असिद्धत्वे हि तस्य वृक्ष इ च्छत्रम्, अपच इ च्छत्रमित्येवमवस्थितं पदरूपं भवति। अत्र सम्प्रसारणे तावत्प्रतिषेधो न वक्तव्यः, एकादेशोऽसिद्ध इत्युच्यते, न चात्रैकादेशं पश्यामः; दीर्घेण निवर्त्तितत्वात्। न च दीर्घस्य स्थानिवद्भावादेकादेशग्रहणेन ग्रहणम्; अल्विधित्वात्। ङीटोस्तु प्रतिषेधो वक्तव्य एव।

अथ वा—लाघवार्थं पदस्येति वक्तव्यम्। अन्तादिग्रहणं च पूर्वसूत्रादनुवर्त्तनीयम्, तेन पदान्तस्य पदादेश्च य एकादेशः सोऽसिद्ध इत्येषोऽर्थो भवति। यद्येवम्, सुपिप्पला ओषधीस्कृधीत्यत्रौषधिशब्दाद् द्वितीयाबहुवचनम्, 'ओषधेश्च विभक्तावप्रथमायाम्' इति दीर्घः, ततः प्रथमयोः पूर्वसवर्णदीर्घः, रुत्वविसर्जनीयौ। अत्रेदानीम् 'कःकरत्करतिकृति' इति विसर्जनीयस्य सत्वमिष्यते, तन्न प्राप्नोति; 'पदान्तपदाद्योः' इति वचनात्। एकादेशस्यासिद्धत्वाभावाद् इण उत्तरो विसर्जनीय इति 'इणः षः' इति षत्वं प्राप्नोति, अविशेषेणासिद्धत्वे ओषधी + अस् कृधीत्येवमवस्थानादिण उत्तरत्वाभावात्षत्वाप्रसङ्गात्सत्वं सिध्यति? ज्ञापकात्सिद्धम्; यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति, तज्ज्ञापयति—नैकादेशात्परस्य विसर्जनीयस्य षत्वं भवतीति। यदि स्याद्, भ्रातृशब्दान्ङसि 'ऋत उद्' इत्युत्त्वे एकादेशे रपरे च कृते 'रात्सस्य' इति सकारलोपे कृते षष्ठीसमासे 'ऋतो विद्यायोनिसम्बन्धेभ्यः' इत्यलुकि रेफस्य विसर्जनीये 'ऋत उद्' इत्युकारस्यैकादेशस्य सिद्धत्वात् 'इदुदुपधस्य च' इत्येव षत्वे सिद्धे कस्कादिषु तन्न पठेत्, पठति च, ततो ज्ञायते—नैकादेशात्परस्य षत्वमिति। शकहूष्वित्यत्रापि तर्हि न प्राप्नोति? नैष दोषः; तुल्यजातीयस्य ज्ञापकं भवति। कश्च तुल्यजातीयः? यः कुप्वोरनन्तरः। इह च वेञः क्विपि सम्प्रसारणे पूर्वत्वे च 'ह्रस्वस्य पिति कृति' इति तुकि प्राप्ते पूर्वत्वस्य सूत्रेणासिद्धत्वे प्राप्ते 'पदान्तपदाद्योः' इति वचनादसिद्धत्वाभावादुदिति तुग्भवत्येव। न हि उ+आ इत्येकादेशात्प्रागवस्थायामाकारः पदान्तः। नाप्यकारः पदादिः; विभक्तेरभावात्। न चैकादेशात्प्रागेव कृदन्तत्वाद्विभक्त्युत्पत्तिः; एकादेशस्यान्तरङ्गत्वात्। अथापि प्रागेव विभक्त्युत्पत्तिः; एवमपि उ+आस् इति स्थिते उकारः पदादिः सकारः पदान्तः, सुबन्तं हि पदम्, न तु ततः पूर्वम्। अथापि भ्याम्प्रभृतौ उ+आभ्यामिति स्थिते 'स्वादिषु' इति पदसंज्ञायां पदान्तपदाद्योरेकादेशः? तथापि न दोषः; 'पूर्वपरयोः' इति वर्त्तते, अन्तादिग्रहणञ्च; तत्र यथासंख्यसम्बन्धात्पूर्वपदस्य योऽन्तः परस्य चादिस्तयोरेकादेशोऽसिद्ध इत्यर्थः सम्पद्यते। आकारश्चात्र पदादिर्न भवति, नाप्युकारः पदान्त इत्यसिद्धत्वात्तुग् भवत्येव।

Indira Gandhi National Centre for the Arts

आद् गुणः ॥ ८७ ॥

'अचि' इत्यनुवर्तते । अवर्णात्परो योऽच्, अचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णाचोः स्थाने एको गुण आदेशो भवति । तवेदम् । खट्वेन्द्रः, मालेन्द्रः । तवेहते, खट्वेहते । तवोदकम्, खट्वोदकम् । तवर्श्यः, खट्वर्श्यः । तवल्कारः, खट्वल्कारः । लृकारस्य स्थाने योऽण् तस्य लपरत्वमिष्यते ॥

पदमञ्जरी

किमर्थं पुनः षत्वतुकोरेकादेशस्यासिद्धत्वादुच्यते, यावता द्विपदाश्रयत्वाद् बहिरङ्गस्यैकादेशस्यैकपदाश्रयत्वेनान्तरङ्गयोः षत्वतुकोः 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्येवासिद्धत्वं सिद्धम् ? ज्ञापनार्थं तु, एतज्ज्ञापयति—'यत्र बहिरङ्गस्यान्तरङ्गस्य वाऽचोरानन्तर्य निमित्तत्वेनाश्रितं तत्र बहिरङ्गपरिभाषा न प्रवर्त्तते' इति । तेनाक्षद्यूरित्यत्र बहिरङ्गस्याप्यूठोऽसिद्धत्वाभावाद्यणादेशः सिद्धो भवति । अयमेवार्थः परिभाषारूपेण पठ्यते 'नाजानन्तर्यं बहिष्ट्वप्रक्लृप्तिः' इति ॥

आद्गुणः ॥ गुणग्रहणं किम्, यावताऽचीति वर्त्तते, 'एकः पूर्वपरयो' इति च, तत्रान्तर्यतः कण्ठतालव्ययोरकारेकारयोः स्थाने तादृश एवैकारो भविष्यति, कण्ठ्यौष्ठ्ययोश्चाकारोकारयोः स्थाने तादृश एवौकारो भविष्यति; न चैकारौकारयोरपि प्रसङ्गः, वृद्धिरेचीति नियमात् ? तदिदानीं नियमार्थम्, ऐचोरनेनैव सिद्धत्वात्, एच्येव वृद्धिर्भवति । उभयथा नियमश्च व्याख्यास्यते, वृद्धिरेवैचीति । इह तर्हि खट्वर्श्यः, मालर्श्य इति, प्रमाणतोऽन्तरतमो मूर्द्धन्य ऋकारः प्राप्नोति ? उभयोर्योऽन्तरतमस्तेन भाव्यम्, न चर्कार उभयोरन्तरतमः, अकारस्तु शिष्यमाण एव रपरो भवतीति स्थानत उभयोरन्तरतमः । आकारस्तर्हि प्राप्नोति ? 'उपसर्गादृति धातौ' इत्येतन्नियमार्थं भविष्यति—ऋति धातावेवाकारो नान्यत्रेति । प्लुतस्तर्हि प्राप्नोति—खट्वेन्द्रः, 'प्लुतश्च विषये स्मृतः', प्लुतविधाने हि सति यस्मिन्विषये प्लुतो विहितस्तस्मिन्नप्यनेनैव भाव्यम् ? अस्मिन्कर्त्तव्ये आष्टमिकस्य प्लुतस्यासिद्धत्वात्, ततश्च पक्षेऽनुवाददोषप्रसङ्गात् प्लुतो न भवतीति । इह तर्हि खट्वा ईषा खट्वेषा, खट्वा ऊढा खट्वोढा, आन्तर्यतश्चतुर्मात्र आदेशः

न्यासः

आद्गुणः ॥ **तवल्कारः, खट्वल्कार इति**। कथं पुनरत्र लपरत्वम् ? इत्याह—**लृकारस्य स्थान इत्यादि**। एतच्च 'लृकारऋकारयोः सवर्णसंज्ञा वक्तव्या' इत्युपसंख्यानाद् 'उरण् रपरः' इत्यत्र रप्रत्याहारग्रहणाल्लभ्यते । उक्तं ह्यक्षरसमाम्नाये—'हकारादिषु वर्णेष्वकार उच्चारणार्थः, लकारे त्वनुनासिक इत्संज्ञकः प्रतिज्ञायते' इति । तत्र रेफादारभ्य लणकारेण प्रत्याहारे सति लृकारस्य ऋकारग्रहणेन गृहीतस्य स्थानेऽण् विधीयमानो लपरः सम्पद्यते ॥

Indira Gandhi National Centre for the Arts

वृद्धिरेचि ॥ ८८ ॥

'आत्' इति वर्तते। अवर्णात्परो य एच्, एचि च पूर्वो योऽवर्णः, तयोः पूर्वपरयोरवर्णैचोः स्थाने वृद्धिरेकादेशो भवति। आद्गुणस्यापवादः। ब्रह्मैडका, खट्वैडका। ब्रह्मैतिकायनः, खट्वैतिकायनः। ब्रह्मौदनः, खट्वौदनः। ब्रह्मौपगवः, खट्वौपगवः॥

एत्येधत्यूठ्सु ॥ ८९ ॥

'वृद्धिरेचि' इति वर्तते, 'आत्' इति च। तदेतदेज्ग्रहणमेतेरेव विशेषणम्, न पुनरेधतेः; अव्यभिचाराद्, ऊठश्चासम्भवात्। 'इण् गतौ' इत्येतस्मिन् धातावेचि, 'एध वृद्धौ' इत्येतस्मिन् ऊठि च पूर्वं यदवर्णं ततश्च परो योऽच्, तयोः पूर्वपरयोरवर्णाचोः स्थाने वृद्धिरेकादेशो भवति। उपैति, उपैषि, उपैमि। उपैधते, प्रैधते। प्रष्ठौहः, प्रष्ठौहा,

पदमञ्जरी

प्राप्नोति, गुणग्रहणे तु क्रियमाणे गुणसंज्ञायान्तपरकरणं सर्वार्थमिति त्रिमात्रचतुर्मात्राणामगुणत्वादप्रसङ्गः। तस्माद् गुणग्रहणम्। श्लोकौ चात्र भवतः—

आदेशश्चेद् गुणः केन स्थानेऽन्तरतमो हि सः।
ऐदौतौ नैचि तावुक्तावृकारो नोभयान्तरः॥
आकारो नर्त्तिधातौ स प्लुतश्च विषये स्मृतः।
आन्तर्यात्त्रिचतुर्मात्रो गुणश्च तपरः स्मृतः॥

इह वृक्षशब्दान्ङिः, वृक्ष + इ + इन्द्रमिति स्थिते अकारेकायोर्गुणश्च प्राप्नोतीकारयोः सवर्णदीर्घश्च, तत्र शब्दपरविप्रतिषेधाद्दीर्घप्रसङ्गः, तथा तच्छब्दात् 'जश्शसोः शिः', त इ इन्द्रम्, पचेरुत्तमैकवचनमिट् शप्, पच इ इन्द्रम्? नैष दोषः; एकपदाश्रयत्वादन्तरङ्गो गुणो भविष्यति प्रागेव पदान्तरसन्निधानात्।

लृकारस्य स्थानत इति। यथा चैतल्लभ्यते तथा 'लण्' इत्यत्र व्याख्यातम्॥

एत्येधत्यूठ्सु ॥ *न पुनरेधतेरव्यभिचारादिति*। बाहुल्याभिप्रायेणैतदुक्तम्। अस्ति ह्यस्यापि व्यभिचारः—चङ्युपधाह्रस्वत्वे भवान् मा प्रेदिधदित्यत्रेत्याहुः। *प्रष्ठौह इति*। प्रष्ठं वहतीति 'छन्दसि सहः', 'वहश्च' इति ण्विः, 'वाह ऊठ्'

न्यासः

वृद्धिरेचि ॥ **एत्येधत्यूठ्सु** ॥ सम्भवे व्यभिचारे च सति विशेषणविशेष्यभावो भवति, तौ च सम्भवव्यभिचारावेतावेव धातौ स्तः, नेतरत्रेत्याह—**तदेतदेज्ग्रहणमित्यादि**। **प्रष्ठौह इति**। प्रष्ठं वहतीति 'छन्दसि सहः' इति 'वहश्च' इति ण्विप्रत्ययः, 'वाह ऊठ्' इत्यूठ् सम्प्रसारणसंज्ञकः, 'सम्प्रसारणाच्च' इति परपूर्वत्वम्, ततो वृद्धिः।

Indira Gandhi National Centre for the Arts

प्रष्ठौहे । ऊठ्याद्गुणापवादो वृद्धिर्विधीयते । एत्येधत्योः-एङिपर-रूपापवादः ।

'ओमाङोश्च' इत्येतत्तु पररूपं न बाध्यते; 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति' इति, 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते' इति वा । तेनेह न भवति—उप + आ + इतः= उपेत इति ।

एचीत्येव—उप + इतः=उपेतः ।

पदमञ्जरी

इत्यूठ , सम्प्रसारणम् , पूर्वत्वम् , ततो वृद्धिः । *एत्येधत्योरेङि पररूपापवाद इति ।* **वृद्धिर्विधीयत इत्यनुषङ्गः ।**

यथैव तर्हि 'एङि पररूपम्' बाधते, एवमाङि पररूपमपि बाधेत; नाप्राप्ते पररूपेऽस्या वृद्धेरारम्भात् ? इत्यत आह-

ओमाङोश्चैतत्त्विति **। कुतः ? इत्याह-** *येनेति । स तस्य बाधको भवतीति* **। तस्यैव बाधको भवतीति यावत, तद्बाधस्यावश्यम्भावित्वात्, तावता च बाधकस्य चरितार्थत्वात् । न चाप्राप्ते एङि पररूपे इयं वृद्धिरारभ्यते, आङि पररूपे तु आ इतः=एतः, प्रेतः, परेत इत्यत्र प्राप्ते; उपैति, प्रैतीत्यत्र त्वप्राप्ते तस्मान्न बाधते । परिहारान्तरमाह—** *पुरस्तादिति ।* **अनन्तरे बाध्ये ज्ञाते तद्बाधया वचनस्य चरितार्थत्वादुत्तरेण सह स्पर्द्धायां परत्वात्तदेव भवतीति भावः ।**

न्यासः

एत्येधत्योरेङि पररूपापवाद इति वृद्धिर्विधीयत इति प्रकृतेन सम्बन्धः ।

अथ 'ओमाङोश्च' इत्यस्याप्याङि पररूपापवादो वृद्धिः कस्मान्न भवति, नाप्राप्ते हि पररूप इयं वृद्धिरारभ्यत इति मा यथैङि पररूपं बाधते तथाङि पररूपमपि बाधेत, ततश्चेहापि स्यात्—आ + इतः=एतः, उप + एतः=उपेतः ? इत्यत आह—**ओमाङोश्चेत्येतदित्यादि** । अत्रैव कारणमाह—**येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति** । नाप्राप्त एङि पररूपे इयं वृद्धिरारभ्यत इति युक्तं यत् तस्य बाधिका भवति । आङि पररूपे तु प्राप्ते चाप्राप्ते चैषा वृद्धिरारभ्यते । आ + इतः=एतः, प्र + एतः=प्रेतः, परेतः—इत्यत्र प्राप्त आङि पररूपे, उप + एति = उपैतीति—अत्र त्वप्राप्ते । तस्मादेषा वृद्धिराङि पररूपत्वं न बाधते । **पुरस्तादपवादा इत्यादिना** परीहारान्तरमाह । 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते' नोत्तरान्' इति, इयं च वृद्धिः पुरस्तादपवादः, अस्याश्चैङि पररूपमेवानन्तरम्, अतस्तदेव तया बाध्यते, नाङि पररूपम्; तस्यानन्तरत्वात् ।

Indira Gandhi National Centre for the Arts

❀ अक्षादूहिन्यां वृद्धिर्वक्तव्या ❀। औहिणी।

❀ स्वादीरेरिण्योर्वृद्धिर्वक्तव्या ❀। स्वैरम्[1]। स्वैरिणी[1]।

❀ प्रादूढोढ्येषैष्येषु वृद्धिर्वक्तव्या[2] ❀। प्रौढः। प्रौढिः। प्रैषः। प्रैष्यः।

❀ ऋते च तृतीयासमासेऽवर्णाद् वृद्धिर्वक्तव्या ❀। सुखेन ऋतः सुखार्तः। दुःखेन ऋतो दुःखार्तः। ऋत इति किम्? सुखेन इतः सुखेतः। तृतीयेति किम्? परमर्तः। समास इति किम्? सुखेनर्तः।

❀ प्रवत्सतरकम्बलवसनानामृणे वृद्धिर्वक्तव्या ❀। प्र–प्रार्णम्।

पदमञ्जरी

अक्षौहिणीति । अक्षैरूहतेऽवश्यमिति आवश्यके णिनिः, साधनम् 'कृता' इति समासः।

स्वैरमिति । 'ईर गतौ', ईरणमीरः, भावे घञ्, स्वेनाभिप्रायेण ईरणं स्वैरम्, 'कर्तृकरणे कृता बहुलम्' इति समासः, क्रियाविशेषणात्वाल्लोकाश्रयत्वाद्वा लिङ्गस्य नपुंसकत्वम्। स्वेनाभिप्रायेणेरते गच्छतीति स्वैरी, 'सुप्यजातौ' इति णिनिः। ईरिग्रहणमनर्थकम्, 'पदास्वैरिबाह्य' इति निपातनात्सिद्धम्, पदास्वैरशब्दादिना मत्वर्थीयेन सिद्धम्, णिनिस्त्वनभिधानान्न भविष्यति।

प्रादित्यादि । ऊढ, ऊढि, एष, एष्य—इत्येतान्युत्तरपदानि। इष्यतेरिच्छतेरिष्णातेर्वा यदा ण्यत् तदा–प्रैष्यः, यदा घञ् तदा–प्रैषः, एङि पररूपापवादो

न्यासः

अक्षादित्यादि। वक्तव्येति। व्याख्येयेत्यर्थः। तत्रेदं व्याख्यानम्—उत्तरसूत्रे चकारोऽधिकविधानार्थः। तेनाक्षशब्दादूहिनीशब्दे परतो वृद्धिर्भविष्यतीति। एवमुत्तरत्रापि वक्तव्यशब्दस्यार्थः, व्याख्यानमप्येवमेव वेदितव्यम्। अक्षाणामूहः, सोऽस्यास्तीति मत्वर्थीय इनिः, 'ऋन्नेभ्यो ङीप्' इति ङीप्—अक्षौहिणी।

स्वैरमिति। 'ईर गतौ', ईरणमीरः, भावे घञ्, स्वस्य ईरः स्वैरः। क्रियाविशेषणत्वात् स्वैरमिति वृत्तौ नपुंसकलिङ्गेन निर्देशः। क्रिया तु काचिदत्राध्याहर्त्तव्या। अथ वा–स्व ईरो यस्य कुलस्य तत् स्वैरं कुलम्। नपुंसकस्य कुलादेरन्यपदार्थत्वान्नपुंसकलिङ्गत्वम्। स्वैरीति। स्वमीरितुं शीलमस्येति 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः।

ऊढ, ऊढिरिति शब्दौ निष्ठाक्तिन्नन्तौ। प्रैष इति। 'इष गतिहिंसादानेषु', 'इषु इच्छायाम्' इति वा, आभ्यां प्रपूर्वाभ्यां यदा घञ् तदा प्रैषः, यदा तु ण्यत् तदा प्रैष्य इति।

सुखार्त्त इति। 'कर्तृकरणे कृता बहुलम्' इति समासः॥

१.–१. 'स्वैरः, स्वैरी' इति पा०॥

२, अत्र वार्त्तिके ऊढग्रहणम्, प्रौढ इति तदुदाहरणं च पुस्तकान्तरेऽधिकम्।

Indira Gandhi National Centre for the Arts

वत्सतर—वत्सतरार्णम् । कम्बल—कम्बलार्णम् । वसन—वसनार्णम् ।

❀ ऋणदशाभ्यां वृद्धिर्वक्तव्या ❀ । ऋणार्णम् । दशार्णम् ॥

आटश्च ॥ ९० ॥

'एचि' इति निवृत्तम् । 'अचि' इत्यनुवर्त्तते । आटः परो योऽच्, अचि च पूर्वो य आट्—तयोः पूर्वपरयोराडचोः स्थाने वृद्धिरेकादेशो भवति । ऐक्षिष्ट । ऐक्षत । ऐक्षिष्यत । औभीत् । आर्ध्नोत् । औब्जीत् ।

चकारोऽधिकविधानार्थः—'उसि' 'ओमाङोश्च' इति पररूपबाधनार्थः । औस्रीयत् । औङ्कारीयत् । आ + ऊढा ओढा, तामैच्छत् औढीयत् ॥

पदमञ्जरी

वृद्धिः । ईष्यशब्दे तु प्रेष्य इति भवति । तथा आ+ऊढा ओढा प्रोढेति 'ओमाङोश्च' इति पररूपं भवति । पूर्वोपात्तस्य ऋणस्यापनयनाय यदृणमन्यदुपात्तं तद् *ऋणार्णम्* । दशार्णशब्दो नदीविशेषस्य, देशविशेषस्य च संज्ञा ॥

आटश्च ॥ 'ईक्ष दर्शने', 'उभ उम्भ पूरणे', 'उब्ज आर्जवे', 'ऋधु वृद्धौ'—इत्येतेषामुदाहरणानि । *चकारोऽधिकविधानार्थ इति* । अस्यैव विवरणम्—*उस्योमाङोश्चेति* । *पररूपबाधनार्थं इति* । उसि, ओमि, आङि च यत्पररूपं प्राप्नोति तद्बाधनार्थ इत्यर्थः; अन्यथा परत्वात्तदेव पररूपं स्यात् । *औस्रीयदिति* । अनर्थकेऽप्युसि पररूपविधानादत्र प्रसङ्गः ॥

न्यासः

आटश्च ॥ **ऐक्षतेति** । 'ईक्ष दर्शने' इति लङ् । **ऐक्षिष्टेति** । लुङ् । **ऐक्षिष्यत** इति । लृङ् । **औम्भीदिति** । 'उभ उम्भ पूरणे' इति लुङ्, इट्, 'अस्तिसिचोऽपृक्ते' इतीट् । 'इट ईटि' इति सिचो लोपः । **औब्जीदिति** । 'उब्ज आर्जवे' । **आर्ध्नोदिति** । 'ऋधु वृद्धौ' इति लङ्, 'स्वादिभ्यः श्नुः' इति श्नुः ।

चकारोऽधिकविधानार्थ इति । न तु वृद्धेरनुकर्षणार्थः; तदनुवृत्तेः स्वरितत्वादेव सिद्धत्वादित्यभिप्रायः । अधिकविधानार्थ इत्यस्यार्थं वाक्यान्तरेण विस्पष्टीकर्तुमाह—**उस्योमाङोश्चेति पररूपबाधनार्थं इति** । उसि, ओमि, आङि च यत् पररूपं प्राप्नोति, तद्बाधनार्थ इत्यर्थः । चकारेण हि द्विर्वृद्धिविधानं विज्ञापयति । तत्र यद् द्वितीयं विधानं तद् बाधकबाधनार्थं भवति । तेन 'उस्यपदान्तात्' इति यत्पररूपं प्राप्नोति, यच्च 'ओमाङोश्च' इति, तदपि बाधित्वा वृद्धिरेव भवति । **औस्रीयद्, औङ्कारीयदिति** । उस्रशब्दादोङ्कारशब्दाच्च 'सुप आत्मनः क्यच्' इति क्यच्, '**क्यचि च' इतीत्वम्**,

उपसर्गादृति धातौ ॥ ९१ ॥

'आत्' इत्येव। अवर्णान्तादुपसर्गादृकारादौ धातौ परतः पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति। आद्गुणापवादः। उपार्च्छति। प्रार्च्छति। उपार्ध्नोति।

उपसर्गादिति किम्? खट्वर्च्छति। मालर्च्छति। प्रगता ऋच्छका अस्माद्देशात् प्रर्च्छको देशः। 'यत्क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञकाः' इति।

ऋतीति किम्? उप + इत उपेतः। तपकरणं किम्? उप + ॠकारीयति उपर्कारीयति। 'वा सुप्यापिशलेः' इति विकल्पः स्यात्।

उपसर्गग्रहणादेव धातुग्रहणे सिद्धे धातुग्रहणं शाकल्यनिवृत्त्यर्थम्। 'ऋत्यकः' इति हि शाकल्यस्य प्रकृतिभावः प्राप्नोति॥

पदमञ्जरी

उपसर्गादृति धातौ॥ उपार्च्छतीति। 'ऋच्छ गन्तीन्द्रियप्रलयमूर्तिभावेषु'। *प्रर्च्छको देश इति।* अत्र यत्क्रियायुक्ताः प्रादयः' इति गमिं प्रति प्रशब्दस्योपसर्गत्वं नर्च्छतिं प्रतीति भवति प्रत्युदाहरणम्।

वा सुप्यापिशलेरिति हि विकल्पः स्यादिति। तेनोत्तरार्थन्तपरकरणमिति भावः।

धातुग्रहणमनर्थकम्, यत्र चोपसर्गत्वं न सम्भवति, तत्रोपसर्गग्रहणेन प्रादयोऽपि लक्ष्यन्ते, यथा—नासिकाया नस्भावविधौ; इह तु मुख्यमेवोपसर्गत्वं सम्भवति, तत्किं धातुग्रहणेन? इत्यत आह—*उपसर्गग्रहणादेवेति।* शाकल्यस्येदं

न्यासः

क्यजन्ताल्लुङ्, आट्, 'उस्यपदान्तात्' इति पररूपे बाधके प्राप्ते चकारस्याधिकविधानार्थत्वाद्वृद्धिरेव भवति। **औढीयदिति।** ओढाशब्दात् क्यजन्ताल्लुङ्, आडागमे कृते 'ओमाङोश्च' इति पररूपे बाधके प्राप्ते चकारस्याधिकविधानार्थत्वाद्वृद्धिरेव भवति॥

उपसर्गादृति धातौ॥ उपार्च्छतीति। 'ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु'। **प्रगता ऋच्छका अस्माद् देशात् प्रर्च्छको देश इति।** अत्र 'यं प्रति क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञका भवन्ति' इति गमिं प्रति प्रशब्दो गत्युपसर्गसंज्ञकः, न ऋच्छतिं प्रतीति भवति प्रत्युदाहरणमिदम्।

वा सुप्यापिशलेरिति विकल्पः स्यादिति। एतेनोत्तरार्थतां तपरकरणस्य दर्शयति।

अथ धातुग्रहणं किमर्थम्, यावता सम्बन्धिशब्दा हि नियतं प्रतियोगिनमुपस्थापयन्ति, तद्यथा—पुत्रादिशब्दाः, उपसर्गश्चायं धात्वपेक्षत्वात् सम्बन्धिशब्दः, तत्रोपसर्गग्रहणादेव धातुग्रहणं सिध्यति? अत आह—**उपसर्गग्रहणादेवेत्यादि।** यदि धातुग्रहणं न

Indira Gandhi National Centre for the Arts

वा सुप्यापिशलेः ॥ ९२ ॥

'आत्' इत्येव, 'उपसर्गादृति धातौ' इति च। सुबन्तावयवे धातावृकारादौ परतोऽवर्णान्तादुपसर्गात् पूर्वपरयोरापिशलेराचार्यस्य मतेन वा वृद्धिरेकादेशो भवति। उपर्षभीयति, उपार्षभीयति। उपल्कारीयति, उपाल्कारीयति। 'ऋकारलृकारयोः सावर्ण्यविधिः' इति ऋतीति लृकारोऽपि गृह्यते।

आपिशलिग्रहणं पूजार्थम्, वेति ह्युच्यत एव ॥

पदमञ्जरी

शाकलम्, तस्य निवृत्त्यर्थं पुनर्धातुग्रहणम्। सति तु धातुग्रहणे योगविभागेन पुनर्वृद्धिर्विधीयत इति शाकलं बाध्यते। असति तु तस्मिन् शाकल्यमतेन परत्वात् प्रकृतिभावः स्यादेव ॥

वा सुप्यापिशलेः ॥ सुबन्तस्य धातोरसम्भवात्सुबित्येतद्धातोरवयवद्वारकं विशेषणमित्याह—*सुबन्तावयवे धाताविति*। आचार्यग्रहणेनैव पूजाविकल्पयोरपि सिद्धयोः पुनर्वाग्रहणमाचार्यग्रहणस्य प्राधान्येन पूजार्थतां ख्यापयितुं कृतम् ॥

न्यासः

क्रियेत, तदा पराच्छ॑तीत्यत्र 'ऋत्यकः' इति परत्वाच्छाकल्यस्य मतेन प्रकृतिवद्भावः स्यात्। तस्मात् तस्य शाकल्यस्य प्रकृतिवद्भावस्य निवृत्त्यर्थं धातुग्रहणं क्रियते। **कथं पुनः** क्रियमाणे धातुग्रहणे शाकल्यस्य प्रकृतिवद्भावनिवृत्तिर्लभ्यते ? योगविभाग-**करणात्**। सति हि धातुग्रहणे योगविभागः क्रियते—उपसर्गादृति वृद्धिर्भवतीति; ततो धाताविति, इहोपसर्गादिति वर्त्तते। ततो द्वितीयो योगो बाधकबाधनार्थो विज्ञायते। अथ 'उपसर्गाच्छन्दसि धात्वर्थे' इत्यत्र यथा प्राद्युपलक्षणार्थमुपसर्गग्रहणं विज्ञायते, तथेहापि कस्मान्न विज्ञायेत ? अशक्यत्वात्। 'उपसर्गाच्छन्दसि धात्वर्थे' इत्यत्र हि धातोरुपस्थानं न सम्भवतीति युक्तं प्राद्युपलक्षणार्थमुपसर्गग्रहणम्। इह हि धातोरुपस्थानं सम्भवतीत्ययुक्तम् ॥

वा सुप्यापिशलेः ॥ धातावित्यनुवर्त्तते, सुपीति चोच्यते, न च सुबन्तो धातुरस्ति, तत्र सामर्थ्याद्धात्वेकदेशे वर्त्तमानं सुपीत्येतदिह विशेषणं विज्ञायते, इत्याह—**सुबन्तावयवे धाताविस्यादि**। **उपाल्कारीयतीति**। कथं पुनरृतीत्युच्यमाने लृकारे वृद्धिः प्रवर्त्तते ? इत्याह—**ऋकारलृकारयोरित्यादि**। ऋकारलृकारयोः सवर्णसंज्ञा विहितेति ऋकारो गृह्यमाण लृकारमपि ग्राहयतीति तत्रापि वृद्धिर्भवति।

आपिशलिग्रहणं पूजार्थमिति। अथ विकल्पार्थं कस्मान्न भवति ? इत्याह—**वेत्युच्यत एवेति**। यद्यप्याचार्यग्रहणेनैव पूजा, विकल्पश्चोभयं सम्पद्यते; तथाप्याचार्यग्रहणस्य प्राधान्येन पूजां ख्यापयितुं वाग्रहणं कृतमिति भावः ॥

औतोऽम्शसोः ॥ ९३ ॥

ओतोऽमि शसि च परतः पूर्वपरयोराकार आदेशो भवति । गां पश्य, गाः पश्य । द्यां पश्य, द्याः पश्य ।

द्योशब्दोऽप्योकारान्त एव विद्यते, ततोऽपि परं सर्वनामस्थानं णिदिष्यते, तेन नाप्राप्तायां वृद्धावयमाकारो विधीयमानस्तां बाधते ।

अमिति द्वितीयैकवचनं गृह्यते; शसा साहचर्यात्, 'सुपि' इति चाधिकारात् । तेनाचिनवम्, असुनवमित्यत्र न भवति ॥

पदमञ्जरी

औतोम्शसोः ॥ गां पश्येति । ननु चात्र 'गोतो णित्' इति णित्त्वे सति परत्वाद्वृद्धौ कृतायामोकाराभावादात्वेन न भाव्यम्, आत्वविधानं तु द्योशब्दार्थं स्यात्, न हि तत्र णित्त्वमस्ति, 'गोतः' इति वचनादित्यत आह-*द्योशब्दोऽपीत्यादि ।* सत्यं यदि णित्त्वं न स्यात्, अस्ति तु तत्रापि णित्त्वम्, 'गोतः' इत्यस्यौकारान्तोपलक्षणत्वात्, वर्णनिर्देशेषु तपरत्वप्रसिद्धेः । ततः किम् ? इत्याह—*तेनेति ।*

शसा साहचर्यादिति । सुप एव हि शसोऽत्र सम्भवः, नान्यस्य; 'अचि' इत्यधिकारात् ।

अचिनवमसुनवमिति । चिनोतेः, सुनोतेश्च लङ्, 'तस्थस्थमिपाम्' इत्यमि कृते विकरणस्य गुणावादेशौ ॥

न्यासः

औतोऽम्शसोः ॥ गाम्पश्येति । कथं पुनरेतदुदाहृतम्, यावता 'गोतो णित्' इति णित्त्वे सति परत्वाद् वृद्धयात्र भवितव्यम् ? इत्यत आह-**द्योशब्दोऽप्योकारान्त इत्यादि ।** तपरकरणं हि वर्णनिर्देशेषु प्रसिद्धमिति 'गोतः' इति तपरनिर्देश ओकारान्तोपलक्षणार्थो विज्ञायते, ततश्च द्योशब्दादपि परं सर्वनामस्थानं णिद्भवति । यद्येवम्, तत् किमिति वृद्धिर्नात्र भवति ? इत्याह—**तेनेत्यादि ।** यदि द्योशब्दात् परस्य सर्वनामस्थानस्य णित्त्वं न स्यात्, ततो द्यां पश्येत्यत्र सावकाशमात्वं गां पश्येत्यत्र परत्वाद् वृद्धया बाध्येत । यदि तु द्योशब्दादपि परं सर्वनामस्थानं णिद्भवतीति, तदा द्यां पश्येत्यत्र वृद्धिः प्राप्नोत्येव । ततो नाप्राप्तायां वृद्धाविदमात्वं विधीयमानमनवकाशत्वाद् वृद्धिं बाधते । ततश्च युक्तमेव गां पश्येत्येतदुदाहरणम् ।

अथेहाप्यचिनवम्, असुनवमित्यत्र चिनोतेः सुनोतेश्च लङि मिपि विकरणस्य गुणे कृते मिपः 'तस्थस्थमिपाम्' इत्यादिनाम्भावे चौकारस्यात्वं कस्मान्न भवति ? इत्याह—**अमीत्यादि ।** शसा साहचार्यात् सुबधिकाराद्वा सुप एवाम इह ग्रहणम् । अतो नात्रात्वस्य प्रसङ्गः । चित्रगुं पश्येत्यत्र तु ह्रस्वत्वे कृत ओकाराभावाद् 'अनल्विधौ' इति स्थानिवद्भावप्रतिषेधादात्वं न भवति ॥

Indira Gandhi National Centre for the Arts

एङि पररूपम् ॥ ९४ ॥

'आत्' इत्येव, 'उपसर्गाद्धातौ' इति च। अवर्णान्तादुपसर्गादेङादौ धातौ पूर्वपरयोः पररूपमेकादेशो भवति। 'वृद्धिरेचि' इत्यस्यापवादः। उपेलयति। प्रेलयति। उपोषति। प्रोखति।

केचिद् 'वा सुप्यापिशलेः' इत्यनुवर्त्तयन्ति, तच्च वाक्यभेदेन सुब्धातौ विकल्पं करोति—उपेडकीयति, उपैडकीयति। उपोदनीयति, उपौदनीयति।

❀ शकन्ध्वादिषु पररूपं वक्तव्यम् ❀। शक + अन्धुः शकन्धुः। कुल + अटा कुलटा।

❀ सीमन्तः केशेषु ❀। सीम्नोऽन्तः सीमन्तः। अन्यत्र सीमान्तः।

पदमञ्जरी

एङि पररूपम् ॥ 'इल प्रेरणे' चुरादिः, 'ओखृ शाखृ' इति भ्वादौ पठ्येते। *केचिद्वा सुप्यापिशलेरित्यनुवर्त्तयन्तीति*। यद्येवम्, तेन सहास्यैकवाक्यतायाम् असुब्धातुषु नास्य प्रवृत्तिः स्याद्? इत्यत आह—*तच्चेति*। अत्र व्याख्यानमेव शरणम्।

शकन्ध्वादिष्विति। शकन्ध्वादयः प्रयोगतोऽनुसर्तव्याः, तेषु पररूपं वक्त-

न्यासः

एङि पररूपम् ॥ **उपेलयतीति**। 'इल प्रेरणे', चुरादिणिच्। **प्रोखतीति**। 'उख नख' इत्युखिर्गत्यर्थो भ्वादौ पठ्यते। यदि 'वा सुपि' इत्यनुवर्त्तयन्ति, एवं सति तेन सहास्यैकवाक्यतायां सुब्धातोरेवानेन विकल्पेन पररूपं क्रियते, असुपि तु पररूपं न स्यादेवेत्याह—**तच्चेत्यादि**। एकवाक्यत्वे हि सत्येष दोषः स्यात्। न चात्रैकवाक्यता, किं तर्हि? वाक्यभेदः। तेन तदिहानुवर्त्तमानं सुब्धातावेव विकल्पं करोति, इतरत्र तु नित्यमेव पररूपं प्रवर्त्तते। तत्रावर्णान्तादुपसर्गादसुबन्तावयवे धातावेङादौ पूर्वपरयोः पररूपमेकादेशो भवतीत्येकं वाक्यम्, अवर्णान्तादुपसर्गात् सुबन्तावयवे धातावेङादौ पूर्वपरयोर्वा पररूपमेकादेशो भवतीति द्वितीयम्। तत्र पूर्वेण वाक्येनासुबन्तावयवे धातावुपेलयतीत्यादौ नित्यं पररूपं विधीयते। द्वितीयेन तु सुबन्तावयवे धातावुपेडकीयतीत्येवमादौ विकल्पेन पररूपं विधीयते। वाक्यभेदस्तु 'एङि पररूपम्' इति तन्त्रेण सूत्रद्वयोच्चारणाल्लभ्यते। सूत्रद्वये तूच्चार्यमाणे सत्येक एव 'वा सुप्यापिशलेः' इत्येतदनुवर्तमानमपि लक्ष्यानुरोधान्नाभिसम्बध्यते, द्वितीये तु सम्बध्यत एव। तेन वाक्यद्वयं पूर्वोक्तं सम्पद्यते।

वक्तव्यमिति। व्याख्येयमित्यर्थः। तत्रेदं व्याख्यानम्—उत्तरसूत्रे चकारोऽधिक-

Indira Gandhi National Centre for the Arts

❀ एवे चानियोगे पररूपं वक्तव्यम् ❀। इह + एव इहेव। अद्य + एव अद्येव। अनियोगे इति किम् ? इहैव भव माऽन्यत्र गाः ॥

❀ ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम् ❀। स्थूल + ओतुः स्थूलौतुः, स्थूलोतुः। बिम्बौष्ठी, बिम्बोष्ठी। समास इति किम् ? तिष्ठ देवदत्तौष्ठं पश्य।

❀ एमन्नादिषु छन्दसि पररूपं वक्तव्यम् ❀। अपां त्वा एमन्, अपां त्वेमन्। अपां त्वा ओद्मन्, अपां त्वोद्मन् ॥

पदमञ्जरी

व्यम्। 'कुलटाया वा', 'कतन्तेभ्यः' इत्यादिनिर्देशोऽस्मिन्नर्थे लिङ्गम्। अन्धुः= कूपः, बहूनि कुलान्यटति नैकस्मिन्कुलेऽवस्थितेति कुलटा। पचादिष्वयं पठितव्यः, अन्यथा 'कर्मण्यण्' स्यात्।

एवे चानियोग इति। नियोगः=अवश्यम्भावः, नियमः=अवधारणम, ततोऽन्यत्रार्थे पररूपं सम्भवति। उदाहरणेऽनवक्लृप्तावेवशब्दः, यथा—क्वेव भोक्ष्यस इति। अवधारणे तु वृद्धिरेव भवति—'अमैवाव्ययेन', 'धातोस्तन्निमित्तस्यैव', इहैव सन्तत्वाय, ममैव हव्यान्यग्न इत्यादि।

ओतुः=बिडालः। 'तुन्वोर्वि निपात उपसंख्यानम्', वीति सप्तमीनिर्देशात्-तदादिविधिः, वकारादौ निपाते परतः तुनु-इत्येतयोः पररूपं भवति—तु वै त्वै, अनुभूततमं चैकम्। नुवै न्वै। एक एवायं निपातः, अर्थभेदात्, यदाह-'न वा, निपातैकत्वात्' इति। अत एव नैतद् *वृत्तिकारेण* पठितम्।

सूत्रे पररूपग्रहणमुत्तरार्थम्, इह त्वेङीत्येव सिद्धम्—एङि परत एकादेशो भवतीति। रूपग्रहणं चिन्त्यप्रयोजनम्, तथा च 'अमि पूर्वः' इत्यत्र रूपग्रहणं न कृतम् ॥

न्यासः

विधानार्थः, तेन शकन्ध्वादिषु पररूपं भविष्यतीति। उत्तरत्रापि वक्तव्यशब्दस्यायमर्थो व्याख्यानं चैतदेव वेदितव्यम्।

एवे चानियोग इति। नियोगः=नियोजनम्, व्यापारणमित्यर्थः। न नियोगोऽनियोगः=अनवक्लृप्तिः। तत्रैवशब्दे पररूपं वेदितव्यम्। एवशब्दोऽनियमे वर्तते। यदा तमेव केवलं नियमं व्यापारेणाविशिष्टं ब्रूते तदा पररूपं भवति। यदा तु व्यापारेण विशिष्टं तदा वृद्धिरेव।

बिम्बोष्ठीति। 'नासिकोदरौष्ठ' इति ङीष्। तिष्ठ देवदत्तौष्ठं पश्येति वाक्यमेतत्, न तु समासः। देवदत्तशब्दात् 'एङ् ह्रस्वात् सम्बुद्धेः' इति सोर्लोपः ॥

Indira Gandhi National Centre for the Arts

ओमाङोश्च ॥ ९५ ॥

'आत्' इत्येव । अवर्णान्तादोमि आङि च परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । का + ओमित्यवोचत्, कोमित्यवोचत् । योमित्यवोचत् । आङि खल्वपि—आ + ऊढा ओढा । अद्य + ओढा अद्योढा । कदा + ओढा कदोढा । तदा + ओढा, तदोढा । 'वृद्धिरेचि' इत्यस्यापवादः ।

इह तु—आ ऋश्यात् अर्श्यात्, अद्य अर्श्यात् अद्यर्श्यादिति अकः सवर्णे दीर्घत्वं बाधते ॥

उस्यपदान्तात् ॥ ९६ ॥

'आत्' इत्येव । अवर्णादपदान्तादुसि पूर्वपरयोराद्गुणापवादः पररूपमेकादेशो भवति । भिन्द्या + उस् भिन्द्युः । छिन्द्या + उस्

पदमञ्जरी

ओमाङोश्च ॥ अद्योढेति । आङ्नाङोरेकादेश आङ्ग्रहणेन गृह्यत इति भवत्युदाहरणम् । अत्र च 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इति पूर्वमाद्गुणे कृते पश्चादद्यशब्देन सम्बन्धे वृद्धिः प्राप्नोति, एवमाङो रूपमत्रिनष्टम् । अद्य आगत इत्यादौ तत्र सवर्णदीर्घत्वेन सिद्धं रूपम् ।

अकः सवर्णे दीर्घत्वं बाध्यत इति । ननु च मध्येऽपवादन्यायेन वृद्धेरेव बाधो युक्तः, न दीर्घत्वस्य ? नैष दोष; चकारोऽत्र क्रियते, स पुनर्विधानार्थो भविष्यति ॥

उस्यपदान्तात् ॥ भिन्द्युरिति । भिदेर्लिङ्, यासुट्, झेर्जुस्, श्नसोरल्लोपः,

न्यासः

ओमाङोश्च ॥ अद्योढेति । अद्य + ओढा । ननु च 'आद्गुणः' इत्यनेनाङो निर्वर्त्तितत्वादिदमाङ उदाहरणं न युज्यते ? आङ्माङोरेकादेशस्त्वाङ्ग्रहणेन गृह्यत इत्यदोषः । पूर्वमेव हीदमुक्तम्—'द्वयोः षष्ठीनिर्दिष्टयोः स्थाने यो भवति लभतेऽसावन्यतरव्यपदेशम्' इति । किमर्थं पुनराङो ग्रहणम्, यावता प्रागेवाङः पूर्वेण सह 'अकः सवर्णे दीर्घः' इति दीर्घत्वे कृते ततः परेण सह 'आद्गुणः' इति गुणे चाद्योढेत्यादि सिद्धमेव ? न सिध्यति, यतः 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इति पूर्वमाद्गुणेन भवितव्यम्, तथा च सति वृद्धिः स्यात् । अत आङोऽपि ग्रहणं कर्त्तव्यम् ।

इह त्वकः सवर्णे दीर्घत्वं बाध्यत इति । अस्य विधेर्विशेषविहितत्वात्, अकः सवर्णे दीर्घस्य च सामान्यविहितत्वात् । विशेषविहितोऽपि सामान्यविहितस्य बाधको भवतीति प्रतिपादितमेतत् ।

उस्यपदान्तात् ॥ भिन्द्युरिति । भिदेर्लिङ्, झि, यासुट्, 'झेर्जुस्' इति जुस्, श्नम्, 'श्नसोरल्लोपः' इत्यकारलोपः, 'लिङः सलोपोऽनन्त्यस्य' इति सकारलोपः,

छिन्द्युः । अदा + उस् अदुः । अया + उस् अयुः ।

अपदान्तादिति किम् ? का + उस्रा कोस्रा । का + उषिता कोषिता ।

आदित्येव—चक्रुः । अबिभयुः ॥

पदमञ्जरी

'लिङः सलोपोऽनन्त्यस्य' इति सलोपः, भिन्द्या + उस्—अनेन पररूपम् । *अदुरिति* । दाञो लुङ्, 'गातिस्था' इत्यादिना सिचो लुक्, 'आतः' इति झेर्जुस्, अदा + उस्—अनेन पररूपम् ।

कोस्रेति । ननु चानर्थकत्वादेवास्योसो ग्रहणं न भविष्यति ? एवं तर्ह्येतज्ज्ञापयति—अनर्थकस्याप्युसो ग्रहणमिति, तेन भिद्युरित्यादावप्युसि पररूपं भवति । अत्र हि यासुडादिः समुदायोऽर्थवान्, न तु तदवयव उस् । *कोषितेति* । वसेः

न्यासः

भिन्द्या + उसिति स्थितेऽनेन पररूपत्वम् । **अदुरिति** । ददातेर्लुङ्, झि, 'आतः' इति झेर्जुस्, 'गातिस्था' इति सिचो लुक्, अदा + उसिति स्थितेऽनेन पररूपत्वम् ।

कोस्रा, कोषितेति । ननु चात्रैकस्मिन् प्रत्युदाहरणे 'अर्थवद्ग्रहणे नानर्थकस्य' इत्यनया परिभाषयैव न भविष्यति, उस्राशब्दो हि समुदायोऽर्थवान्, न तूसित्येष तदवयवः । द्वितीये तु 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य' इत्यनया परिभाषयाऽपि न भविष्यति, लाक्षणिको हि तत्रोस्, तथा हि–वसेर्निष्ठायाम् 'वसतिक्षुधोरिट्', यजादित्वात् सम्प्रसारणे कृते—उषितेति, तत्र पररूपं न सम्पद्यते, तत् किमपदान्तादित्यनेन ? एवं तर्ह्येतदतिरिच्यमानमपदान्तग्रहणमर्थवदनर्थवत्त्वादिकं विशेषमनपेक्ष्योस्मात्रे पररूपं भवतीत्यमुमर्थं द्योतयति । तेन नानर्थके 'उस्यपदान्तात्' इत्येतद् भवति । भिन्द्युरित्यत्र हि यासुडादिः समुदायोऽर्थवान्, न तु तदवयव उस् । लाक्षणिकेऽपि भवतीति—बभुषः पश्येति । 'भा दीप्तौ', लिटः क्वसुः, शस्, 'वसोः सम्प्रसारणम्' इति सम्प्रसारणम्, 'सम्प्रसारणाच्च' इति पूर्वरूपम्, बभा उस् अस् इति स्थितेऽनेन पररूपत्वम् । एतत् सार्वधातुकपक्ष उदाहरणं वेदितव्यम् । आर्धधातुकपक्षे ह्याकारलोपेनैव सिद्धम् । सानुबन्धकेऽपि भवति—अदुः, अधुरिति । क्व तर्हि स्यात् ? बभुरिति । ननु चानर्थक्ये सत्यपदान्तग्रहणस्यायमर्थः परिकल्प्येत, अस्ति चास्योक्तसूत्रे प्रयोजनम्, किं तत् ? अपदान्ताद् यथा स्यादिह मा भूदिति–दण्डाग्रमिति ? नैतदस्ति; यद्येतदेव प्रयोजनमभिमतं स्यात्, तदोत्तरसूत्र एवेदं कुर्यात् । इह करणात् तु यथोक्तार्थप्रतिपादनपरतैव तस्यावगम्यते । अधिकाराच्चोत्तरार्थतापि भवत्येव । कोषितेत्यत्र 'वसतिक्षुधोः' इतीट्, 'शासिवसिघसीनाञ्च' इति षत्वम्, तस्य चासिद्धत्वात् पररूपत्वप्राप्तिर्वेदितव्या ।

चक्रुरिति । कृञो लिट्युसि रूपम् । **अबिभयुरिति** । 'ञिभी भये', लङ्, शप्,

अतो गुणे ॥ ९७ ॥

'अपदान्तात्' इति वर्त्तते । अकारादपदान्ताद् गुणे परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । पचन्ति । यजन्ति । अकः सवर्णे दीर्घस्यापवादः ।

पचे, यजे—इत्यत्र 'वृद्धिरेचि' इति वृद्धिः प्राप्नोति ।

अत इति किम् ? यान्ति । वान्ति ।

गुण इति किम् ? अपचे । अयजे ।

अपदान्तादित्येव—दण्डाग्रम् । यूपाग्रम् ॥

अव्यक्तानुकरणस्यात इतौ ॥ ९८ ॥

पदमञ्जरी

क्तः, 'वसतिक्षुधोरिट्', यजादित्वात्सम्प्रसारणम्, 'शासिवसिघसीनां च' इति षत्वम्, तस्यासिद्धत्वादुसि न पररूपं भवति । अस्य तु लाक्षणिकत्वादेवाग्रहणं सिद्धम् । *अबिभयुरिति* । भियो लङ्, शपः श्लुः, 'सिजभ्यस्त' इत्यादिना झेर्जुस्, 'जुसि च' इति गुणः ॥

अतो गुणे ॥ अकः सवर्णे दीर्घस्यापवाद इति । ननु च मध्येऽपवादन्यायेन वृद्धेरेवायमपवादो युक्तः, न दीर्घस्य ? गुणग्रहणाद्दीर्घस्यापि बाधको भविष्यति, अन्यथा—'अतोऽपदान्तात्' इत्येव वक्तव्यम् । एङीत्येव, ततो जुसि च, अपदान्तादित्येव । एवं सिद्धे गुणग्रहणाद् गुणमात्रेऽयं विधिः प्रवर्तमानो दीर्घमपि बाधिष्यते ।

अत इति किमिति । अदिति वर्त्तत एवेति प्रश्नः । तपरकरणे तात्पर्यमित्युत्तरम् ॥

न्यासः

'जुहोत्यादिभ्यः श्लुः' इति श्लुः, द्विर्वचनम्, 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुस्, 'जुसि च' इति गुणः ॥

अतो गुणे ॥ पचे, यजे—इत्यत्र 'वृद्धिरेचि' इति वृद्धिः प्राप्नोति, तेन तस्या एव पररूपत्वमपवाद इत्यभिप्रायः ।

'आद्गुणः' इत्यत आदित्यनुवर्त्तत एवेति मन्यमान आह—**अत इति किमिति** । दीर्घनिवृत्त्यर्थ इह तपरस्याकारस्य निर्देशः क्रियत इति दर्शयितुमाह—**यान्ति, वान्तीति** ।

अपचे इति । लङ्यात्मनेपदोत्तमपुरुषैकवचन इट्, अत्र 'आद्गुणः' । पररूपे तु सति स गुणो न लभ्यते ॥

Indira Gandhi National Centre for the Arts

अव्यक्तम्=अपरिस्फुटवर्णम्, तदनुकरणं परिस्फुटवर्णमेव केनचित्सादृश्येन तदव्यक्तमनुकरोति तस्य योऽच्छब्दस्तस्मादितौ पूर्वपरयोः स्थाने पररूपमेकादेशो भवति। पटत् इति पटिति। घटत् इति घटिति। झटत् इति झटिति। छमित् इति छमिति।

पदमञ्जरी

अव्यक्तानुकरणस्यात इतौ ॥ *अव्यक्तमपरिस्फुटवर्णमिति*। अपरिस्फुटा = अनभिव्यक्ता अकारादयो वर्णा यस्मिन्तत्तथोक्तम्। यद्येवम्, तदनुकरणेनापि तथाविधेनैव भाव्यम्, सदृशं ह्यनुकारणं भवति, ततश्चानुकार्य इव तत्रापि नैवाच्छब्दोऽवधार्यते, अनवधारिते चाशक्यं पररूपं कर्त्तुम्? तत्राह–*तदनुकरणं परिस्फुटवर्णमेवेति*। अथ कथं तर्हि तत्तेनानुक्रियते, न हि विसदृशमनुकरणं भवत्यतिप्रसङ्गात्? इत्यत आह—*केनचित्सादृश्येनेति*। तत्पुनः सादृश्यं ध्वनेस्तुल्यतया, तेन ह्यव्यक्तमनुकार्यमनुकरोति पुरुषः, अनुकरणं कर्तृ अव्यक्तं कर्मानुकरोति, करणस्य कर्तृत्वविवक्षयां कर्तृप्रत्ययः, अनुकरणशब्दस्तु करणसाधन एव। *पररूपमेकादेशो भवतीति*। अच्छब्दस्यापि सर्वस्य, नालोन्त्यस्य; 'नानर्थकेऽलोन्त्यविधिः' इति वचनाज्ज्ञापकाच्च। यदयम् 'आम्रेडितस्यान्त्यस्य तु वा' इति अन्त्यग्रहणं करोति, तज्ज्ञापयति—'नात्रालोन्त्यपरिभाषा प्रवर्त्तते' इति। किञ्च—पूर्वापरसमुदाय एकादेशस्य स्थानीत्युक्तम्, ततश्च तदेकदेशे पूर्वस्मिन् खल्वेतत्परिभाषाप्रवृत्तिः कीदृशीति चिन्त्यम्। *पटदितीति*। प्रक्रियावाक्यमेतत्, न प्रयोगार्हम्; पररूपस्य नित्यत्वात्। *पटितीति*। कथं पुनः पररूपे कृते

न्यासः

अव्यक्तानुकरणस्यात इतौ ॥ अव्यक्तमपरिस्फुटवर्णमिति। अपरिस्फुटा = अव्यक्ता, अनभिव्यक्ता अकारादयो वर्णा यत्र तत् तथोक्तम्। यद्येवम्, तदनुकरणेनापि तथाविधेन भवितव्यम्, सदृशं ह्यनुकरणं भवति न त्वसदृशम्, ततश्चानुकार्य इवानुकरणेऽपि नैवाच्छब्दोऽवधार्यते, अनवधारितस्य च कथं शक्यते पररूपत्वं विधातुम्? इत्यत आह—**तदनुकरणमित्यादि**। यदि तर्हि तदनुकरणं परिस्फुटवर्णम्, एवं सति तत् तस्यानुकरणमेव न स्यात्, न हि विसदृशमनुकरणं भवति, तेनानुकर्तुमशक्यत्वात्, अतिप्रसङ्गो वेत्यत आह—**केनचिदित्यादि**। तत् पुनः सादृश्यं ध्वनेस्तुल्यता, उभयोरपि तयोः समानो ध्वनिः। तेन यद्यप्यनुकरणे वर्णविशेषा अवधार्यन्ते, तथापि ध्वनेः समानतया तदव्यक्तमप्यनुकार्यमनुकरोति। **पटितीति**। ननु च 'अलोऽन्त्यस्य' इत्यनया परिभाषयान्त्यस्य भवितव्यम्, तत् कथं सर्वस्यैवाच्छब्दस्य भवति? नैष दोषः; 'नानर्थकेऽलोऽन्त्यविधिः' इति। अथवा–यदयम् 'नाम्रेडितस्यान्त्यस्य तु वा' इत्यत्रान्त्यग्रहणं करोति, ततोऽवसीयते—नात्रालोऽन्त्यस्यैषा परिभाषा प्रवर्त्तत इति।

Indira Gandhi National Centre for the Arts

अव्यक्तानुकरणस्येति किम् ? जगत् इति जगदिति । अत इति किम् ? मरट् इति मरडिति । इताविति किम् ? पटत् अत्र पटदत्र ॥

॥ अनेकाच इति वक्तव्यम् ॥ । इह मा भूत्—स्रत् इति स्रदिति ।

कथं घटदिति गम्भीरमम्बुदैर्नदितमिति ? दकारान्तमेतदनुकरणं द्रष्टव्यम् ॥

नाम्रेडितस्यान्त्यस्य तु वा ॥ ९९ ॥

अव्यक्तानुकरणस्याम्रेडितस्य योऽच्छब्द इतौ तस्य पररूपं न भवति, तस्य योऽन्त्यस्तकारस्तस्य वा भवति । पटत्पटदिति, पटत्पटेति करोति । 'नित्यवीप्सयोः' इति द्विर्वचनम् ।

पदमञ्जरी

तदनुकार्यस्य प्रतिपादकं भवति, कुतश्च तस्यानुकरणत्वम् ? नैष दोषः; यथा गवित्ययमाहेति कृतावादेशमपि गोशब्दस्यानुकरणं भवति शास्त्रवासनया, तद्वदत्राऽपि भविष्यति ।

दकारान्तानुकरणमेतदिति । तकारान्तानुकरणे तु रूपमेवैतन्न स्यात्; अपदत्वेन जश्त्वाभावाद्, यथा—पटिति करोतीति ॥

नाम्रेडितस्यान्त्यस्य तु वा ॥ अव्यक्तानुकरस्याम्रेडितस्येति । व्यधिकरणे षष्ठ्यौ, अव्यक्तानुकरणस्य यदवयवभूतमाम्रेडितम्, तस्येत्यर्थः । *नित्यवीप्सयोरिति द्विर्वचनमिति* । वीप्सायोगस्तु यथाकथञ्चिद् द्रष्टव्यः ।

अपर आह—'नित्यवीप्सयोः' इत्युपलक्षणमेतत्, 'डाचि बहुलं द्वे भवतः' इत्यत्र बहुलवचनादन्यस्यापि द्विर्वचनमिति ।

न्यासः

कथं पुनः पररूपे कृते तदनुकार्यस्य प्रतिपादनं भवति, कुतश्च न भविष्यति ? न्यूनत्वात् ? नैष दोषः; यथैव हि व्यक्तवर्णमपि तस्य केनचित्साधर्म्येण प्रतिपादकं भवति तथा न्यूनमपि भविष्यतीति ।

अनेकाच इति वक्तव्यमिति । अनेकाचोऽव्यक्तानुकरणस्य पररूपं भवतीत्येतदर्थरूपं व्याख्येयमित्यर्थः । तत्रेदं व्याख्यानम्—उत्तरसूत्रे वाग्रहणमुभयोरपि योगयोः शेषः । सा च व्यवस्थितविभाषा विज्ञायते । तेनानेकाच एव भविष्यति, न त्वेकाच इति ।

कथमिति । तकारान्तमेतदव्यक्तमनुकरणमिति मन्यमानस्य प्रश्नः ॥

Indira Gandhi National Centre for the Arts

यदा तु समुदायानुकरणं तदा भवत्येव पूर्वेण पररूपम्—पटत्पटेति करोति ॥

नित्यमाम्रेडिते डाचि[1] ॥ १०० ॥

'अव्यक्तानुकरणस्य', 'अतः' 'अन्त्यस्य' इति चानुवर्त्तते । डाच्परं यदाम्रेडितं तस्मिन्पूर्वस्याव्यक्तानुकरणस्याच्छब्दस्य योऽन्त्यस्तकारस्तस्य पूर्वस्य परस्य चाद्यस्य वर्णस्य नित्यं पररूपमेकादेशो भवति । पटपटाकरोति । दमादमाकरोति[2] ।

पटदित्यस्माद् 'अव्यक्तानुकरणाद्' इति डाचि विहिते 'डाचि बहुलम्' इति द्विर्वचनम्, तच्च टिलोपात् पूर्वमेवेष्यते ॥

पदमञ्जरी

यदा त्विति । द्विरुक्तस्य समुदायानुकरणस्य वार्थभेदो भवति ।

नित्यमाम्रेडिते डाचि ॥ वार्त्तिकमेवेदम् । वृत्तिकृता सूत्ररूपेण पठितम् । डाचि *विवक्षित इति* । 'आशंसायां भूतवच्च' इति भविष्यति क्तः, विधित्सित इत्यर्थः । अन्यथा डाजेव न स्यात्; द्व्यजवरार्धत्वाभावात् । तथा च डाज्विधावुक्तम्—'यस्य च द्विर्वचने द्व्यजवरार्द्धता ततः प्रत्ययः' इति, अष्टमे च वक्ष्यति—डाचीति विषयसप्तमीति ।

डाचि विधित्सित एव द्विर्वचनं क्रियत इत्यत्र प्रयोजनान्तरमाह—*तच्चेति* ।

न्यासः

नाम्रेडितस्यान्त्यस्य तु वा ॥ यदा त्वित्यादि । यदा पटत्पटदित्येष शब्दः समुदाय एवानुकरणम्, तदा तस्याद्विरुक्तत्वात्परस्यावयवस्य पटच्छब्दस्याम्रेडितसंज्ञा नास्तीति पूर्वेण पररूपं भवत्येव ॥

नित्यमाम्रेडिते डाचि ॥ डाच्परमिति । डाच् परो यस्मात् तत् तथोक्तम् ।

डाचि विहित इत्यादि । विहित इति 'हि गतौ' इत्यस्य विपूर्वस्य रूपमिदम् । अस्य च 'सर्वे गत्यर्था ज्ञानार्थाः' इति विहिते=विज्ञाते बुद्धिस्थ एवेत्येषोऽर्थो वेदितव्यः । तेनायमर्थो भवति—डाचि विहिते बुद्धिस्थविषयभूत एवानुत्पन्ने 'डाचि बहुलं द्वे' इति द्विर्वचनमिति । अवश्यञ्चैतदेवं विज्ञेयम्; अन्यथा हि यदि डाचि विहिते कृत इत्येषोऽर्थः स्यात्, तदा डाचि परभूते 'डाचि बहुलं द्वे' इत्यनेन द्विर्वचनं विधीयेत । तथा च यद्वक्ष्यति—'डाचीति विषयसप्तमीयम्' इति तद् विरुध्यते । किं पुनः कारणम्—डाचि विहिते बुद्धिविषयीभूत एवानुत्पन्ने द्विर्वचनं विधीयते ? इत्याह—**तच्चेत्यादि** । चशब्दो हेतौ । यस्माद् द्विर्वचनं टिलोपात् पूर्वमिष्यते तस्माड् डाचि विहिते बुद्धिस्थे विषयभूते एवानुत्पन्ने द्विर्वचनं विधीयते, न परभूते । एवं तट्टिलोपात् पूर्वं सिध्यति;

१. भाष्ये त्विदं वार्त्तिकरूपेणैव गृहीतमिति ध्येयम् ।

२. 'मटमटाकरोति' इत्यधिकं पुस्तकान्तरे ।

Indira Gandhi National Centre for the Arts

अकः सवर्णे दीर्घः ॥ १०१ ॥

अकः सवर्णेऽचि परतः पूर्वपरयोः स्थाने दीर्घ एकादेशो भवति। दण्डाग्रम्। दधीन्द्रः। मधूदके। होतॄश्यः।

अक इति किम्? अग्नये। सवर्ण इति किम्? दध्यत्र।

पदमञ्जरी

ह्यर्थे चः, तद्धि द्विर्वचनं टिलोपात्पूर्वमिष्यते। एवं च पूर्वं सिद्ध्यति, यदि डाचि विधित्सित एव द्विर्वचनं भवति, नान्यथा। यदि हि परभूते द्विर्वचनं स्यात्, ततोऽन्तरङ्गत्वात्पूर्वं टिलोपे कृते टकारान्तस्य द्विर्वचने पटपटेति न सिद्ध्येत्।

यद्वा—डाचि विहिते उत्पन्ने इत्यर्थः। ननु चोक्तम्—डाजेव न स्यादिति? नैष दोषः; 'व्यजवराद्धात्' इति भाविव्यपदेशोऽयम्। यस्य व्यजवरार्द्धता भविष्यति द्विर्वचने कृते तस्मादित्यर्थः। यदि डाचि विहितं द्विर्वचनं परत्वाट्टिलोपप्रसङ्ग इत्युक्तम्? तत्राह—*तच्चेत्यादि*। 'डाचि बहुलम्' इति बहुलग्रहणाद् द्विर्वचने कृते टिलोप इत्यर्थः॥

अकः सवर्णे दीर्घः॥ अग्नय इति। 'घेर्ङिति' इति गुणे कृते दीर्घत्वप्रसङ्गः। *दध्यत्रेति*। असति सवर्णग्रहणे यणादेशस्य दीर्घस्य च विषयविभागो न ज्ञायेत, ततश्च पर्यायः स्यात्।

न्यासः

नान्यथा। यदि हि डाचि परभूते द्विर्वचनं न क्रियते, तदान्तरङ्गत्वाट्टिलोपे कृते पश्चाट्टकारान्तस्य द्विर्वचनमापद्येत, तथा च पटपटेति न सिध्येत्। न च शक्यते वक्तुम्—'नित्यमाम्रेडितं डाचीत्येतद्वचनं ज्ञापकं पूर्वं द्विर्वचनं भवति ततष्टिलोपः' इति; यस्मात् पटदित्यादिकं टिलोपे कृते द्विरुच्यमानं यच्छब्दान्तं भवति तदर्थमेवेदं स्यात्—पटपटाकरोतीति।

अथ वा—डाचीति डाचि विहिते सति परसप्तम्यामदोष इति मन्यमानेन डाचि विहित इत्युक्तम्। डाचि विहिते सति 'डाचि बहुलं द्वे' इत्यनेनोपसंख्यानेन द्विर्वचनम्। ननु चैवं सति 'सर्वविधिभ्यो लोपविधिर्बलीयान्' इति द्विर्वचनात् प्राक् टिलोपः स्यात्, तथा चानिष्टं रूपं प्रसज्येत? इत्यत आह—**तच्चेत्यादि**। कथं पुनष्टिलोपात् पूर्वमिष्यमाणमेतल्लभ्यते? बहुलग्रहणात्। अस्मिंस्तु व्याख्याने विहित इति दधातेरेव तद् रूपं वेदितव्यम्॥

अकः सवर्णे दीर्घः॥ अग्नय इति। परत्वाद् 'घेर्ङिति' इति गुणे कृतेऽगभावादत्र न भवति।

दध्यत्रेति। ननु च यणादेशोऽत्र बाधको भविष्यति, तत् किमेतन्निवृत्त्यर्थेन सवर्णग्रहणेन? इहापि तर्हि बाधकः स्याद्—दधीन्द्रः, मधूष्णमिति। तस्माद् विषयविभागार्थं सवर्णग्रहणं कर्त्तव्यम्।

Indira Gandhi National Centre for the Arts

अचीत्येव—कुमारो शेते। 'नाज्झलौ' इत्यत्र यदजिति प्रत्याहार-ग्रहणं तत्र ग्रहणकशास्त्रस्यानिभिनिर्वृत्तत्वात्सवर्णा न गृह्यन्त इति सवर्णत्वमीकारशकारयोरप्रतिषिद्धम् ॥

※ सवर्णदीर्घत्वे ऋति ऋ वा वचनम् ※। ऋति सवर्णे परभूते तत्र ऋ वा भवतीति वक्तव्यम्। होतृ + ऋकारः होतृकारः। यदा

पदमञ्जरी

कुमारी शेत इति। ननु च तुल्यास्यप्रयत्नत्वेऽपि सावर्ण्यमत्र नास्ति, 'नाज्झलौ' इति प्रतिषेधात्? इत्यत आह–*नाज्झलावित्यत्रेति*। 'अणुदित्सवर्णस्य चाप्रत्ययः' इति ग्रहणकवाक्यम्, तच्च 'नाज्झलौ' इत्यस्य प्रवृत्तिसमये नाभिनिर्वृत्तम्, तस्य हि सवर्णसंज्ञाङ्गम्, तेन यावत्सा न प्रवर्त्तते तावदनभिनिर्वृत्तम्। सवर्णसंज्ञाऽपि स्वापवादे 'नाज्झलौ' इत्यस्मिन्नप्रवृत्ते न प्रवर्त्तते, ततश्च पूर्वं 'नाज्झलौ' इत्यस्य प्रवृत्तिः, पश्चात्सवर्णसंज्ञायाः प्रवृत्तिः, पश्चाद् ग्रहणकवाक्यस्येति एष क्रमः। तेन 'नाज्झलौ' इत्यत्रागृहीतसवर्णानामचां ग्रहणमिति इकारशकारयोः सावर्ण्यमप्रतिषिद्धम्, तस्मादचीत्यनुवर्त्त्यमिति।

ऋति ऋ व वचनमिति। मध्ये रेफभक्ती द्वे, आदितोऽज्भक्तेरर्द्धमात्रा, एवमन्ततः।

न्यासः

कुमारी शेते इति। अत्र 'इचुयशास्तालव्याः' इति, 'विवृतं करणमूष्मणां स्वराणां च' इतीकारस्य सवर्णः शकारो यद्यपि भवति, तथाप्यज्ग्रहणानुवृत्तेर्न भवति। न च सावर्ण्यमप्यत्र नास्ति। 'नाज्झलौ' इति प्रतिषेधादित्यत आह—नाज्झलावित्यत्रेत्यादि। यदि 'नाज्झलौ' इत्यत्र 'अणुदित् सवर्णस्य चाप्रत्ययस्य' इत्येतद् ग्रहणकशास्त्रमभिनिर्वृत्तं स्याद्, एवमिकारो गृह्यमाण ईकारस्यापि ग्राहको भवति, ततश्च सवर्णत्वमीकारशकारयोः प्रतिषिध्येत। न च 'नाज्झलौ' इत्यत्र प्रतिषेधे कर्त्तव्ये ग्रहणकशास्त्रमभिनिर्वृत्तम्, तस्य हि शास्त्रस्य सवर्णसंज्ञाङ्गं निमित्तम्, ततो यावत् सा न प्रवर्त्तते, तावदङ्गवैकल्याद् ग्रहणकशास्त्रमनभिनिर्वृत्तम्। एवं सवर्णसंज्ञापि यावदपवादो नाभिनिर्वृत्तो भवति, तावत् क मया प्रवर्त्तितव्यमिति स्वविषयमजानाना न प्रवर्त्तते, ततो 'नाज्झलौ' इत्यस्यापवादस्यानभिनिर्वृत्तत्वात् सवर्णसंज्ञा न प्रवर्त्तते। तेनाङ्गवैकल्याद् ग्रहणकशास्त्रमपरिनिष्पन्नम्, अतोऽकः सवर्णा गृह्यन्ते। तेनागृहीतसवर्णानामेव प्रत्याहारसन्निविष्टानामयं प्रतिषेधः। न चायमीकारोऽक्षु सन्निविष्ट इति नासौ 'नाज्झलौ' इत्याजिति प्रत्याहारग्रहणेन गृह्यते। तेन सवर्णत्वमीकारशकारयोरप्रतिषिद्धम्।

Indira Gandhi National Centre for the Arts

न ऱ्, तदा दीर्घ एव होतकारः ।

❀ लृति ल्लृ वा वचनम् ❀ । लृति सवर्णे परतो ल्लृ वा भवतीति वक्तव्यम् । होतृ + लृकारः । होतॢ्लृकारः । होतॄकारः । ऋकारलृकारयोः सवर्णसंज्ञाविधिरुक्तः । दीर्घपक्षे तु समुदायान्तरतमस्य लृवर्णस्य दीर्घस्याभावात् ॠकारः क्रियते ॥

प्रथमयोः पूर्वसवर्णः ॥ १०२ ॥

'अकः' इति 'दीर्घः' इति वर्तते । प्रथमाशब्दो विभक्तिविशेषे

पदमञ्जरी

एवम् *लृतीत्यत्रापि* मध्ये द्वे लकारभक्ती, अभितः पूर्ववत् । एवं द्विमात्रयोरप्येतयोरीषत्स्पृष्टत्वाद्विवृत्ताभ्यामृकारलृकाराभ्यामसावर्ण्याद्ग्रहणाद्दीर्घसंज्ञाया अभावाद्वचनम् । अर्द्धतृतीयमात्रत्वात्तत्कालत्वाभावादित्यन्ये । एतच्च सवर्णसंज्ञाया प्रपञ्चितम् । *दीर्घपक्षे त्विति* । ऋकारलृकारयोः समुदायः स्थानी, न च तस्यान्तरतमो दीर्घः सम्भवति, अतोऽवयवस्य योऽन्तरतमः स एव भवति । तत्रापि लृवर्णस्य दीर्घासम्भवादृकारस्य योऽन्तरतमः स ॠकार एव भवति ॥

प्रथमयोः पूर्वसवर्णः ॥ प्रथमाशब्दो विभक्तिविशेषे रूढ इति । सुपामाद्यत्रिके 'सपूर्वायाः प्रथमायाः', 'सप्तमीपञ्चमीप्रथमाभ्यः' इत्यादौ तस्यैव ग्रहणात् । ननु च स्त्रीलिङ्गः प्रथमाशब्दस्तत्र रूढः, न चास्य स्त्रीलिङ्गत्वे प्रमाणमस्ति, प्रत्युत प्रथमशब्दस्तिङां त्रिकद्वयेऽस्मिन्नेव शास्त्रे संज्ञात्वेन विनियुक्त इति तस्यैव ग्रहणं युक्तम्; ततश्च पचति, पचतः, पचन्ति, पचते, पचेते, पचन्ते, चकार, चक्रतुः, चक्रुः; चक्रे, चक्राते, चक्रिरे—इत्यादौ यथाप्राप्तविध्यन्तरबाधेनायं विधिर्युक्तः ।

न्यासः

होतॢ्लृकारः, होतॄकार इति । कथं पुनरत्र दीर्घत्वम् , यावता ऋकारलृकारयोर्भिन्नस्थानत्वात् सवर्णसंज्ञा नास्ति ? इत्यत आह—**ऋकारलृकारयोः सवर्णसंज्ञाविधिरुक्त इति** । ननु च ऋकारलृकारसमुदायोऽत्र स्थानीति तस्यैव योऽन्तरतमस्तेनैव युक्तमादेशेन भवितुम् , न च ॠकारस्तस्यान्तरतमस्तत् कथं स भवति ? इत्यत आह—**दीर्घपक्षे त्वित्यादि** । समुदायान्तरतमस्याभावादिति । ऋकारलृकारसमुदायोऽत्र स्थानी, तस्य चान्तरतमो दीर्घो न सम्भवतीत्यवयवस्य योऽन्तरतमस्तेनैव युक्तमादेशेन भवितुम् । तत्रापि लृकारस्य दीर्घो न सम्भवतीति ऋकारस्य योऽन्तरतमो दीर्घः स एव ॠकारो भवति ॥

प्रथमयोः पूर्वसवर्णः ॥ प्रथमशब्दोऽयं सन्निवेशविशेषापेक्षेऽभिधेये वर्त्तते । परेष्वभिसमीक्षितेषु यस्मात्पूर्वो नास्ति स प्रथमशब्दाभिधेयः । इह च 'प्रथमयोः' इति सामान्येन निर्देशान्न ज्ञायते—कयोः प्रथमयोरिदं ग्रहणमित्यतस्तत्परिज्ञानायाह—**प्रथमा-**

Indira Gandhi National Centre for the Arts

रूढः, तत्साहचर्यात् द्वितीयापि प्रथमेत्युक्ता । तस्यां प्रथमायां द्वितीयायां च विभक्तावचि अकः पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशो भवति । अग्नी । वायू । वृक्षाः । प्लक्षाः । वृक्षान् । प्लक्षान् ।

पदमञ्जरी

किञ्चैवं सति मुख्येऽपि प्रथमशब्दे 'प्रथमयोः' इति द्विवचनमुपपद्यते, आत्मनेपदपरस्मैपदभेदेन प्रथमस्य भेदात् ? उच्यते; एवं सति द्विवचननिर्देशोऽनर्थकः; 'लुटः प्रथमस्य' इत्यादिवत्सिद्धत्वात् । यद्वा—'वा सुप्यापिशलेः' इत्यतः सुपीत्यनुवर्त्तयिष्यते, तेन सुप एव प्रथमस्य ग्रहणम्, लिङ्गाच्च, किं लिङ्गम् ? 'दीर्घाज्जसि च' 'तस्माच्छसो नः पुंसि' इति । अत एव लिङ्गात्सुपामप्यादितः प्रथमयोर्द्वयोर्ग्रहणं भवति, अचीत्यधिकाराच्च, न हि सुरजादिः । सुरपि कुण्डं तिष्ठतीत्यदावजादिः ? नात्रायं विधिः प्राप्नोति, कारणम् ? अमि पूर्वत्वेन बाध्यते । तस्मात् स्त्रीलिङ्गस्य ग्रहणमिति स्थितम् । *तत्साहचर्याद् द्वितीयापि प्रथमेत्युक्तेति ।* द्विवचनं चात्र प्रमाणम् । ननु सकृच्छ्रुतः शब्दो मुख्यवृत्तिरेव वा भवति, जघन्यवृत्तिरेव वा, न पुनरुभयवृत्तिः ? प्रथमाद्वितीयासमुदाये जघन्यवृत्तिरेवायम् , स च समुदाय उद्भूतावयवभेद इति द्विवचनोपपत्तिः, यथा—छत्त्रिणो गच्छन्तीति ।

वृक्षाः, प्लक्षा इति । नन्वत्रापि 'अतो गुणे' इति पररूपेण भवितव्यम्, ना-

न्यासः

शब्द इत्यादि । प्रथमाशब्दोऽयमिह शास्त्रे विभक्तिविशेषे रूढः, सुपां यदाद्यं त्रिकं तत्र प्रसिद्धः । तथा हि—'सपूर्वयोः प्रथमयोर्विभाषा', 'सप्तमीपञ्चमीप्रथमाभ्यः' इत्येवमादिषु निर्देशेषु प्रथमाशब्देन स एव विभक्तिविशेषो निर्दिष्टः । तस्माद् रूढिशब्दत्वादिह प्रथमाशब्दो विभक्तिविशेषे वर्त्तत इति विज्ञायते ।

ननु च स्त्रीलिङ्गो यः प्रथमाशब्दः स इह शास्त्रे विभक्तिविशेषे रूढः, अस्य च स्त्रीलिङ्गतैव सन्दिग्धा ? नैतदस्ति; प्रथमशब्दोपादानादेव स्त्रीलिङ्गोऽयमुपात्त इत्यवसीयते । यदि हि पुंल्लिङ्गस्येदमुपादानं स्यादेवं सति प्रत्ययग्रहणमेव स्यात् । यदि च प्रत्ययग्रहणमभीष्टं स्यात् तदौजसोरित्येवं ब्रूयात् । न चैवमुच्यमाने द्वितीयासम्बन्धिनोऽप्यौकारस्य ग्रहणप्रसङ्गः; इह जसा साहचर्यात् प्रथमासम्बन्धिन एवौकारस्य ग्रहणं विज्ञास्यते । तस्मात् स्त्रीलिङ्गस्येदं ग्रहणमित्यसन्दिग्धमेतत् ।

ननु च यदि प्रथमाशब्दोऽयमिह शास्त्रे विभक्तिविशेषे रूढः, एवं सति विभक्तिविशेष एक इत्यैकवचनेनैव भवितव्यम् , तत् कथं प्रथमयोरिति द्विवचनम् ? इत्यत आह—**तत्साहचर्यादित्यादि** । तेन प्रथमाख्येन विभक्तिविशेषेण साहचर्याद् द्वितीयापि विभक्तिः प्रथमेत्युक्ता, ततश्च द्वित्वाद् द्विवचनमेव न्याय्यम् । तदेतेन प्रथमयोरिति विभक्त्योरिदं ग्रहणं न प्रत्यययोरिति दर्शयति । **वृक्षाः, प्लक्षा इति ।** कथमिदमुदा-

Indira Gandhi National Centre for the Arts

'अतो गुणे' इति यदकारे पररूपं तदकः सवर्णे दीर्घत्वमेव बाधते, न तु पूर्वसवर्णदीर्घत्वम्, 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरान्' इति ।

पदमञ्जरी

प्राप्ते विध्यन्तरे तस्यारम्भात् । स्यादेतत्—प्रथमयोरित्येतदपि दीर्घत्वं नाप्राप्ते विध्यन्तरे आरभ्यमाणम् अग्नी इत्यादौ यथा बाधते, तथा पररूपमपि बाधिष्यते इति ? तत्र, स्वरसन्धिषु गुणयणावुत्सर्गौ, वृद्धिः सवर्णदीर्घत्वं पूर्वसवर्णादेशश्च तयोरपवादा इति द्वितीयकक्षाप्राप्ताः, पररूपं तु तृतीयकक्षाप्राप्तमिति तदेव प्राप्नोति । एवं तर्हि योगविभागः करिष्यते—प्रथमयोरिति, अकः सवर्ण इत्येव, तेन वृक्षा इत्यादौ पररूपं बाधित्वा प्रथमयोरकः सवर्णे दीर्घत्वं भविष्यति; यथैव तर्हि योगविभागः पररूपं बाधते, तथा वृक्षमित्यादावमि पूर्वमपि बाधेत, तस्य त्वग्निमित्यादिरवकाशः ? नैष दोषः; 'अमि पूर्वः' इत्यत्रामीति विभज्यते, तत्र च पूर्वसवर्णदीर्घप्रतिषेधः प्रकृतोऽनुवर्त्तिष्यते । प्रथमयोरिति योगविभागेन प्राप्तं दीर्घत्वमपि न भवतीत्यर्थः । एवमपि 'तस्माच्छसो नः पुंसि' इत्यत्र तच्छब्देनानन्तरो दीर्घः परामृश्यते, एतान् गाश्चरतो बलीवर्दान्पश्य इत्यत्र 'औतोम्शसोः' इत्येकादेशान्मा भूदिति, ततः किम् ? योगविभागे क्रियमाणे अग्नीन्, वायूनित्यादावेव नत्वं स्यात्, न तु वृक्षानित्यादौ यत्र प्रथमयोरिति योगविभागाद् दीर्घो विधीयते ? अयमप्यदोषः; तस्मादित्यनेनाक्स्थानिको दीर्घः परामृश्यते, नानन्तरः, नापि दीर्घमात्रम्, एतच्चाक इत्यनुवृत्तेर्लभ्यते । मा भूद्वा योगविभागः—प्रथमयोरिति । ननु चोक्तम्-वृक्षा इत्यादौ पररूपप्रसङ्ग इति ? नैष दोषः; आचार्यप्रवृत्तिर्ज्ञापयति—न जश्शसोः पररूपं भवतीति, यदयं 'नादिचि' इतीज्ग्रहणं करोति; अन्यथा अवर्णान्तस्य नास्त्येव दीर्घप्रसङ्ग इति किमिज्ग्रहणेन ? केवलोत्तरार्थे हि तस्मिंस्तत्रैव कर्त्तव्यं स्यात् । यद्वा—'दीर्घाच्छसि' इत्येव ब्रूयात्, किमर्थमिदम् ? नियमार्थम्-दीर्घाच्छस्येवेति । तेन जश्शसोर्न भविष्यति ।

वृत्तिकारस्तु यथोक्ते परिहारे प्रतिपत्तिगौरवप्रसङ्गान्न्यायतः परिहारमाह—*अतो गुण इति यदकारे पररूपमित्यादि* । न्यायं दर्शयति—*पुरस्तादिति* । इतिकरणो हेतौ ।

न्यासः

हृतम् ? यावता 'अतो गुणे' इत्यनेन पररूपेणात्र भवितव्यम्, तद्धि नाप्राप्ते विभक्त्यन्तर आरभ्यमाणं यथाऽकः सवर्णे दीर्घत्वं बाधते, तथा 'प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वमपि बाधेत ? इत्यत आह—**अतो गुण इत्यादि** । अत्रैवोपपत्तिमाह—**पुरस्तादित्यादि** । इतिकरणो हेतौ । यस्मात् 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते

अचीत्येव वृक्षः । वृक्षः, प्लक्षः ।

अक इत्येव—नावौ ।

पूर्वसवर्णग्रहणं किम् ? अग्नी इत्यत्र पक्षे परसवर्णो मा भूत् । दीर्घग्रहणं किम् ? त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थम् ॥

तस्माच्छसो नः पुंसि ॥ १०३ ॥

पदमञ्जरी

अग्नी इत्यत्रेति । असति हि पूर्वग्रहणे पूर्वसमुदायस्य स्थानिनोऽन्तरतमस्य दीर्घस्याभावादवयवान्तरतमो भवन् पूर्वस्यैवेति नियमकारणाभावात्परसवर्णोऽपि स्यात्, ततस्तन्निवृत्त्यर्थम् । पूर्वग्रहणं तु विप्रतिषेधनिराकरणार्थम्; अन्यथा अग्नी इत्यत्र विप्रतिषिद्धमापद्यते । कथम् ? 'दीर्घः' इति वर्तते, यदि पूर्वो न दीर्घः, यदि दीर्घो न पूर्वः । ननु दीर्घग्रहणानुवृत्तिसामर्थ्यात् पूर्वशब्देन पूर्वाकृतिर्ग्रहीष्यते ? कथं पुनः सामर्थ्यम्, यावता यत्र पूर्वव्यक्तिर्दीर्घभूता—कुमारीः पश्य, भद्राः पश्येत्यादौ तत्रैव यथा स्यात्, अग्नी इत्यादौ मा भूदित्येवमर्था दीर्घानुवृत्तिः स्यात् ? यद्येतावत् प्रयोजनं स्याद्–'दीर्घाच्छसि पूर्वोऽमि च' इति ब्रूयात्; यतस्तु खलु प्रथमयोरित्यारभ्यते ततो ज्ञायते–न केवलं कुमारीः पश्येत्यादौ दीर्घस्यैव प्रथमयोरित्यनेन दीर्घो विधित्सितः, किं तर्हि ? अग्नी इत्यादावपीति, तन्ना-

न्यासः

नोत्तरान्' इति तस्माद् 'अतो गुणे' पररूपम् 'अकः सवर्णे दीर्घः' इति दीर्घत्वं बाधते; तस्यैव तदनन्तरत्वात् । 'प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वं तु न बाध्यते; विपर्ययात् । **अग्नी इत्यत्रेत्यादि** । असति पूर्वग्रहणे अग्नी इत्यत्र पूर्वपरसमुदायः स्थानी, तस्य चान्तरतमो दीर्घ आदेशो नास्तीत्यवयवान्तरतमो यस्तेन भवितव्यम् । अवयवौ चात्र द्वौ—पूर्वः, परश्चेति; तत्र च पूर्वस्यैव भवितव्यमिति नियमो न लभ्यते, नियमकरणाभावादिति तयोः पर्यायेण भवन्नादेशः पक्षे परसवर्णो वा स्याद् । अतस्तन्निवृत्त्यर्थं पूर्वग्रहणम् ।

सवर्णग्रहणं तु विप्रतिषेधनिरासार्थम् । असति हि तस्मिन् दीर्घ इत्यनुवर्त्तमानेऽग्नी इत्यत्र विप्रतिषिद्धत्वमापद्येत यदि पूर्वो न दीर्घः; अथ दीर्घो न पूर्वः । यदि च पूर्वशब्देन पूर्वाकृतिरुच्येत, दीर्घादनुवृत्तेः पूर्वस्येति षष्ठी वा क्रियेत । तथा च सवर्णग्रहणं शक्यमकर्तुम् । क्रियमाणं वा तत् सुखप्रतिपत्त्यर्थं वेदितव्यम् ।

दीर्घग्रहणं त्रिमात्रे स्थानिनीत्यादि । अग्नि + औ इति स्थिते, असति दीर्घग्रहण एकादेशः क्रियमाणः स्थानिन आन्तरतम्यात् त्रिमात्रः प्राप्नोति; स्थानिनस्त्रिमात्रकत्वात् । तथा हि–अग्निशब्दस्येकार एकमात्रः, औकारो द्विमात्र इत्येतत्समुदायात्मकश्चात्र स्थानी । तस्मात् त्रिमात्रे स्थानिन्यन्तरतमस्त्रिमात्र आदेशो मा भूदित्येवमर्थं

Indira Gandhi National Centre for the Arts

तस्मात्पूर्वसवर्णदीर्घादुत्तरस्य शसोऽवयवस्य सकारस्य पुंसि नकारादेशो भवति । वृक्षान् । अग्नीन् । वायून् । कर्तॄन् । हर्तॄन् । षण्डकान् । पण्ढकान् । स्थूरकान् । अररकान्पश्य । सर्वं एते पुंल्लिङ्ग-विशिष्टं स्वार्थं प्रतिपादयन्ति ।

पदमञ्जरी

कृतिविवक्षायामुपपद्यते ? सत्यम् ; तदेव सवर्णग्रहणेनापि विस्पष्टीक्रियते-*त्रिमात्रे स्थानिनि त्रिमात्रादेशनिवृत्त्यर्थमिति* । आन्तरतम्यात् त्रिमात्र एव प्राप्नोति । यत्र प्लुताप्लुतप्रसङ्गः स एव 'प्लुतश्च विषये स्मृतः' इत्यस्य विषयः, इह तु प्लुतस्यैव प्रसङ्ग इति नायमस्य विषयः ॥

तस्माच्छसो नः पुंसि ॥ तस्मादित्यनेनानन्तरः पूर्वसवर्णदीर्घो निर्दिश्यत इत्याह-*तस्मात्पूर्वसवर्णदीर्घादिति । उत्तरस्य शसोऽवयवस्येति* । उत्तरस्येत्येतच्छसवयवस्य विशेषणम्, तस्मादुत्तरो यः शसोऽवयवस्तस्येति, न तु शसः; असम्भवात् । न हि पूर्वसवर्णदीर्घात् परः कश्चिच्छस् सम्भवति । अन्तादिवद्भावोऽपि न भवति; उभयत आश्रयणात् । अत एवानुपात्तमप्यवयवस्येति लभ्यते । 'बहुषु बहुवचनम्' इत्यत्र 'त्रिकं प्रातिपदिकार्थः' इत्युक्तम्, तेन 'पुंसि' इत्येतत्प्रकृति-विशेषणम्—पुंशब्दात् परस्य शसोऽवयवस्येति । यद्येवम्, वृक्षानित्यादिकं पदं नकारान्तमुदाहरणमुपपद्यते । षणुकषण्ढकशब्दाविह लोकप्रसिद्ध्या नपुंसके वर्त्तमानावपि पुंस्त्वानुगतमेवार्थमाहतुः, यथा कुमार्यादिषु वर्त्तमानोऽर्थशब्दः, सामान्यविशेषा एव स्त्रीत्वादयो न पुनस्तनादयः । स्त्रीसूत्रे चैतदुपपादितम् । स्थूरकानित्यादि तूदाहरणद्वयमयुक्तम्, कथम् ? स्थूरकाया अपत्यानि, अररकाया अपत्यानि 'गर्गादिभ्यो यञ्', बहुषु लुक्, स्त्रीप्रत्ययस्यापि 'लुक् तद्धितलुकि' इति लुक्, स्थूरक, अररक–इत्येतौ स्त्रीशब्दौ, ताभ्यां परोऽत्र शस् भवति; न तु

न्यासः

दीर्घग्रहणम् । दीर्घग्रहणे हि सति तेनादेशे विशिष्यमाणे त्रिमात्रस्यादेशप्रसङ्गो न भवति; द्विमात्रस्यैव दीर्घसंज्ञाविधानात् ॥

तस्माच्छसो नः पुंसि ॥ तस्मात् पूर्वसवर्णदीर्घादिति । एतेन तस्मादित्यनेनानन्तरः पूर्वसवर्णदीर्घो निर्दिष्ट इति दर्शयति । **शसोऽवयवस्य सकारस्येति** । अनेन शस इति सकारावयवापेक्षयावयवषष्ठीति पुंसीति प्रत्ययार्थस्येदं वा विशेषणम्—पुंसि चेद् बहुत्वे शसुत्पन्न इति । प्रकृतिविशेषणं वा–पुंशब्दाच्चेत् परः शसिति । तत्र यदा प्रत्ययार्थस्य विशेषणं तदा 'सर्व एते' इत्यादेरयं पूर्वपक्षः—वृक्षान्, अग्नीनित्यादिकं युक्तमुदाहरणम्; पुंसां बहुत्वेऽत्र शस उत्पन्नत्वात् । षण्डकान्, पण्ढकानिति—एतदुदाहरणद्वयमयुक्तम्; न ह्यत्र पुंसां बहुत्वे शस् उत्पन्नः, किं तर्हि ? नपुंसकाना-मित्यत आह—**सर्व एत इत्यादि** । सर्वग्रहणेन न केवलं वृक्षादयः शब्दाः पुंल्लिङ्गेन

Indira Gandhi National Centre for the Arts

इह तु चञ्चेव चञ्चा, 'लुम्मनुष्ये' इति कनो लुपि कृते 'लुपि युक्तवद् व्यक्तिवचने' इति पुंसोऽपि स्त्रीलिङ्गता, तेन नत्वं न भवति—चञ्चाः पश्य, वध्रिकाः पश्येति ।

पदमञ्जरी

पुंशब्दाभ्यामित्यत आह—*सर्व एत इति* । न केवलं वृक्षादयः, अपि त्वेतावपीति सर्वशब्दस्यार्थः, लुप्तेऽपि प्रत्यये प्रकृतिरेव तदर्थे वर्त्तते, प्रत्ययार्थश्चात्रायमन्यरूपः । *पुंस्त्वविशिष्ट इति* । स्त्रीवाचकत्वेन प्रसिद्धावप्येतावस्मिन् प्रयोगे पुंशब्दाविति भावः ।

यद्येवम्, चञ्चेव चञ्चाः पुमांस इति 'इवे प्रतिकृतौ' इति कनः 'लुम्मनुष्ये' इति लुपि कृते प्रकृतिरेव चञ्चाशब्दः पुंस्त्वविशिष्टं प्रत्ययार्थमस्मिन्न प्रयोग आहेति नत्वप्रसङ्गः ? इत्यत आह–*इह त्वित्यादि* । प्रत्ययार्थोऽपि नैवात्र पुंस्त्वविशिष्टः, किं तर्हि ? अतिदेशात् स्त्रीत्वविशिष्ट इत्यर्थः ।

न्यासः

सामान्यविशेषेण विशिष्टं स्वार्थं प्रतिपादयन्ति, अपि तु षण्डकपण्डकशब्दावपीति दर्शयति । स्वार्थः पुनरेषां पुंस्त्वेन सामान्यविशेषेणावच्छिन्नं वृक्षादिकं द्रव्यम् । तदेवं यतः सर्व एते पुंल्लिङ्गविशिष्टार्थाभिधायिनः, तेनैतेभ्य उत्पद्यमानः शस् पुंसामेव बहुत्वे उत्पद्यत इति पूर्वपक्षो निराकृतो भवति । यदा तु प्रकृतिविशेषणं तदाय पूर्वपक्षः—वृक्षानित्यादिकमित्युदाहरणमुपपद्यते, तत्र हि पुंशब्दात् परः शस् भवति; स्थूरान्, अररकानिति इदमुदाहरणद्वयं नोपपद्यते; तथा हि—स्थूराया अपत्यानि अररकाया अपत्यानीति 'गर्गादिभ्यो यञ्' इति यञ्, तस्य 'यञञोश्च' इति लुकि कृते स्त्रीप्रत्ययस्यापि 'लुक् तद्धितलुकि' इति लुक्—स्थूर, अररक, इत्येताभ्यां स्त्रीशब्दाभ्यामुत्पन्नोऽत्र शस् स्त्रीशब्दाभ्यां परो भवति, न नपुंसकशब्दाभ्याम् ? इत्यत आह–**सर्व एत इत्यादि** । प्रकृतिरेव ह्यत्र तद्धितलुगन्ता प्रत्ययार्थे वर्त्तते, स च प्रत्ययार्थः पुंल्लिङ्गेन विशिष्टः । तस्मान्न केवलं वृक्षादयः शब्दाः पुंल्लिङ्गेन विशिष्टं वृक्षादिकं स्वार्थं प्रतिपादयन्ति, अपि तु स्थूरारकशब्दावपीति पूर्वपक्षः प्रतिक्षिप्तो भवति ।

अयं तर्हि प्रत्ययार्थविशेषणपक्षे दोषः—चञ्चेव चञ्चाः पुमांस इति । 'इवे प्रतिकृतौ' कन्, 'लुम् मनुष्ये' इति लुप्; यदा लुबन्ताच्चञ्चाशब्दाद् पुंसां बहुत्वे शस् उत्पद्यते, तदा चञ्चाः पश्येत्यत्र नत्वं प्राप्नोति ? इत्यत आह—**इह त्वित्यादि** । नैव ह्यत्र पुंबहुत्वे शस् उत्पन्नः, किं तर्हि ? स्त्रीबहुत्वे; पुंसोऽपि युक्तवद्भावेन स्त्रीत्वातिदेशात् । ततोऽत्र नत्वं न भवति ।

दीर्घग्रहणं प्रकृतम्, तस्य चेहार्थवशेन पञ्चम्यन्तस्योपस्थाने सत्यन्तरेणापि तस्मादित्येतद् वचनं दीर्घादेवोत्तरस्य शसो नत्वं भविष्यतीत्यभिप्रायेणाह—

Indira Gandhi National Centre for the Arts

तस्मादिति किम् ? एतांश्चरतो गाः पश्य । शस इति किम् ? वृक्षाः । प्लक्षाः । पुंसीति किम् ? धेनूः । बह्वीः । कुमारीः ॥

नादिचि ॥ १०४ ॥

अवर्णादिचि पूर्वसवर्णदीर्घो न भवति । वृक्षौ । प्लक्षौ । खट्वे । कुण्डे ।

आदिति किम् ? अग्नी । इचीति किम् ? वृक्षाः ॥

दीर्घाज्जसि च ॥ १०५ ॥

पदमञ्जरी

तस्मादिति किमिति । प्रकृतस्य दीर्घग्रहणस्य पञ्चम्या विपरिणामात्सिद्धमिति प्रश्नः । *एतान् गाः पश्येति* । 'औतोऽम्शसोः' इत्यात्वमेकादेशः, 'एकः पूर्वपरयोः' इति महाप्रकरणम्, ततश्च तद्विषयमेव नत्वं स्यादिति मन्यते । नन्वेवं 'षत्वतुकोरसिद्धः' इति च तत्रैव कर्त्तव्यम्—शसो नः पुंसीति, इह तु प्रकरणादनन्तरमेवोपजीविष्यते ? तदेव तर्हि तस्माद्ग्रहणेन विस्पष्टयते ॥

नादिचि ॥ *खट्वे इति* । 'औङ आपः' इति औङः शीभावः । *कुण्डे इति* । अत्रापि 'नपुंसकाच्च' इति ॥

दीर्घाज्जसि च ॥ आदिति नानुवर्तते, चकारेणेचोऽनुकर्षणसामर्थ्यात्; अन्यथा पूर्वेणैव दीर्घादप्यवर्णादिचि सिद्धः प्रतिषेध इति किं तदनुवृत्त्यर्थेन चकारेण ! दीर्घग्रहणं किम्, यावता ऋवर्णस्य 'ऋतो ङिसर्वनामस्थानयोः' इति गुणविधानान्नातिप्रसङ्गः ? एवमिदुतोरपि, 'जसि च' इति गुणो विधीयते । इह तर्हि वृक्षाः, अग्नी, वायू ; इति ह्रस्वादपि प्रतिषेधः स्यात् ? नैष दोषः; 'नादिचि' इत्येतन्नियमार्थं भविष्यति, अगृह्यमाणविशेषत्वाच्चोभयथानियमः—आदिच्येव, आदेवे-

न्यासः

तस्मादिति **किमिति** । **एतान् गाश्चरतः पश्येति** । 'औतोऽम्शसोः' इत्यात्वम् । यद्यनन्तरदीर्घप्रत्यवमर्शी तच्छब्देनोपादीयेत, तदाऽविशेषेण दीर्घमात्रान्नत्वं विधीयमानम्—एतान् गाश्चरतः पश्येत्यत्रापि स्यात्, भवति ह्ययमाकारो दीर्घः । तस्मात् तच्छब्दे तु न दोषः; न ह्ययमनन्तरसूत्रविहित आकारः ॥

नादिचि ॥ **खट्वे इति** । 'औङ आपः' इति शीभावः । **कुण्डे इति** । अत्रापि 'नपुंसकाच्च' इति, तत्र कृते 'आद्गुणः' इति गुणः ॥

दीर्घाज्जसि च ॥ 'आत्' इति नानुवर्त्तते, तेनायं दीर्घमात्रात् पूर्वसवर्णस्य प्रतिषेधः । अथ खट्वा इत्यत्र कथम् 'प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वम्, नैव ह्यत्र 'प्रथमयोः पूर्वसवर्णः' इति दीर्घत्वम्, किं तर्हि ? तस्मिन् प्रतिषिद्धे 'अकः सवर्णे दीर्घः' इति दीर्घत्वम् ? दीर्घादिति वचनं स्पष्टार्थम् । ननु चासति तस्मिन् वृक्षा इत्यत्रापि स्यात् ? नैतदस्ति; यदि ह्यत्रापि स्यात्, तदा पूर्वसूत्रे 'इचि' इत्येतदपार्थकं स्यात् । इह तर्हि

दीर्घाज्जसि इचि च परतः पूर्वसवर्णदीर्घो न भवति । कुमार्यौ । कुमार्यः । ब्रह्मबन्ध्वौ । ब्रह्मबन्ध्वः ॥

वा छन्दसि ॥ १०६ ॥

दीर्घाच्छन्दसि विषये जसि च इचि च परतो वा पूर्वसवर्णदीर्घो न भवति । मारुतीश्चतस्रः । पिण्डीः । मारुत्यश्चतस्रः ।

पदमञ्जरी

चीति । तत्राद्येन नियमेन वृक्षा इत्यादि सिद्धम्; द्वितीयेनाग्नी, वायू इत्यादि । यथैव तर्ह्यग्नी, वायू इत्यादौ निषेधो न भवति; एवं कुमार्यौ, वध्वावित्यादावपि न स्यात्, तस्माद् दीर्घादिति वक्तव्यम् । जस्ग्रहणं शस्निवृत्त्यर्थम्, अन्यथा कुमारीः पश्य, वधूः पश्येत्यादौ शस्यपि प्रतिषेधः स्यात् । ज्ञापकान्न भविष्यति, यदयम्, 'तस्माच्छसो नः पुंसि' इति पुंग्रहणं करोति, तज्ज्ञापयति—न शसि प्रतिषेधो भवतीति; तद्धि नपुंसके सवर्णदीर्घत्वासम्भवात् स्त्रीनिवृत्त्यर्थं कृतम्, यदि च स्त्रियामप्ययं कुमारीः पश्येत्यादौ शस्यपि प्रतिषेधः स्यात्तदा पूर्वसवर्णदीर्घत्वाभावादेव नत्वं न भविष्यति, किं पुंग्रहणेन ? नैतदस्ति ज्ञापकम्; ह्रस्वान्तं यत् स्त्रीलिङ्गं तदर्थमेतत् स्यात्—कृतीः पश्य, धेनूः पश्येति । तस्मात् 'जसि च' इत्येतदपि वक्तव्यमेव ।

वा छन्दसि ॥ *मारुतीरिति* । मरुतो देवता आसामिति 'सास्य देवता' इत्यण्, ङीप्, जसि पूर्वसवर्णदीर्घत्वम् । *वाराहीति* । वराहस्य विकार इति

न्यासः

स्याद्—अग्नये इति ? इष्टत्वाददोषः । अत्र हि परत्वात् 'जसि च' इति गुण एव भवति । उत्तरार्थं तर्हि स्यात्—'वा छन्दसि' इति दीर्घाद् यथा स्यात् ? नैतदस्ति; वाग्रहणस्य तत्र व्यवस्थितविभाषाविज्ञानात्—दीर्घादेव भविष्यति, न ह्रस्वात् । 'जसि च' इत्येतदपि स्पष्टार्थमेव । ननु चासति 'जसि च' इत्येतस्मिन् युवतीः पश्य, पद्धतीः पश्येत्यादौ शस्यपि प्रतिषेधः स्यात् ? ज्ञापकान्न भविष्यति, यदयम् 'तस्माच्छसो नः पुंसि' इति पुंग्रहणं करोति, तज् ज्ञापयति—शसि प्रतिषेधो न भवतीति । तद्धि नपुंसके पूर्वसवर्णदीर्घत्वासम्भवात् स्त्रीनिवृत्त्यर्थमेव क्रियते । यदि च स्त्रियामप्ययं युवतीः पश्येत्यादौ प्रतिषेधः स्यात्, तदा पूर्वसवर्णदीर्घत्वाभावान् नत्वस्य प्राप्तिरेव नास्तीति किं पुंग्रहणेन ? उत्तरार्थं तर्हि जस्ग्रहणम् ? नैतदस्ति; वाग्रहणस्य तत्र व्यवस्थितविभाषात्वविज्ञानादेव जसोऽन्यत्र न भविष्यति ॥

वा छन्दसि ॥ मारुतीरिति । मरुद् देवता आसामिति 'सास्य देवता' इत्यण्, 'टिड्ढाणञ्' इति ङीप ; सवर्णदीर्घत्वम् । वाराहीरिति । वराहस्य विकार इति

Indira Gandhi National Centre for the Arts

पिण्ड्यः । वाराही । उपानही । वाराह्यौ । उपानह्यौ ॥

अमि पूर्वः ॥ १०६ ॥

'अकः' इत्येव । अमि परतोऽकः पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति । वृक्षम् । प्लक्षम् । अग्निम् । वायुम् ।

पूर्वग्रहणं किम् ? पूर्व एव यथा स्यात्, पूर्वसवर्णोऽन्तरतमो मा भूदिति कुमारीमित्यत्र हि त्रिमात्रः स्यात् ।

पदमञ्जरी

'अवयवे च प्राण्योषधिवृक्षेभ्यः' इति 'प्राणिरजतादिभ्योऽञ्', ङीप्, द्विवचने पूर्वसवर्णदीर्घः । उपानहौ विशेष्ये ॥

अमि पूर्वः ॥ 'दीर्घात्' इति नानुवर्त्तते, आरम्भसामर्थ्यात् ।

पूर्वग्रहणमित्यादि । यः पूर्वः श्रुतः, स एव यथा स्यात्, कः पुनरन्यः प्राप्नोति ? तत्राह—*पूर्वसवर्णो दीर्घो मा भूदिति* । क्वचित्तु समासः पठ्यते, स कर्मधारयो द्रष्टव्यः । एतदुक्तं भवति—असतीह पूर्वग्रहणे प्रकृतं पूर्वग्रहणमनुवर्त्यम्, तस्मिंश्चानुवर्त्तमाने तत्सम्बद्धं सवर्णग्रहणमप्यनुवर्त्यम्, ततश्च पूर्वस्य यः सवर्णः स एवान्तरतमः प्रसज्येत, तत्र को दोषः ? न तावद्वृक्षमित्यादौ द्विमात्रस्य स्थानित्वेन द्विमात्रप्रसङ्गः, वचनसामर्थ्यात् 'प्रथयोः पूर्वसवर्णः' इत्येव दीर्घस्य सिद्धत्वात् ? अत आह—*कुमारीमित्यत्रेति* ।

न्यासः

'अवयवे च प्राण्योषधिवृक्षेभ्यः' इत्यण्, पूर्ववद् ङीप् । उपानहीति । 'षिद्गौरादिभ्यश्च' इति ङीष् ॥

अमि पूर्वः ॥ पूर्वसवर्णदीर्घत्वे प्राप्ते वचनमिदम् । दीर्घ इति चेहानुवर्त्तते, अन्यथा हीदं वचनमनर्थकं स्यात् ।

अथ पूर्वग्रहणं किमर्थम्, यावता प्रकृतं यत् पूर्वग्रहणं तदेवेहानुवर्त्तिष्यत इति ? अत आह—**पूर्वग्रहणमित्यादि** । यथाजातीयकः पूर्वस्तथाजातीयक एव यथा स्यादित्येवमर्थं पूर्वग्रहणम् । एवकारेण यद्व्यवच्छिन्नं तद् दर्शयितुमाह—**पूर्वसवर्णान्तरतमो मा भूदिति** । पूर्वसवर्णश्चासावन्तरतमश्चेति कर्मधारयः । असति हि पूर्वग्रहणे यत् पूर्वकं पूर्वग्रहणं तेनैवानुवर्त्तितव्यम्, तस्मिंश्चानुवर्त्तमाने तत्सम्बद्धं सवर्णग्रहणमप्यनुवर्त्तेत, तथा च 'स्थानेऽन्तरतमः' इत्यनया परिभाषया पूर्वस्य यः सवर्णः स एव प्रसज्येत । किं पुनरेवं सत्यनिष्टं स्यात्, वृक्षमित्यादौ द्विमात्रस्य स्थानिनो द्विमात्र एव स्यादिति चेत् ? नैतदस्ति; एवं हि वचनमिदमनर्थकं स्यात्, 'प्रथमयोः पूर्वसवर्णः' इत्यनेन सिद्धत्वादित्यत आह—**कुमारीमित्यत्र हीत्यादि** । कुमारीशब्दस्येकारो द्विमात्रः, अमोऽकारो मात्रिकः; तत्समुदायात्मकश्चात्र स्थानी, तत्र पूर्वसवर्णो विधीय-